नं: २ ६
घ

महाभाष्य प्रदीपः ६ अध्याय)

१८९ पत्राणि सं० १८२६

व्याकरण



६

श्रीगणेशाय नमः ॥ एकाचो द्वे प्रथमस्य । एकाच इति किमयमिति । निर्देशस्य समानत्वात् भिन्नार्थत्वाच्च एकवचननिर्देशाच्च द्वयोर्युगपदाश्रयितुमशक्यत्वाद्धलादिःशेष
इत्यादेर्बहुव्रीहिलिङ्गस्य दर्शनाद्दीर्घ इणः किति तितत्पुरुषलिङ्गोपलम्भात् स्वरस्य उरत्वधारणात्वादेकश्रुत्या वा सूत्रपाठात्स्वरानिश्चयाभावात्प्रश्नः बहुव्रीहितत्पुरुषयो
र्विग्रहप्रदर्शनं विरुद्धार्थप्रतिपादनार्थं नहि संज्ञाभेदमात्राद्दोषः किंतु विरुद्धार्थप्रतिपादनात् किं चात इति द्वयोर्विशेषं पृच्छति सिद्धं पपाचेति प्रथमत्वाभावेऽपि व्यपदेशि
वद्भावाद्वक्ष्यमाणाद्योगविभागाद्वा बहुव्रीहिपक्षे पचेर्द्विर्वचनं सिध्यति न तु तत्पुरुषपक्षे बहुव्रीहिनिर्देश इति बहुव्रीहेर्निर्देश उच्चारणं बहुव्रीहिणाऽऽचार्यस्य निर्देशः

श्रीगणेशाय नमः ॥ एकाचो द्वे प्रथमस्य । एकाच इति किमयं बहुव्रीहिः एकोऽच् यस्मिन्स एकाच् एकाच इति आहोस्वित्तत्पुरुषोऽयं समानाधिकरणः
भाष्य एकोऽच् एकाच इति किं चातः यदि बहुव्रीहिः सिद्धं पपाच पपाठ इयाय आरेति न सिध्यति अथ तत्पुरुषः समानाधिकरणः सिद्धमियाय आरेति पपाच पाठे
ति न सिध्यति अत उत्तरं पठति एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशोऽयं एकवर्णेषु च कथं एकवर्णेषु व्यपदेशिव
द्वचनात् व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यं एवमेकवर्णेषु द्विर्वचनं भविष्यति एकाचो द्वे भवत इत्युच्यते तत्र न ज्ञायते कस्यैकाचो द्वे भवत इति ॥०॥

प्रतिपादनमिसर्थः आप्ति न्यायाश्रयेण बहुव्रीहिराश्रीयते वक्ष्यमाणाद्व्यपदेशिवद्भावात्तत्पुरुषफलस्य बहुव्रीहिणाकृतत्वादत एव प्रयोजनाभावान्न तत्राश्रयसे कश्चे
णामन्यतमाश्रयणं लिंगमप्यनेकं बहुव्रीहेरस्ति हलादिशेषः शर्पूर्वाः खयः लिट्यभ्यासस्योभयेषामिति अच्मात्रस्य द्विर्वचनेऽभ्यासस्य हलभावाच्छेषसंप्रसारणाद्ययोगा
त् एकवर्णेषु चेति मुख्य एकाज्व्यपदेशो येषामस्ति ते व्यपदेशिनः प्रचारयत्तेयथाद्विर्वचनं प्रतिपद्यन्ते तथैकवर्णा अपि कस्यैकाच इति विधिंमत्वा विशेषानुपादाना ण्म०
त्पृच्छति ॥०॥ ॥२॥ ॥३॥ ॥४॥ १

वक्ष्यतीति नायं विधिः किं तर्ह्यधिकार इत्यस्मात्तं स्यादस्यो न रवाक्ये षष्ठ्यर्थे विशेषस्यावस्थापनं धातोरेकाच इति वैयधिकरण्येन संबन्धोऽभिमतो धातोरवयवस्यैकाचो द्वे भवत इत्यर्थः इतर
था सामानाधिकरण्येन संबन्धं मत्वाह यदि धातोरिति नैषेति सर्वानुग्रहाय वैयधिकरण्यमाश्रीयते तस्मिन्ननेकविषयत्वाल्लक्षणस्य प्रथमग्रहणाच्च सामानाधिकरण्ये हि व्यवच्छे
द्याभावात् प्रथमग्रहणमनर्थकं स्यात् यत्रैव प्रथमस्येति प्राथम्यस्य द्वितीयाद्यपेक्षत्वात् अवचनादिति वचनरहितं यल्लोकविज्ञानं वचनेनानिबद्धं लोकव्यवहारात्मकं तस्मा
त्सिद्धमित्यर्थः तथा हि लोके शिलापुत्रकस्य शरीरमिति बहिर्वस्तुभेदेऽसत्यपि भेदस्य व्यवहारोऽवस्थाभेदाश्रयो दृश्यते शिलापुत्रः विक्रीयमाणत्वाद्यनेकावस्थायुक्तो योऽदृष्ट
स्तस्येदं शरीरमिति परिदृश्यमानावस्थाभेदेन निर्दिश्यते एकमेव हि वस्तु तदेवेदमिति प्रत्यभिज्ञानादेकत्वमत्यजदप्यवस्थाभेदान्नानारूपमवभाति तथाहं स्वात्मानमात्मने

वक्ष्यतीति लिटि धातोरनभ्यासस्येति तेन धातोरेकाच इति विज्ञायते यदि धातोरेकाच इति सिद्धं पपाच पपाठ जजागार पुपुत्रीयिषतीत्यत्र न सिध्यति नैषैकाचः समा
नाधिकरणा षष्ठी धातोरेकाच इति किं तर्हि अवयवयोगे षष्ठी धातोर्य एकाजवयव इति अवयवयोगे षष्ठी चेत् सिद्धं जजागार पुपुत्रीयिषतीति पपाच पपा
ठेति न सिध्यति एषोऽपि व्यपदेशिवद्भावेन धातोरेकाजवयवो भवति। एकाचो द्वे प्रथमस्येत्युच्यते तेन पत्रैव प्रथमस्याप्रथमस्या इति तत्र द्विर्वचनं स्यात् जजागार पुपु
त्रीयिषतीति पपाच पपाठे तत्र न स्यात् प्रथमत्वे चाप्रथमत्वे च किं व्यपदेशिवद्वचनात्सिद्धमिति सेवसन्तर्हि व्यपदेशिवद्भावो वक्तव्यः न वक्तव्यः उक्तं वा किमुक्तं तत्र
॰ व्यपदेशिवद्वचनमेकाचो द्वे प्रथमार्थं षष्ठ्यर्थं षत्वे चादेशसंप्रत्ययार्थं नैष दोषः अवचनाल्लोकविज्ञानात्सिद्धमित्येव॥ ०॥ ॥

सेकस्यापि बुद्ध्यवस्थाभेदाश्रयः कर्तृकर्मकरणभावः इत्यायेतत्राऽपि प्रयोगभेदादेतिइतो यंति आयन् जिगमिषतीत्याद्यनन्तरूपस्येणएकोऽयमिकारो इजिति व्यपदिश्यते अथ
वान्वयव्यतिरेकाभ्यां परिकल्पितार्थत्वाच्छब्दार्थसमुदाये यस्य विवक्षितार्थ एको वर्णोऽजिति व्यपदिश्यते एवं पचेरनन्तप्रयोगविषयस्य प्रयुज्यमानं लिडादिपरं रूपमवयव इति व्यपदि
श्यते प्रथमव्यपदेशोऽपि प्रयोगभेदादेवेति प्रथमग्रहणमेतेनाह तेत्यादि लोके व्यवहार एकस्मिन्नपि दृश्यते असतोऽपि द्वितीयादीन् बुद्ध्या परिकल्प्य व्यवहारान्मुख्यप्रथमसाधर्म्याद्गौणः सि
द्धत्वाच्चैवंविधस्य व्यवहारस्य नास्ति गौणत्वं सत्यपि वा गौणत्वेऽस्त्येकल्पिते घ्रभ्यासस्योभये षां दीर्घ इणः किती त्यादेर्ज्ञापकादिव तिशास्त्रीयकार्यप्रवृत्तिः ॥ ॥ ॥

भा०कौ०६ योगविभागो वेति तेन प्राथम्यार्थो व्यपदेशिवद्भावो नाश्रयितव्यः तत्र हि योगविभागसामर्थ्याज्जिटि धातोरनभ्यासस्येत्यादावेकाच इति प्रथमस्येति च वाक्यभेदेन संबध्यते
२ एकवाक्यतायां तस्यैव दोषस्य प्रसंगात् तस्मादेतस्माद्ग्रहणाद्वाक्यात्प्रक्रियावाक्यानि लक्ष्यसंस्कारकाणि उपपन्नं वंते धातोरवयवस्यैकाचो लिटि द्वे भवत इत्येकं वाक्यं धातोः प्र

योगविभागो वा एकाज्मात्रस्य द्विर्वचनार्थं अथवा योगविभागः करिष्यते एकाचो द्वे भवतः किमर्थो योगविभागः एकाज्मात्रस्य द्विर्वचनार्थं एकाज्मात्रस्य द्विर्वचनं यथा स्यात् इयाय पपाच ततः प्रथमस्य प्रथमस्यैकाचो द्वे भवतः इहमिद्गानी किमर्थं नियमार्थं यत्र प्रथमश्चाप्रथमश्चास्ति तत्र प्रथमस्यैवैकाचो द्विर्वचनं यथा स्यात् अन्यस्य माभूत् जजागारपुपुत्रीयिषतीति एकाचोवयवैकाचत्वादवयवानां द्विर्वचनप्रसंगात् एकाचोवयवैकाचत्वादवयवानां द्विर्वचनं प्राप्नोति॥ ॥ ॥श्री॥ ॥७॥

थमस्यैकाच इति नियमार्थं द्वितीयं अजादेर्धातोर्द्वितीयस्यैकाच इति तृतीयम् एकाच इति अवयवा अप्येकाचः समुदायोपि व्यपदेशिवद्भावाद्धातोरवयवश्च ततो विशे राम०
षानुपादानात्सर्वेषां द्विर्वचनप्रसंगः॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥०॥ २

=भेदेति॰ शब्दे हि अपदेशिकत्वादयोजनार्थस्यार्थसमुदायस्याश्रितस्यैकदेशः शब्द इति मुख्यत्वापेक्षया भावः॥ २८=

निज् शब्दोपीति यथा येनैव हस्तेन बाहुर्हस्तवानुच्यते तेनैव देवदत्तोप्येवमिकारेण सर्वे एकाज्व्यपदेशभाज इति भावः इकारोपीति व्यपदेशिवद्भावादिति भावः अर्थवताव्यपदे शिवद्भाव इत्यनाश्रित्यैकारोपीत्युक्तं न ह्येतद्वचनमपि तुन्यायः अर्थवतो भेदकल्पनसंभवादनर्थकोपि यदि भेदेनाश्रयितुं शक्यते तत तत्रापि भवत्येव व्यपदेशिवद्भावः शक्य ते चैकारोप्यनेकस्य समुदायं तभावान्नानारूप इवोपलभ्यमानेनरूपेणोकाजिति व्यपदेष्टुं नन्वर्थवत्त्वात्समुदायस्यैव द्विर्वचनं भविष्यति नावयवानामनर्थकानां नैतदस्ति यत्र विशिष्टं स्वरूपमुपादीयते तत्रार्थवद्ग्रहणे परिभाषोपतिष्ठते यथाशेइत्यत्र अन्यथा र्थवद्धातुरित्यत्रार्थवद्ग्रहणमनर्थकं स्यात् अधातुरप्रत्यय इति पर्युदासा श्रयणात् तस्मादृशशब्दग्रहणादर्थवत्परिभाषोपस्थानादनर्थकस्याग्रहणप्रसंगाद्धातोरवयवस्यैकाच इति अवयवत्वेनाश्रयणाच्चानर्थकस्यापि ग्रहणं कारणान्नास्तीहे

इकारोप्येकाच्॰

नेनिजतीत्यत्र निज् शब्दोप्येकाच् इज् शब्दोप्येकाच् निशब्दोपि तत्र निज् शब्दस्य द्विर्वचने रूपं सिद्धं दोषाश्च न संति इज् शब्दस्य द्विर्वचने रूपं न सिध्यति दोषा अपि न संति इकारस्य द्विर्वचने रूपं न सिध्यति दोषाश्च संति निशब्दस्य द्विर्वचने रूपं सिद्धं दोषास्तु भवंति तत्र को दोषः तत्र जुसभाववचनं तत्र जुसभावो वक्तव्यः अनेनिजुः पर्यवेविषुः अभ्यस्तात् झेर्जुस् भावो भवतीति जुस्भावो न प्राप्नोति जकारेण व्यवधानात्॥ ॥ श्री

[redacted] =युगपदनुष्ठानासंभवात् पर्यायप्रसंगदत्याह॰ एकैकस्येति॰ २३=

न स परिभाषोपस्थानं अत्र च पर्यायेण सर्वेषां द्विर्वचनप्रसंगश्चोद्यते न तु युगपत् न ह्येकोवयवो युगपदनेकस्यावयविनोऽवयवत्वेन शक्योऽपेक्षितुं अवयवस्य गुणत्वा त्परार्थत्वादेकं प्रति गुणभावादपरं प्रति गुणभावायोगात्पर्यायेण तदपेक्षाया अविरोधात्सर्वप्रसंग उच्यते एकस्यैकाचो द्विर्वचने कृते एकाच्व्यपदेशहेतोरचो पि द्विःकृतत्वा त स्मिन्नेव प्रयोगे ऽपरस्यैकाचो द्विर्वचनाप्रसंगः प्रवृत्तत्वाल्लक्षणस्य तस्मात्प्रयोगांतरे पर्यायेण सर्वेषां द्विर्वचनप्रसंगः इज् शब्दस्येति इकारस्य लघूपधगुणे सत्यभ्यासस्या सवर्ण इतीकारस्येयङि॰ नियेजेतिरूपं स्यात् इकारस्यापि द्विर्वचने एतदेव रूपं दोषा अपि न संतीति रूपासिद्धेरन्यत्र जुसभावाद्यसिद्धिदोषस्याप्रसंगात्॥ ॥ ॥

=एकोवयवः इकारादिः॥ अनेकेति॰ भिन्नरूपेत्यादेः॥ २४=

भा० कै० ६ स्वरइतिस्वरविधौ व्यंजनस्याविद्यमानत्वात्स्वरसिद्धीरितिचेत् तन्न हलस्वरप्राप्तौव्यंजनमविद्यमानवदितिसेवव्यवस्थापनात् यस्मीवेविषतीति यद्धब्दस्यप्रयोगोनिपातैर्यद्य
३ दी [illegible]तिनिघातप्रतिषेधार्थं शास्त्रहानिस्यादिति एकस्मिन्नेकाच्यवयवेद्विरुच्यमानेपूर्वोक्तेनन्यायेनान्येषांतस्मिन्नेवप्रयोगेद्विर्वचनाभावात्तद्विषयंशास्त्रमकृतंस्यात् सिद्धंत्विति
समुदायेद्विरुच्यमानेऽवयवानाम पितत्रांतर्भावाद्विर्वचनसंबंधात्कस्मिंश्चिच्छास्त्रहीनमितिसूत्रार्थः नन्विति शास्त्रेणसाक्षात् समुदाय एवानुगृहीतःस्यात् नत्वव

स्वारश्च स्वरश्च न सिद्ध्यति नेनिजतियस्परिवेविषतीति अभ्यस्तानामादिरुदात्तो भवतीत्यजादौलसार्वधातुकइत्येषस्वरोनप्राप्नोति अङ्गावश्च अङ्गाव
श्च न सिद्ध्यति नेनिजतिपरिवेविषतीति अदभ्यस्तादिसंज्ञावोनप्राप्नोति नुम्प्रतिषेधश्च नुम्प्रतिषेधश्च न सिद्ध्यति नेनिजत्परिवेविषत् नाभ्य
स्ताच्छतुरितिनुम्प्रतिषेधोनप्राप्नोति जकारेणव्यवधानात् शास्त्रहानिश्च शास्त्रहानिश्च भवतिसमुदायेकाचःशास्त्रंहीयते सिद्धंतु तत्समु
दायैकाच्त्वात् शास्त्राहानेःसिद्धमेतत्कथंतत्समुदायैकाच्त्वात् किमिदं तत्समुदायैकाच्त्वादिति तस्यसमुदायस्तत्समुदायः एकाज्भावएक
काच्त्वंतत्समुदायस्यैकाच्त्वंतत्समुदायैकाच्त्वंतत्समुदायैकाच्त्वादितितत्समुदायैकाचोद्विर्वचनंभविष्यति कुतएतत् शास्त्राहानेः एवंहिशा
स्त्रमहीनंभवति ननुसमुदायैकाचोद्विर्वचनेक्रियमाणेऽवयवैकाचःशास्त्रंहीयतेनहीयते किंकारणं अवयवात्मकत्वात्समुदायस्य अवय
वात्मकःसमुदायः अभ्यंतरोहिसमुदायेऽवयवःतद्यथावृक्षःप्रचलन्सहावयवैःप्रचलतितत्रबहुव्रीहिनिर्देशेत्वनच्कस्यद्विर्वचनमन्यपदार्थत्वात्०॥

यवाइतिप्रश्नः नहीयतइति यद्यपिसमुदायेद्विरुच्यमानेसाक्षादवयवेषुशास्त्रंनप्रवृत्तंतथापिशास्त्रीयफलसंपत्त्याहानिरुच्यते अवयवेतुद्विरुच्यमानेतस्मिन्प्र एम०
योगेऽवयवांतराणांसमुदायस्यचशास्त्रीयफलसंबंधाभावाद्धीनमेव शास्त्रंस्यात् अनच्कस्येति एकस्यवाऽनेकस्यवाहलएवद्विर्वचनप्रसंगः॥ ॥ ३

=समुदायेयेएकाचःतद्विषयंशास्त्रं
=एकस्मिन्नेकाचिप्रवृत्तं अन्ये[illegible]का
=स्वप्रदत्ताईयेतेऽपर्वः।३= नस्येति॥
=तावेकवचनंतेषांसमुदायस्यपर्वः।४=

=भाष्येनुरितिभाष्यस्यपाठेस्यादेरूपत्तस्यसरणात्।=

=समासेनामतो बहुव्रीहेर् विविषयाइतिभावः॥२=

तद्यथेति चित्रगुशब्दस्यान्यपदार्थ एव वाच्यो न तु बहिष्पदार्थे इति न तस्य कार्येण संबंधः सिद्ध्यतीति तस्यान्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं सर्वत्रापि पदार्थो गुणो वाय
स्यान्यस्य पदार्थस्य संविज्ञानं संनिहितविशेषणस्यान्यपदार्थस्य विशिष्टसंबंधाश्रयेण केनचिद् बहुव्रीहिणाभिधानादित्यर्थः शुक्लवाससमिति अससपि स्वस्वामिभावे वा
सः संयोगाश्रयो बहुव्रीहिरिति शुक्लवासः संयुक्तपुरुषानयने पृथगचोदितान्यपि वाससांसि सामर्थ्यादानयनेन संबध्यंते इहतु यः शुक्लवासा दृष्टस्तमानयेति

तस्य॰ =संयोगसमवायान्यतरसंबंधेनाश्रयेण॥२= =आनयनाद्यन्वयित्वेनज्ञानमित्यर्थः॥२= =वाससः संविज्ञानमित्युत्तरेणान्वयः॥२=

तत्र बहुव्रीहिनिर्देशे अनन्त्यस्य द्विर्वचनं प्राप्नोति आटतुः आदुः किंकारणं अन्यपदार्थत्वाद्बहुव्रीहेः अन्यपदार्थे बहुव्रीहिर्वर्तते तेन यद
न्यस्य च तत्र स्याद्द्विर्वचनं स्यात् तद्यथा चित्रगुरानीयतामित्युक्ते यस्य ता गावः संति स आनीयते न गावः सिद्धं तु तद्गुणसंविज्ञानात्पाणिनेर्यथा लो
के सिद्धमेतत्कथं तद्गुणसंविज्ञानाद्भगवतः पाणिनेराचार्यस्य यथा लोके तद्यथा लोके शुक्लवाससमानय लोहितोष्णीषाः प्रचरंतीति इति तद्गुणआनी
यते तद्गुणाश्च प्रचरंतीति एवमिहापि ॥८॥ ॥७॥ ॥

दर्शनक्रियायां वाससामुपलक्षणत्वेनोपात्तानि तथा च तानि शुक्लानि एव दर्शनक्रियातो नयनोपलक्षणत्वेन निर्दिष्टेति नावश्यं तत्र शुक्लानां वाससां संविज्ञानं
चित्रगुशब्दस्तु स्वस्वामिभावविशिष्टमन्यपदार्थमाहेति नास्यानयने बहिष्पदार्थे संनिधा इहतु एकोऽच्यस्य एकाजिति विशिष्टावयवोपलक्षितस्यावयवि
नोऽन्यपदार्थत्वादवयवपरित्यागेनावयविनोऽभावात्तस्य कार्ये विधीयमाने तत्रांतर्भावात्संनिहितोऽवयव उपलक्षणभावेनाप्युपादीयमानः प्रतिपद्यते॥ ॥

अध्ययस्येति सोपस्कारत्वात् सूत्राणां तन्निबंधनानि लक्ष्यसंस्कारकाणि वाक्यांतराण्युपलभ्यंते तत्र द्व इत्येतत्संख्ये[illegible]येवर्तते तच्च संख्येयं शब्दानामन्वाख्येयत्वेन प्रस्तुतत्
त्वाच्छब्दरूपं वा स्यात् तत्संबंधि वोच्चारणं तत्र यदा शब्दरूपं संख्येयं तदैकाच इति स्थाने योगा षष्ठी षष्ठी स्थाने योगेति परिभाषोपस्थानात्तदा स्थाने द्विर्वचनमित्येष पक्षो भव
ति यथास्तेर्भूरिति यदा तूच्चारणं संख्येयं तदा तस्य क्रियारूपत्वात् क्रियायाः शब्दस्य च स्थान्यादेशभावायोगादेकाच इति कर्मलक्षणा षष्ठी विज्ञाने उच्चारणशब्दाध्या
हारेण शेषलक्षणा वा यथा मातुः स्मरतीति द्विः प्रयोगो द्विर्वचनमित्येष पक्षो भवति तत्र गुणदोषपरीक्षार्थो विचारः क्रियते आट इति प्राग्द्विर्वचनं भवति द्वि

अथ यस्य द्विर्वचनमारभ्यते किं तस्य स्थाने भवति आहोस्विद्द्विः प्रयोग इति कश्चात्र विशेषः स्थाने द्विर्वचने णिलोपवचनं समुदायादेशत्वात्
स्थाने द्विर्वचने णिलोपो वक्तव्यः आटिटत् आशिशत् किं कारणं समुदायादेशत्वात् समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात् प्रकृति
प्रत्ययसमुदायस्य न श्रेणिर्भवतीति णेरनिटीति णिलोपो न प्राप्नोति॥ ॥ ॥श्री॥ ॥

र्वचनं पणपवाया वैकादेशा ह्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्य इति अपवादकृते पि णिलोपे द्विर्वचने चीतिरूपस्थानिवद्भावात्कृताकृतप्रसंगित्वान्नित्यत्वाद्द्वि
र्वचनं तच्चैकस्य शब्दांतरं समुदायरूपमादेशस्तत्र णेरभावाद्विकारलोपाप्रसंगः न च स्थानिवद्भावास्ति ग्रहणेनादेशस्य ग्रहणं न ह्ययं णेरादेशः किं तर्हि समुदायस्य शि
ष्टस्य यत्र च द्वौ स्थानित्वेन शब्देन निर्दिष्टौ यथैकः पूर्वपरयोरिति तत्रान्यतरेणादेशस्य व्यपदेशो भवति खट्वर्ष्य इति इह तु समुदाये णिरंतर्भूतत्वादेशेन संबध्यते न तु सा
क्षादित्यविषयोयं स्थानिवद्भावस्य॥ ॥ ॥श्री॥ ॥

=एवं चाच्कर्वर्णादेशत्वाद्यपरत्वं भवतीति भावः॥२=

अनित्संद्विर्वचनमिति द्विर्वचनेऽचीतिकार्यस्थानिवद्भावं मन्यते अभ्यासस्य निरुक्तादिसम्प्रजोरित्सत्र व्याख्यास्यते नेमतुरिति णोनः इति नत्वे धातुरादेशादिर्भवति ततो द्विः
प्रयोगेप्यादेशादित्वं नव्यावर्तते [redacted] स्थानेद्विर्वचनेतु शङ्कान्तत्वादादेशादित्वाभावः आदेशादिषपरेशस्य चात्रात्वा

=ननुसमुदायादेशस्य... आदेशादीतिःयषयादेः

इदमिह संप्रधार्यं द्विर्वचनं क्रियतां णिलोप इति किमत्र कर्त्तव्यं परत्वात्णिलोपः नित्यं द्विर्वचनं कृतेपि णिलोपे प्राप्नोत्यकृतेपि द्विर्वचनमप्यनित्यं
अन्यस्य कृते लोपे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति नित्यमेव द्विर्वचनं कथं रूपस्थानिवत्वात् यच्च सम्प्रत्युक्तं तस्य द्विर्वचने
चोद्यं तद्दिहापि योज्यं किं पुनस्तत् सम्प्रत्युक्तं तस्येति चेदभ्यासस्य निरुक्तः दीर्घकुलसंप्रसारणापत्वमधिकस्य द्विर्वचनात् अपारब्धो ह्याप्यभ्यस्तविधिप्रति
षेधः सङ्घाश्रये च समुदाये समुदायादेशत्वात् स्थलाश्रये चाव्यपदेशादपामिश्रत्वादिति अस्कृतार्हि द्विः प्रयोगो द्विर्वचनं द्विः प्रयोग इति चेत्सकारषका
रादेशादेरितिप्रतिषेधः प्राप्नोति स्थानेपुनर्द्विर्वचनेस्तिसमुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात् लक्ष्ये तिमत्ययस्य नष्टः स आदेशादिर्भवति
द्विः प्रयोगे चापि द्विर्वचनेस्तिनदोषः वक्ष्यतितत्र लिट्यग्रहणसप्रयोजनं लिटिय आदेशादिस्तदादेर्नैति इउवचनं चयइ लोपे इडभावश्चयइ

शादेरेत्ववचनं लिटि द्विःप्रयोग इति चेत्सकारषकारादेरेत्वं लिटि वक्त इलोपेवक्तव्यः ॥ ॥श्री॥ ॐ ॥
व्यं नेमतुः नेमुः सेहे सेहाते सेहिरे अनादे २४ देश

=प्रश्वतिः पूर्वभागो णेन...भागः...ः२=

अयत्वात्स्थानिवत्वाभावः लिटीति नैमत्वयोरनैमित्तिकत्वाल्लिङ्गिनिमित्तत्वाभावः ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

वेमिदितेति वेमिद्य शब्दात्तच् स्य छत्रोपयलोपयोः कृतयोरिट् प्रतिषेधः प्राप्नोति पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यनाश्रित्य चोद्यप्रतिसमाधाने एकाचोंगादिति उपदे
शग्रहणे नानुदात्त एव विशेष्यते न त्वेकाजिति भावः आवृत्तिसंख्यया चैतद्यजंगं नैकाच् ननु चैकैकमिति एकमेव द्विरुच्यते इत्येकस्माद्यः प्रत्ययविधिः सोऽपरस्मादपीति द्वे

वेमिदिता वेमिदितुं एकाच उपदेशेनुदात्तादिती ट्प्रतिषेधः प्राप्नोति स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्र
त्ययस्य न षटः स भवतिय एकाजुपदेशेनुदात्तः द्विःप्रयोगे चापि द्विर्वचने न दोषः एकाज्ग्रहणे नांगं विशेषयिष्यामः एकाचोंगादिति ननु चैकैकमत्रांगं स
मुदाये यावाक्यपरिसमाप्तिस्तयांगसंज्ञा भविष्यति कुत एतत् शास्त्रहानेः एवं हि शास्त्रमहीनं भवति इड्दीर्घप्रतिषेधस्य इटो दीर्घत्वस्य च प्रतिषेधो
वक्तव्यः जरीगहिता जरीगहितुं ग्रहोलिटि दीर्घ इति दीर्घत्वं प्राप्नोति स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृ
तिप्रत्ययस्य न ष्टो ग्रहिः प्रयोगे चापि द्विर्वचनेन न दोषः ग्रहिणांगं विशेषयिष्यामः ग्रहेरंगादिति ननु चैकैकमप्यत्रांगं समुदाये यावाक्यपरिसमाप्तिस्त
यांगसंज्ञा भविष्यति कुत एतत् शास्त्रहानेः एवं शास्त्रमहीनं भवति पराद्विविधिप्रतिषेधस्य परादित्व लक्षणाविधेः प्रतिषेधो वक्तव्यः ॥ श्री

=ननु द्विःप्रयोगे जरीगहिर्द्वि रित्ये कदेशविकृतन्यायेन चांगत्वमपीति शेषः ... विशेषणे तिः अंगस्य विभक्ति भिदादिलामेन विशेषणत्वात्मर्यादित्वम् ... २=

द्विःप्रयोगे भवतस्तत्र परं पदे काजंगं तदाश्रय इट्प्रतिषेधः प्राप्नोतीत्यर्थः आवृत्तिसंख्याश्रया चैकैकमिति वीप्सा समुदाय इति एकैवांगसंज्ञा समुदायस्य न तु पृथगवयवयोः समु
दायस्य प्राधान्यात् प्रधाने कार्यसंप्रत्ययात् समुदायव्यवहारो प्यावृत्तिसंख्याश्रयः जरीगहितेति जरीगृह्य पाद्धातच् ग्रहिणांगमिति अत्र तु चोजरीगृहि संगं न तु ग्रहिः विशे एम०
षणसामर्थ्याद्विपर्यया श्रुतरूपांगीकरणं ॥ ॥ ॥ श्री ॥ ॥ ५

सिषेचेति सिचेर्लिट् विहित इतितिङः तंपदमितितदादेरेव पदत्वात्पदादिसकार इति षत्वप्रतिषेधप्रसंगः प्रकृतिप्रत्ययस्येति प्रत्यययोस्तानं प्रकृतिविज्ञानस्ये त्यर्थः तावेवेति परिहारान्तरं उच्चारणक्रियाया एव द्वित्वं न तूच्चार्यमाणस्य शब्दस्य ततश्चैकस्मादेव प्रत्ययविधिः ननु द्वाभ्यामित्येकैवांग संज्ञात्वेति नास्ति दो षः आदिग्रहणं चेति प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं भवतीत्यत्र समुदायपदत्वमिति सिषेच शब्दस्य पद[redacted]

=उच्चारणक्रियाद्यविशिष्टेसर्वः।२=

सिषेच सुष्वाप सात्पदाद्योरिति षत्वप्रतिषेधः प्राप्नोति स्थाने पुनर्द्विर्वचने सति न दोषः समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वा त्प्रकृतिप्रत्ययस्य नष्टः सपदादिर्भवति द्विः प्रयोगे चापि द्विर्वचने न दोषः सुप्तिङ्-न्तं पदं विशेषयिष्यामः सुप्तिङंतं पदं यस्मात्सुप्तिङ्-विधिः तदादि सुवंतं तिङंतं च ननु चैकैकस्मादप्यत्र सुप्तिङ्-विधिः समुदायेयावाक्यपरिसमाप्तिः तया पदसंज्ञा भविष्यति कुत एतत् शास्त्रहा नेः एवं हि शास्त्रमहीनं भवति तावेव सुप्तिङोऽयो ततः परौ सैव च प्रकृतिराद्या आदिग्रहणं च कृतं समुदायपदत्वमेतेन अजादेः द्वितीयस्ये

९ त्यवचनमजादेरिति कर्मधारयात्पंचमी॥ ॥ श्री

संज्ञा न तु सेचशब्दस्य तदवयवस्य नन्वेवं चेभिरिते तिस एवैकाज् धातुरितीट् प्रतिषेधः प्राप्नोति नैष दोषः उच्चारणभेदाद्विरोधि संज्ञाप्रादुर्भावात्पूर्वं संख्या कृतव्यपदेशनि वृत्तेनात् तथा च गिरि शोस्मात्सेसावेकाच इति विभक्तेरुदात्तत्वं न भवति तदत्रा वृत्तिभेदाद्रूपद्वयमाश्रित्य समुदाये वाक्यपरिसमाप्तिरिति परिहार उक्तः रूपभेदानंगीकर णेन तु[redacted]ता वेव सुप्तिङ्-विति द्वितीयपरिहारः॥ अजादेर्द्वि॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ०

द्वितीयस्येति शक्यमवक्तुमिति अजादेरिति बहुव्रीहिपक्षे सामर्थ्याद्दस्य समार्थ्ये प्रारंभे विज्ञायमाने तृतीयानामप्येकाचां द्विर्वचनप्रसंगात् द्वितीयस्येति वक्तव्यं कर्मधारय
पक्षे त्वजादेरिति पंचमीनिर्देशात्तस्मादित्युत्तरस्येति परिभाषोपस्थानादनंतरस्यैवैकाचो लाभात् न वाहितस्येति नार्थो द्वितीय[illegible] ग्रहणेन तत्र व्याख्यानात्तु पदार्थप्रधान
त्वादंतरंगत्वाद्वा कर्मधारय एवाश्रयितव्य इति भावः प्राप्तत्वादिति यद्यपि सत्सामेव प्राप्तौ निवृत्तिरुच्यते न त्वसत्यां तथापि विशिष्टप्राप्तिरिह हेतुत्वेन विवक्षिता प्राप्ते वि
= विवर्जकांतरस्याभावविशिष्टेत्यर्थः। यथा कारेणः परस्यास्येकेनाकांतत्वादेव द्वितीयस्यापरत्वायोगादित्यर्थः।

द्वितीयस्येति शक्यमवक्तुं कथं अजादेरिति नैषा बहुव्रीहेः षष्ठी अच् आदिर्यस्य सोयमजादिः अजादेरिति किं तर्हि कर्मधारयात्पंचमी अच्
आदिः अजादिः अजादेः परस्येति तत्रांतरेण द्वितीयग्रहणं द्वितीयस्यैव भविष्यति न तु द्वितीयद्विर्वचने प्रथमनिवृत्तिः प्राप्तत्वात् द्वितीयद्वि
र्वचनेन प्रथमस्य निवृत्तिर्वक्तव्या अटिटिषति अशिशिषतीति किं कारणं प्राप्तत्वात् प्राप्नोत्येकाचो द्वे प्रथमस्येति ननु च द्वितीयद्विर्वचनं प्रथ
मद्विर्वचनं वा धिष्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् असति खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात्॥ ॥

घातकाभावादित्यर्थः ननु चेति येन नाप्राप्तिन्यायात् कथमन्यस्येति विरोधाद्बाध्यबाधकभावं मन्यते यथा कारणेः इह च विरोधाभावः अविरोधे हि समुच्चयो दृश्यते य
थाकृत्त्वसमासयसंज्ञानां समुच्चय इति चेदिहाप्यस्त्येव फलभेद एकेन प्रथमस्य द्विर्वचनविधानादजादेर्द्वितीयस्यापरेण तु द्वितीयस्य॥ ॥ श्री
॥श्री॥ ×भिन्नफलत्वात्संज्ञा ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

नवेति अनेनासंभवः प्रदर्श्यते यस्य द्वितीयस्यैकाचो द्विर्वचनं विधेयं तस्य प्रथमद्विर्वचने कृते द्वितीयत्वात् द्वितीयद्विर्वचनं न प्राप्नोतीत्यर्थः ननु परिनिमित्तयोगतः प्राक्प्र
थमद्विर्वचनं स्यात् ततोयं विरोधः स्यात् यदा तु पूर्वं द्वितीयद्विर्वचनं तदा विरोधाभावात्स्यादेव प्रथमद्विर्वचनं नैतदस्ति नित्यत्वात्प्राप्स्यात् क्रमव्यतिक्रमे त्वभावात् पूर्वं प्रथम
द्विर्वचनं तत्र कृते द्वितीयत्वात् द्वितीयद्विर्वचनाप्रसंग इत्यनवकाशत्वात् द्वितीयद्विर्वचने न प्रथमद्विर्वचनं बाध्यते तद्यथेति यदा द्वयोः पुरस्तान्मध्ये वा तृतीय उपजाय
ते तदायं दृष्टान्तो यदा तु परत उपजायते तदा द्वितीयो द्वितीय एव भवति नहि किंचिदिति द्वितीयस्य निर्देशात् विशेषानुपादानात् सामर्थ्याद् अत्र विशेषः आश्रीयत इति मत्वाह
अनारंभसममिति अटिस इति प्रथमद्विर्वचनं अट् अट् हलादिः शेष इति टकारस्य निवृत्तिः द्वितीयद्विर्वचनमट् अट् ततो हलादिः शेषः तत्र द्वयोस्त्रयाणां वाकाराणां प

नवा प्रथमविज्ञाने हि द्वितीयाप्राप्तिर्द्वितीयत्वात् नवा वक्तव्यं किं कारणं प्रथमविज्ञाने हि सति द्वितीयस्याप्राप्तिः स्यात् किं कारणं अद्वितीयत्वात् न हीदानीं
प्रथमद्विर्वचने कृते द्वितीयो भवति कस्तर्हि तृतीयः तद्यथा द्वयोरासीनयोस्तृतीय उपजायमाने न द्वितीयो द्वितीयो भवति कस्तर्हि तृतीयः नहि किंचिदुच्यते अकृ
ते द्विर्वचने यो द्वितीयस्तस्य भवितव्यमिति किं तर्हि कृते द्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं भविष्यति अनारंभसममेवं स्यात्॥ ॥ ॥

रूपे विशेषाभावात् द्वितीयद्विर्वचनमनर्थकं स्यादित्यर्थः हलादिः शेषो द्वितीयद्विर्वचनमित्ययं क्रमः कथं लभ्यते विपरीतक्रमः कस्मान्न भवति उच्यते नित्यत्वात्पूर्वं हला
दिः शेषो भवति द्वितीयद्विर्वचनं शाङ्गान्तरप्राप्त्या नित्यं तद्धि कृते हलादिः शेषे अः प्राप्नोति अकृते तु टट् शब्दस्य अन्तरंगत्वादतो गुण इति पररूपं स्यात् इतीत्यस्य बाधकं मन्यते
इत्वं हि सनमभ्यासं चापेक्षत इति बहिरंगं प्रागभ्यासविकारेभ्यो गाधिकारेति पक्षे इत्वमांगं न भवतीति वाराणां गं कत्वं वदित्यपि नास्ति सस्यपि अत्र सांगत्वे नानाश्रयत्वादंगवर्णयो
रत्र परिभाषानुपस्थानमिति भावः तस्मात्सामर्थ्यादत्रा कृते प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनेन भाव्यं॥ ॥ ॥ ॥ ः॥

चनंद्वितीयद्विर्व॰

भा॰कै॰६ सच प्रथमद्विर्वचने कृते द्वितीयो न भवतीति सामर्थ्यात्प्रथमद्विर्वचनेन वा ध्यते कृतेपि प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं नानर्थकमिति मत्वाह नानारंभसमिति इत्वमिति

७ आसन्नमपि समाप्नेरंगाधिकारादंगमित्वं सामान्ये न च वार्णादांगं बलवदिति आश्रीयते न समानाश्रयांगवार्णविषयमेवेति इत्वमेव प्रवर्तते न रूपं (पर) तत्र कृते द्वितीयद्विर्वचनं प्राप्नो

सभ्यासस्यासवर्णे इतीयङादेशश्च तत्र नित्यत्वाद्द्वितीयद्विर्वचनमियङादेशाद्धि नित्यः कृते द्वितीयद्विर्वचने नित्यत्वादित्वे चासवर्ण इति वचनादियङोऽप्रसंगात् ननु परस्य

कृतेपीत्वे तस्य स्थानिवद्भावात्पूर्वस्येयङ् प्राप्नोति नैष दोषः सवर्णे न भवतीति प्रसज्यप्रतिषेधश्चाश्रीयते सवर्णेचयो विधिः स सवर्णस्य विधिर्भवतीति सवर्णे विधौ

=वस्तुतस्त्वभ्यासस्यासवर्णे इतिसूत्रारंभसामर्थ्यादेतद्विषये स्थानिवद्भावो न प्रवर्तते॰१=

अटेः प्रथमस्य द्विर्वचनं स्यात् हलादिः शेषः द्वितीयस्य द्विर्वचनं हलादिः शेषः त्रयाणामकाराणां पररूपत्वे अटिषतीत्येवरूपं स्यात् नानारंभस

मं अटेः प्रथमस्य द्विर्वचनं हलादिशेषः इत्वं द्वितीयस्य द्विर्वचनं हलादिशेषः इत्वं द्वयोरिकारयोः सवर्णदीर्घत्वे अभ्यासस्यासवर्णे इतीयङादेशः

१ इयटिषतीत्येतद्रूपं यथा स्यात् ओणोर्ध्वोर्वोणिषतीति॥ ॥ ॥श्री॥ ॥

=इत्वं परत्वात्तत्र अभ्यासं वादिः पूर्वं वाभिहितं स्थानिवदित्याश्रित्य सवर्णग्रहणं समसाभ्यानात्॰१=मन्यतइति॰वार्णादांगमिति च समानाश्रयविषयमिति मन्यत इत्यर्थः॥१=भाजमिति॰समानाश्रयत्वेनतयोर्नित्यनिमित्तत्वान्निर्मूलमिति भावः॥२=

स्थानिवत्वप्रतिषेधादियङोऽप्रसंगात् द्वयोरिकारयोरिति॥ अथ परस्येयङादेशः कस्मान्न भवति अंतरंगत्वात्पूर्वमेकादेशं मन्यते एकादेशस्य लभ्यासहृस्वत्वं विशेषाभावान्नो

क्तं इयरिषतीति अस्यामपि प्रक्रियायां नास्ति द्वितीयद्विर्वचने विशेषः अकृतेपि तस्मिन्नेतद्रूपभावात् प्रथमद्विर्वचने कृते हलादिशेषः इत्वं इयदिः तिकार्यप्रवर्तनादत एवान्येषां ग्रं

थ इत्वं परस्येयङादेशो द्वयोरिकारयोः सवर्णदीर्घेना ईयटिषतीत्येतद्रूपं यथा स्यादिति युक्त एवायं ग्रंथो वार्णादांगं बलवदिति परस्येयङ्भाव्यं नत्वेकादेशो न तस्मिन्

कृते एकादेशस्तस्य त्वं न तद्भावात्हृस्वत्वं न भवति नाभ्यासादीनां हृस्वत्वइसंतादिवद्भावप्रतिषेधात् ओणोर्ध्वेति अत्रापि उर्वोणिषतीति पाठेन भाव्यं उर्वोणिषतीत्येतस्या एम॰

१ कृते द्वितीयद्विर्वचने सिद्धत्वात्॥ ॥श्री ॥ ॥ ७

नानिष्ठार्थेति द्वितीयस्येति व्यक्तिराश्रीयते न जातिः पाचाकृते द्विर्वचने द्वितीयव्यक्तिः सा कृते तस्मिन् द्वितीया न भवतीति विशेषात् द्वितीयद्विर्वचनेन प्रथमं द्विर्वचनं वाध्यते यथा वेति भवतु द्वितीयस्येति जातिनिर्देशस्तथापि सामान्यविहितस्य विशेषविहितमसत्यपि विरोधे वाधकं भवति यथाद्वौ यमित्यादावादेः परस्येत्यादेर्विधीयमानमपीत्वमं

= व्यक्तिरिति-व्यक्तिविशेषस्तदर्थः। न जातिरिति-व्यक्तिसामान्यमित्यर्थः। १८=

नानिष्टार्थो शास्त्रप्रवृत्तिर्भवितुमर्हतीति यथा वा दिविकारे ऽल्लोन्त्यविकाराभावः यथा वा आदिविधावलोन्त्यविधिर्न भवति एवं द्वितीयद्विर्वचनेप्रथमाद्विर्वचनं [redacted] न भविष्यति विषम उपन्यासः नाप्राप्ते ऽल्लोन्त्यविधाने आदिविधिरारभ्यते सतस्य वाधको भविष्यति इदमप्येवंजातीयकं नाप्राप्ते प्रथमद्विर्वचने [redacted] द्वितीयद्विर्वचनमारभ्यते तद्बाधकं भविष्यति यदप्युच्यते असति विरोधे संभवे बाधनं भवति अस्ति च संभवो य उभयं स्यात् नैतदस्ति सत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि दधिदानस्य संभवे तक्रदानं निवर्तकं भवति एवमिहापि सत्यपि संभवे प्रथमद्विर्वचनस्य द्वितीयद्विर्वचनेन बाधिष्यते तत्र पूर्वस्याचो निवृत्तौ व्यंजनस्यानिवृत्तिर्वैरूप्या अपरिदिषतीति।।

= अंगभावः। विरोधे बाध्यबाधकभावो दृष्टः। समानफलकत्वे बाधो नास्त्येवास्यादेः परस्य स्यसनयोर्द्विरामेदेन संस्कारजनताविशेषाभावे पिबकी संस्कारमात्रेणभयोः समानफलकत्वं दधिब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेत्यत्रौदनसंस्कारमात्रेण दधितक्रयोर्बाध्यबाधका

त्यस्य न भवत्येवमिहापि द्वितीयद्विर्वचनं विधीयमानं प्रथमस्य न भवति ननु चापर इसे का षष्ठ्यादेः परस्येत्यादिमलमनुसंहृतेति कुतो ऽलोन्त्यस्य प्रसंगः इह तु प्रथमस्य द्वितीयस्येति च षष्ठीद्वयसंभवादुभयोः प्रसंगः नैतदस्ति अपर सेकापि षष्ठीवचनद्वयप्रामाण्यादर्थं तावुपसंहियेत अपश्चाद्यंतयोरीत्वं भवतीति एकस्माद्वियहणकवाक्या

(द्वन्द्वस्य संस्कारक्रमनेकं प्रक्रियावाक्यमुपपद्यते।। ।। ।।श्री।। ।।

तेषामावे विधातुसंस्कार

भा०कै०६ यथैवाचो निवृत्तिरिति यथाभूतस्य प्रथमैकाचो द्विर्वचनं प्राप्तं तथाभूतस्य द्वितीयद्विर्वचनेन बाध्यमानस्य व्यंजनस्य च प्राप्तमिति व्यंजनानामपि द्विर्वचनबाधप्रसंग इत्यर्थः अ
८ भ्यासनात्पूर्वस्येति अप्राप्यनुमानं बाधोन हि प्रमाणेन प्राप्तं बाधितुं शक्यते प्रमाणत्वाविशेषात् तस्मादजादिधातुद्वितीयद्विर्वचनविषये प्रथमद्विर्वचनं न विहितं न प्रति
षिद्धं नटभार्यावच्च व्यंजनानि भवंतीति द्वितीयैकाजंतर्भाव्यानि दिदृक्ष्यंत इत्यर्थः न्यायसिद्धेर्थे लिंगदर्शनमाह न्द्राः द्विप्रतिषेधाच्चेति न्द्रा ष्यते आदयस्तेषां द्विर्व

=न प्रतिषिद्धमिति शब्दस्य प्रतिषेधे हि तथार्थं =एकाच इति बहुव्रीहिरिति भावः।३ =अप्राप्तौ नि·द्वितीयैकाज्ग्रहितजादिधातनिरिक्तविषयस्य मेकाचो रुद्रं निभावः।२
=किंतु न पिशकते ति भावः।

यथैवाचो निवृत्तिरेवं व्यंजनस्यापि प्राप्नोति तत्र पूर्वस्याचो निवृत्तौ व्यंजनस्यानिवृत्तिरभ्यासनात्पूर्वस्य तत्र पूर्वस्याचो निवृत्तौ व्यंजनस्यानिवृ
त्तिः सिद्धा कुतः अभ्यासनात्पूर्वस्य नेह वयं पूर्वस्य प्रतिषेधं शिष्मः किं तर्हि द्वितीयस्य द्विर्वचनमारभामहे व्यंजनानि पुनर्नटभार्याव
त् तद्यथा नराणां स्त्रियो रंगगता यो यः पृच्छति कस्येयमिति तं तं तव तवेत्याहुः एवं व्यंजनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजंते न्द्राः द्विप्र
तिषेधाच्च यदयं नन्द्राः संयोगादय इति प्रतिषेधं शास्ति तत् ज्ञापयत्याचार्यः पूर्वनिवृत्तौ व्यंजनस्यानिवृत्तिरिति तत्र द्वितीयाभावे प्रथमाद्विर्वचनं
प्रतिषिद्धत्वात् तत्र द्वितीयस्यैकाचो भावे प्रथमस्य द्विर्वचनं न प्राप्नोति आटतुः आटुः किं कारणं प्रतिषिद्धत्वात् अजादेर्द्वितीयस्येति प्रतिषेधात्॥

चनप्रतिषेधादस्मान्निद्वितीयेनाचा सह द्विरुच्यंते तत्र द्वितीयाभाव इति इहाजादेरिस्यजादेः सामान्यनिर्देशात्तत्र द्वितीयद्विर्वचनमारभ्यमाणं प्रथमद्विर्वचनस्य बाधकमि
ति यस्यामप्यजादिव्यक्तौ द्वितीयाभावात् द्वितीयद्विर्वचनाभावस्तस्यामपि प्रथमद्विर्वचनाप्रसंगः अरिरिषतीत्यादावजाद्यन्तौ विधीयमाने द्वितीयद्विर्वचनं मा भूदित्या राम०
ह्यवपि प्रथमद्विर्वचनं बाध्येतेत्यर्थः अप्राप्तेरेवात्र प्रतिषेधस्येन विवक्षिता॥ ॥ ॥ ॥ ८

सति तस्मिन्निति अजादेरिति व्यक्तिनिर्देशो न त्वाकृतिनिर्देशः अतो नायमपवादोऽजादिमात्रनिबंधनः द्वितीयस्यैकाचः संभवमभिसमीक्ष्य प्रवर्त्तते यत्रेदानीं द्वितीयो नास्ति तत्रानु
पजातनिमित्तोऽपवाद एव न प्रवर्त्तत इति प्रथमस्यैकाचो द्विर्वचनमुत्सर्गः प्रवर्त्तत एव तेन यस्यामेवाजादिव्यक्तौ द्वितीयद्विर्वचनं प्रवर्त्तते तस्यामेव प्रथमद्विर्वचनं बाध्यते नान्यस्या

नैष दोषः सति तस्मिन् प्रतिषेधः सति द्वितीयद्विर्वचने प्रथमस्य प्रतिषेधः सति तस्मिन् प्रतिषेध इति चेद्धलादिःशेषे दोषः सति तस्मिन् प्रतिषेध इति चेद्धलादिःशेषे
दोषो भवति हलादिःशेषे सत्याद्येहल्यनाद्यस्यालोपः स्यात् इहैव स्यात् पपाचेति इह न स्यात् आटतुः आटुरिति लोकवद्धलादिःशेषे लोकवद्धलादिःशेषेऽपि द्वं
तद्यथा लोके ईश्वर आज्ञापयति ग्रामात् ग्रामान्मनुष्या आनीयन्तां प्रागंगं ग्रामेभ्यो ब्राह्मणा आनीयन्तामिति येषु तत्र ग्रामेषु ब्राह्मणा न सन्ति न
तर्हीदानीं ततोऽन्यस्यानयनं भवति यथा तत्र क्वचिदपि ब्राह्मणस्य सत्ता सर्वत्र अब्राह्मणस्य निवृत्तिका भवति एवमिहापि क्वचिदपि हलाद्यः सन् सर्वस्या
नाद्यस्य हलो निवर्त्तको भवति क्वचिदन्यत्र लोप इति चेद् द्विर्वचनं क्वचिदन्यत्र लोप इति चेत् द्विर्वचनमप्येवं प्राप्नोति क्वचिदपि द्वितीयः सन् सर्वस्य प्रथमस्य निवर्त्त
कः स्यात् [redacted]

मित्यर्थः जात्युपलक्षिता व्यक्तिः प्राधान्येनाश्रीयते न तु जातिः तेन सर्वस्यामेवाजादिव्यक्तौ द्वितीयवत्यामिदं शास्त्रं प्रवर्त्तते व्यक्तिपदार्थाश्रयणे दोषमाह सति तस्मिन्निति लो
कवदिति तत्राकृतिः पदार्थ आश्रीयत इति भावः प्रागंगमिति यथा ग्रामाकृतेराश्रयणात् क्वचिदपि ग्रामे वर्त्तमानो ब्राह्मणो मनुष्यान्तरानयनं निवर्त्तयति तथाभ्यासजातेरा
श्रयणात् क्वचिदप्यभ्यासे वर्त्तमानो हलादिःशेषः सर्वत्रानादेर्हलो निवृत्तिं करोतीत्यर्थः ॥ ॥ ०.

भा०कै०६ तस्मादस्त्विति इह व्यक्तिपक्ष आश्रीयते हलादिः शेषे तु जातिपक्षो व्यक्तिपक्षेऽपि वा प्रतिविधास्यते हलन्त्याः सो भवति तत आदिः शेष इति नन्द्राः किमर्थमिति पूर्वस्याचो

१८ व्यंजनानीति पूर्वपक्षो न टमायां व्यंजनानीत्युत्तरः पक्षः पूर्वोऽभ्यासः कस्य पूर्व इति अवधावधिमत्संबंधे दिग्योगलक्षणा पंचमी भवति यथा ग्रामात्पूर्वः इह त्ववयवा

=न हल्त्वत्रता द्वयोरभ्यासो भवतीति सामान्येनाभ्यासत्वं निवृत्तिः आदिः शेषः ... किमर्थ ... २=

तस्मादस्तु सति तस्मिन्प्रतिषेध इत्येव ननु चोक्तं सति तस्मिन्प्रतिषेध इति चेन्न हलादिः शेषे दोष इति॥ प्रतिविधास्यते हलादिः शेषे नन्द्राः किम
र्थमिदमुच्यते न्द्रादेर्द्विर्वचनप्रसंगस्तत्र न्द्राणां प्रतिषेधः न्द्रादेरेकाचो द्विर्वचनं प्राप्नोति तत्र न्द्राणां संयोगादीनां प्रतिषेध उच्यते ईर्ष्यतेस्तृ
तीयस्य द्वे भवतः ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यं केचिदाहुः एकाचः ईर्ष्यिषिषति अपर आह व्यंजनस्येति ईर्ष्यियिषति कंड्वादीनां च तृ
तीयस्य द्वे भवत इति वक्तव्यं कंडूयियिषति असूयियिषति वा नामधातूनां तृतीयस्य द्वे भवत इति वक्तव्यं अश्वीयियिषति अशिश्वी
यिषति अपर आह यथेष्टं वा यथेष्टं वा नामधातूनामिति पुपुत्रीयिषति पुतित्रीयिषति पुत्रीयियिषति पूर्वोऽभ्यासः पूर्वोऽभ्यास इत्युच्यते
कस्य पूर्वोऽभ्यासः संज्ञो भवति द्वे इति वर्तते द्वयोरिति वक्तव्यं सतर्हि तथा निर्देशः कर्तव्यः न कर्तव्यः अर्थाद्विभक्तिविपरिणामो भविष्यति
तद्यथा उच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति गम्यते देवदत्तस्य गावो अश्वा हिरण्यं आढ्यो वैधवेयः देवदत्त इति गम्यते पुरस्तात्
षष्ठीनिर्दिष्टस्य सदर्थात्प्रथमानिर्दिष्टा द्वितीयानिर्दिष्टं च भवति एवमिहापि पुरस्तात्प्रथमानिर्दिष्टस्य सदर्थात् षष्ठीनिर्दिष्टं भविष्यति॥ ॥

वयविसंबंधो विवक्षितः कस्य पूर्वोवयव इति पंचम्यभावो यथा पूर्वकायस्येति विभक्तिविपरिणाम इति पूर्वविभक्तिस्त्यागेन सामर्थ्याद्विभक्त्यंतरस्योह इत्यर्थः एम० १

॥७॥ ॥८॥ ॥८॥ ॥

॥ श्री॥

उभे सहग्रहणमिति सहभूतयोः परस्परापेक्षयोरेकाम्यस्तसंज्ञा यथा स्यादित्येवमर्थं सहेति वक्तव्यं आद्युदात्तत्वइति यस्मादुदात्तत्वे क्रियमाणे उदात्तस्वरितविधान
मर्थं क्रमापद्यते सवर्ज्यं इति व्याख्याने प्रधानवाचिन्येकशब्दे योगपद्यप्रसंगः एकवर्जमिति संख्यावचने तु विरोधाद्यौगपद्यासंभवात्पर्यायप्रसंगः उभेग्रहणमि

=अथनिर्दिष्टसार्वधातुकेपरतोऽभ्यस्तानामादिरित्यस्यविधानादितिभावः।२= =प्रधानं उदात्तस्वरितोद्दिष्टं वर्जमित्याशिष्टमनुदात्तमितिसूत्रार्थः।१= =ननुदात्तं परमेकवर्जमितिवचनात्कथं द्वयोरुदात्तत्वमत आह॰ यस्मेति॰२= =ह॰।

उभेऽभ्यस्तं अभ्यस्तसंज्ञायां सहग्रहणं उभे अभ्यस्तं सहेति वक्तव्यं किंप्रयोजनं आद्युदात्तत्वे पृथगप्रसंगार्थं आद्युदात्तत्वं सहभूतयोर्यथा स्यात्
एकैकस्य माभूदिति यस्मिन्न्येवाभ्यस्तकार्ये दोषस्तदेवं पठितं अनुदात्तं पदमेकवर्जमिति नास्ति यौगपद्येन संभवः पर्यायस्तर्हि प्रसज्येत [redacted]
[redacted] पर्यायश्च पूर्वस्य तावत् परेण रूपेण व्यवहितत्वान्न भविष्यति परस्य तर्हि स्यात् तत्राचार्यप्रवृत्तिर्ज्ञापयति न परस्य भवतीति यदयं विभेसादीनां
पितिप्रत्यये आद्युदात्तं भवतीत्याह एवं व्यवधानान्न पूर्वस्य ज्ञापकान्न परस्य उच्यते चेदमभ्यस्तानामादिरुदात्तो भवतीति तत्र स एव दोषः पर्यायः
प्रसज्येत तस्मात्सहग्रहणं कर्त्तव्यं न कर्त्तव्यं उभेग्रहणं क्रियते न च सहार्थे विज्ञास्यते अस्त्वन्यदुभेग्रहणे प्रयोजनं किं उभेग्रहणं संज्ञिनिर्दे
शार्थं अन्तरेणाप्युभेग्रहणं प्रकृतः संज्ञिनिर्देशः कथं द्वे इति वर्त्तते इदं तर्हि प्रयोजनं यत्रोभे शब्दरूपे श्रूयेते तत्राभ्यस्तसंज्ञा यथा स्यात् इह

=अविद्यमानोदात्तेलसार्वधातुके परे अभ्यस्तानामादिरुदात्तः सर्वकेनानुदात्तेचसत्येनेवासिद्धिरितिभावः।एवमेकैकस्यापर्यायत्वेदूषितेतंसमर्थयितुमाह॰ एवमित्यादि॰ ... ॥ माभूत॥ ... ॥ ॥

ति सहभावोपसर्जनं न द्वित्वमुभशब्दस्यार्थ इति भावः द्वे इत्यत्र सहभावाद्विरुक्तस्याभ्यस्तसंज्ञायां लब्धायामुभेग्रहणं सहभूतयोरेकाभ्यस्तसंज्ञार्थं॥ श्री

=उक्तार्थमात्रमाह॰ द्वेइतीति॰१= ॥ श्री॥ ॥ श्री॥ ॥ ॥

भा०कौ०६ ईर्त्सतीति कृते द्विर्वचने ऽकृत एवाभ्यासलोपे ऽन्तरंगत्वादुभयोः प्रत्येकं प्रवृत्ताभ्यस्तसंज्ञा कृतेभ्यासलोपे परस्यननिवृत्तैतदुभेग्रहणेन तु निरस्यत इति भावः ऋध

१० आपम्भुस न्सनीवंतर्द्धैतीऽभावपक्षे द्विर्वचनात्सरत्वात्प्रतिपदविधेर्बलवत्त्वाद्दाप्तृत्तृधामीदित्वीत्वेरपरत्वं चुनन्द्राः संयोगादय इति रेफस्य द्विर्वचनप्रतिषेधः र्द्वे

त्रासिद्धीयमद्विर्वचनइतिवचनात्धकारस्य चर्त्वे तकारे कृतेत्स इत्यस्य द्विर्वचनमन्ये त्वाहुः अभ्यासलोपसंनियोगेनेत्वमुच्यमानं प्रतीक्ष्यत इति प्राक् द्विर्वचनं त

च्चयद्यपूर्वत्रासिद्धीयमद्विर्वचन इत्येतदुभौ साभ्यासस्येति सूत्रारंभादनित्यत्वान्नाश्रीयतेन दाधुस इत्यस्य तदाश्रयणे तु स इत्यस्य नत ईत्वाभ्यासलोपौ ईर्त्स

इतिस्थिते लट्स्ति अट्भावस्त्व प्राप्नोति शप्त्व कृताकृतप्रसंगित्वान्नित्यत्वाच्छ अङ्गावस्तु शपि कृते तेन व्यवधानान्न प्राप्नोतीति नित्यः ततोऽन्तोंत इत्यंतादेशस्त्व मा

नं द्विर्वच२

ईर्त्सतिरीप्सतीति ईर्त्सेनईप्सन ऐर्त्सन किंचस्यात् अङ्गावोनुम्प्रतिषेधोजुस्भाव इत्येतेविधयः प्रसज्येरन् अङ्गावेतावन्न दोषः स प्रत्यमे

योगविभागः करिष्यते इदमस्तस्दभ्यस्तादिति ततआत्मनेपदेषु आत्मनेपदेषु चाद्भवति अनत इत्युभयोः शेषः यदप्युच्यते नुम्प्रति

=अयमयम्भावे लमादिकमप्रति=
=बाधात्वविधौ स्यामितातमरत्नेऽश्च= षेधइति एकादेशे कृतेऽवयवपवर्गाभावान्नभविष्यति इदमिह संप्रधार्यं नुम्प्रतिषेधः क्रियतां एकादेश इति किमत्र कर्तव्यं परत्वान्नुम्प्रतिषेधः

नित्य एकादेशः कृतेऽपि नुम्प्रतिषेधे प्राप्नोत्यकृतेपि एकादेशो प्युनित्यः अन्यस्य कृते नुम्प्रतिषेधेप्राप्नोति॥ ॥ ॥

=यद्यपीत्यादिः।१= =तथापि इतिशेषः।२=

=अथवेति एकादेशस्त्वपदांतत्वविशिष्टं पूर्वमकारं गुणसंज्ञकमुत्तरं चापेक्षत इति भावः।२=

प्नोति शप एकादेशस्तु तत्रवर्णाश्रयत्वादंतरंगत्वादेकादेशस्ततोऽङ्गावः प्राप्नोति अथवा शप्यः प्रागेवपरत्वादम्भावः प्राप्नोतिसोपिहिनित्यः शप एकादे

शेकृतेंतङ्गावा तस्य प्रसंगात् ईर्त्सन्निति शतरि कृते शप् च प्राप्नोति एकादेशस्त्व तत्र वर्णाश्रयत्वादंतरंगत्वादेकादेशे कृते धातुसार्वधातुकयोर्व्यपवर्गाभावाच्छपो प्रा॰प्निः

तत्रसार्वधातुकमात्रापेक्षत्वाच्छवेवांतरंगत्वात्पूर्वं भवति तेत्रु शद् परविप्रतिषेधास्परयोरकारयोः पूर्वमेकादेशः ततः पूर्वैरोतिप्रक्रियाश्रयः सिद्धांतो भविष्यति राम०

पूर्वयोरकारयोरेकादेशे कृते नुम्प्रतिषेधप्रसंगस्त्वोद्यते ऐर्त्सन्निति ईर्त्सलङ् झिप् शप् अवकारयोः पररूप एकादेशे कृते तस्यां तवङ्गावाजुस्प्राप्नोति॥ ॥ ॥ १०

=पूर्वपक्षसिद्धं तयाराश्रयं स्याद्यति तेच्च ति अयं भावः ईर्त्स अ अत् इति स्थिते एकादेशद्वयं प्राप्नोति नुम्प्रतिषेधश्च तत्र प्रथमैकादेशांतरंगोपदि [illegible] पूर्वैपत्रेत्र [illegible] बाधितप्रतिषेधः स्यात् न त्वसावंतरंगः अंगांतर्गतनिमित्तत्वस्य प्रतिषेधेपितुल्यत्वात् तस्माच्च ए=

=परविप्रतिषेधासरैकादेशः तदानुम्प्रतिषेधः प्राप्नोतं तदंतरंगत्वात्प्रथमैकादेशेन बाध्यते नास्मिंस्तु व्यपवर्गाभावान्न भवतीति भाष्यकारस्तुकृतविप्रयमेकादेशेनुम्प्रसंगप्रतिषेधात्तस्यापिसर्वदानस्यानापेक्षत्वाद्वहिरंगत्वादंतरंगोहितीकादेशेकृते व्यपवर्गाभावान्न भवतीति सप्रतिवदतीति॥२=

सात

=वस्तुतोयस्मादिहितसंस्थावयवद्व्यतिसिद्धंतः। इत्येवध्वनयन्नेकादेशस्यानित्यत्वमुक्त्वाप्युपसंहारे नित्यत्वामंतरंगत्वादित्याप्यकत्पस्यनि॰ ९=

अन्यस्याकृतइतिमितिः पूर्वेमन्यत्वानुमिकृतेशब्दांतरत्वंनिमित्तत्वानितिअंतादेशोकृते एकादेशे चव्यपवर्गाभावाच्चुसोऽप्रसंगः पूर्वेहीति। उत्सर्गाणांविषयांतरस्यापिसंभवा

=ननुतुम्प्रतिषेधेकृतेऽकृतेचद्वयोरकारयोरेवपररूपमितिकथमनित्यत्वमतआह॰ मितइति॰ तत्राकृतेनवयवस्याकारस्यपररूपंनिमित्तंकृतेतुपदागमादिमात्रेणावयवस्येतिभावः। ९=एकादेशमिति॰ सनकारस्याकारयोरिति सर्वः। ४=

अन्यस्याकृतेशब्दांतरस्यचप्राप्नुवन्विधिरनित्योभवति अंतरंगस्तर्ह्येकादेशः काअंतरंगता वर्णाश्रित्वैकादेशः विधिविषयेतुप्रतिषेधः विधिश्चनुमः सर्वनामस्था
नेप्राकृतुसर्वनामस्थानोत्पत्तेरेकादेशस्तत्रनित्यत्वाच्चांतरंगत्वाच्चैकादेशः एकादेशेकृतेव्यपवर्गाभावान्नुम्प्रतिषेधोनभविष्यति यदप्युच्यतेजुसभावइति एकादेशेकृते
व्यपवर्गाभावान्नभविष्यति एकादेशइत्युच्यते केनचात्रैकादेशः अंतिना नातांतिभावः प्राप्नोति किंकारणं जुसभावेनबाध्यते नात्रजुसभावः प्राप्नोति किंकारणंअप्रा
प्यंव्यवहितत्वात् एकादेशेकृतेनास्तिव्यवधानं [redacted] किंपुनः कारणंनिमित्तवानंतिरेकादेशंतावत्प्रतीक्षते नपुनस्तावत्सेव
निमित्तमस्तीसंतिभावेनभवितव्यं इहापितर्हितावत्सेवनिमित्तमस्तीसंतिभावः स्यात् अनेनिजुः पर्ययेवेविषुः अस्तकंअतिभावेकृतेस्थानिवद्भावात्क्रियग्रहणेनग्रहणाज्जुस
भावोभविष्यति अथवायद्यपिनिमित्तवानंतिरयंतस्यजुसभावोपवादविषयेउत्सर्गोभिनिविशतेपूर्वंह्यपवादाअभिनिविशंतेपश्चाउत्सर्गाः प्रकल्प्यवापवादविषय
मुत्सर्गः प्रवर्ततेतेनतावदत्रनकदाचिदयंतिभावोभवति अपवादंजुसभावंप्रतीक्षते नखल्वपिकश्चिदन्यस्तानांस्थानंतरंयस्तवेत्रविकरणोव्यवधानं तेनानेनावश्यंवि
करणानाशः प्रतीक्ष्यः क्वचिल्लुकाक्वचित्श्लुनाक्वचिदेकादेशेनसयपरेवश्लुलुकोप्रतीक्ष्यतेतथैकादेशमपि एवंतर्हीदमिहव्यपदेश्यंसत् आचार्योनव्यपदिशति किंस्था
निवद्भावंस्थानिवद्भावात्व्यवधानं व्यवधानान्नभविष्यति पूर्वविधौस्थानिवद्भावः नचायंपूर्वस्यविधिः पूर्वस्मादपिविधिः पूर्वविधिः तदेतदसतिप्रयोजनेउभयग्रहणं
सहार्थंविज्ञास्यते कथंचैकैकस्माच्च्यस्तसंज्ञाप्राप्नोति प्रत्येकंवाक्यपरिसमाप्तिर्दृष्टेतितद्यथा प्रत्येकंवृद्धिगुणसंज्ञेभवतः ननुचायमप्यस्तिदृष्टांतः समुदायेवाक्यपरि

=उभयग्रहणमपिनक॰ ९=र्थमितिवक्तुमुपन्यस्यति॰ कथंचेति॰ ९=

त अपवादविवर्जितेविषयेप्रवर्तन्योप्यत्वात् प्रकल्प्यवेति यथानसंप्रसारणेसंप्रसारणमितिवचनात्परस्ययणः पूर्वसंप्रसारणंप्रवर्ततेपूर्वस्यतुतन्निमित्तप्रतिषेधः यदितुपरस्य
१यणः पूर्वेनप्रवर्ततेतदापूर्वस्यापिप्रतिषेधोनस्यात्॥ ॥ ॥ ॥

जक्षित्यादयः ॥ जक्षितिदरिद्रितिषांते जक्षित्यादयइत्याश्रित्याह जक्षित्यादिष्विति वेव्यत इति अभ्यस्तानामादिरित्युदात्तत्वं भवति अन्यथा धातुस्वरेङित्वा
त्सार्वधातुकानुदात्तत्वे स्वरितयोर्यण इति स्वरितत्वं प्रसज्येत आङः शास्विति वेवीङो नंतरमयं जक्षिः सद्यते इति भावः भूयिष्ठानीति बहुतराणीत्यर्थः घसिवशी

त्वेयणादेशेचकृतेउदात्त

=एतेन तदर्थं उभयग्रहणमपि न कर्तव्यमिति सूचितं नाप्रसाम्यात् ॥२=

तद्यथा गर्गाः शतं दंड्यंतामिति अर्थिनश्च राजानो हिरण्येन भवंति न च प्रत्येकं दंडयंति सत्येतस्मिन् दृष्टांते तत्र यदि प्रत्येकमित्युच्यते इहा
पि सहग्रहणं कर्तव्यं अथ तत्रांतरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः इहापि नार्थः सहग्रहणेन जक्षित्यादयः षट् जक्षित्यादिषु
सप्तग्रहणं वेवीत्यर्थं जक्षित्यादिषु सप्तग्रहणं कर्तव्यं सप्त जक्षित्यादयो भ्यस्तसंज्ञका भवंति इति वक्तव्यं किं प्रयोजनं वेवीत्यर्थं वेवीते रभ्यस्त
संज्ञा यथा स्यात् वेव्यते अभ्यस्तानामादिरित्याद्युदात्तत्वं भवति अपरिगणनं वा गणांतत्वात् न वार्थः परिगणनेन अपठित्वा गणांतमभ्यस्तसं
ज्ञा इहापि तर्हि प्राप्नोति आङः शासु इच्छायां अभ्यस्तकार्याणि कस्मान्न भवंति भूयिष्ठानि परस्मैपदेषु आत्मनेपदी चायं स्वरस्तर्हि प्राप्नोति य
द्याप्यस्यात्मनेपदेष्वभ्यस्तकार्यं स्वरः तत्राप्यस्यानुदात्तेतः परं लसार्वधातुकमनुदात्तं भवतीति अनुदात्तत्वे कृते नास्ति विशेषः धातुस्वरेणोदात्त
त्वे सत्यभ्यस्तस्वरेण वा घसिवशी छांदसौ दृष्टानुविधिश्छंदसि भवति चर्करीतमभ्यस्तमेव हुङ् तर्हि प्राप्नोति अपठित्वा अभ्यस्तकार्याणि कस्मा
पदे२ ॥ न्न भवंति भूयिष्ठानि परस्मैपदेषु आत्मनेपदी चायं स्वरस्तर्हि प्राप्नोति ॥ ॥

=एतेन अयायस्येनात्र सुखं किदेवा इत्यादयः प्रयोगाः प्रयुक्ताः ॥२=

इति षसशास्तिस्वप्ने इति येन पठंति केवलं षसस्वप्ने व शकांताविति तन्मतेनैतदुक्तं अन्ये त्वाहुः शासशितपानिर्देशः कृतोर्थभेदाज्जद्भिः पठितः अन्ये तु षसस्व राम०
प्न इति न पठंति कश्मीरभाषायां वार्त्तिककारमतेन प्रयोगं साधुः चर्करीतमिति यङ्लुगंतस्य पूर्वाचार्यसंज्ञा ॥ ॥श्री॥ ॥२॥ ॥ ११

=अयं मैत्रेयादिसंमतः पाठः। षससस्तीसन्येषां पाठः ॥२=

अन्हिङ्गोरीति यदि नु ङोऽभ्यस्तसंज्ञा स्यात् नुक्‌घाते नुकृत इत्यादौ हुतेऽभ्यस्तस्वरे लसार्वधातुकस्य भवितव्यमेव निघातेनेति प्रतिषेधोऽनर्थकः स्यात् तस्मात्प्रतिषेधसामर्थ्या
न्नैतस्य स्वर एव भवति नाभ्यस्तस्वरः नन्वसति प्रयोजने ज्ञापकं अस्ति च प्रतिषेधस्य प्रयोजनं नुते नुषइत्यादावनुदात्तत्वं मा भूत् प्रत्ययस्वर एव यथा स्यात् अत्र ह्यभ्यस्तानामा

कर्तव्यं २

अन्हिङ्गोरीति प्रतिषेधविधानसामर्थ्यात्स्वरो न भविष्यति अथवा सप्तैवेमे धातवः पठ्यन्ते जक्ष् अभ्यस्तसंज्ञो भवति इत्यादयः अथ षट् जक्षित्यादयः षडिति
तुजादीनां तुजादिषु छन्दः प्रत्ययग्रहणं तुजादिषु छन्दः प्रत्ययग्रहणं छन्दसि तुजादीनां दीर्घो भवतीति वक्तव्यं प्रत्ययग्रहणं च कर्तव्यं असिंष्वा सिंष्व प्रत्यय
इति वक्तव्यं इह मा भूत् तुतोज शवलान् हरीन् अनारंभो वा परिगणितत्वात् अनारंभो वा छन्दसि दीर्घत्वस्यान्याप्यः कुतः अपरिगणितत्वात् नहि छन्दसि दीर्घस्य
परिगणनं कर्तुं शक्यं किं कारणं अन्येषां च दर्शनात् येषामपि दीर्घत्वं नारभ्यते तेषामपि छन्दसि दीर्घत्वं दृश्यते तद्यथा पूरुषो नारक इति अनेकान्तत्वाच्च ये
षां चाप्यारभ्यते तेषामप्यनेकान्तः यस्मिन्नेव च प्रत्यये दीर्घत्वं दृश्यते तस्मिन्नेव च न दृश्यते मामहान उक्थपात्रं ममहान इति॥ ॥ ॥

दिरिति न प्रवर्तते अजादौ तस्य विधानात् तत्रासति प्रतिषेधे अनुदात्ते चेत्याद्युदात्तं पदं स्यात् सति तु प्रतिषेधे नोदात्तं भवतीति ज्ञापकत्वं नोपपद्यते एवं तर्ह्यभ्यस्तानामादिरि
त्यत्रान्हिङोरित्यनुवर्त्य प्रतिषेधवचनसामर्थ्यादित्ययमर्थोऽभिप्रेतः अथवेति नायं श्तिपा निर्देशः किं तर्हि जक्षितिश्च यकारमित्यादयः इत्यत्र इति शब्दे न जक्षिः परामृश्यते आदि
१ शब्दश्च समीपवाची तेन तत्समीपाः षडभ्यस्तसंज्ञा इति सप्तानामेवाभ्यस्तसंज्ञा सूत्रेण संगृहीतेत्यर्थः॥ ॥ ॥

लिटि धातोः अभ्यासप्रतिषेधानर्थक्यमिति जुगुप्सिषते लोलूयिषत इत्यादौ सकृत्प्रसक्तस्य सालक्षणस्य चरितार्थत्वात्पुनः प्रसङ्गाभावादुक्तार्थोऽभ्यासप्रतिषेधो नकर्तव्यः चङ्सेतदर्थं स्मृत्कर्तव्योपदास न्यङ्. तास्मिंश्चि कृते चङ्. भवति अजुगुप्सत लोलूयदिति तत्र द्विर्वचनं माभूदिति चिंत्यमेतत् सन्यङोः किमियं षष्ठीति वि

=ईहांचक्र इति आमन्तो न धातुरिति रितिभावः। १=विष्टिति विभाषित इति ...लिटि सार्वधातुकत्वाभावः ... तत्र विकरणान्तत्वात् ... लिट्परत्वे न तु ... रिति मतीयप्रथमैकाचो द्वित्वमिति भावः। २=तस्येत्यस्य ... =
=द्वित्वाभावेन अनभ्यासस्येति किमर्थमिति=२

लिटि धातोः धातोरिति किमर्थं ईहांचक्रे नैतदस्ति लिटीत्युच्यते नचात्र लिटं पश्यामः प्रसयलक्षणेन न लुमताङ्गस्येति प्रसयलक्ष
णप्रतिषेधः इदं तर्हि सस्रवांसो विशृण्विरे लिङ्द्विर्वचने जागर्त्तेर्तिवक्तव्यं योजागार तमृचः कामयन्ते योजागार तमृचः कामयन्ते अनभ्या

=यङ्लुनाङ्किलिटिलक्षणमरण=
=प्राप्तमभ्यासद्वित्वकार्यमिति=३=

सस्येति किं कस्मो नोनाव वृषभो यदीदं नोनूयते नोनाव अभ्यासप्रतिषेधानर्थक्यं च छन्दसि वावचनात् अभ्यासप्रतिषेधो नर्थकः किंका
रणं छन्दसि वावचनात् अवश्यं छन्दसि वा द्वे भवत इति वक्तव्यं किं प्रयोजनं प्रयोजनमादित्सान्याचिषामहे पियाचिषामहइति प्राप्ते देवत्रातो
हाति प्रियाणि ददाति प्रियाणि मघवादातु मघवाददातु सनस्तनोवीरवद्धातु वीरवद्दधातु यावतेदानीं छन्दसि वा द्वे भवत इत्युच्यते धा

=तदेतदिति धातुग्रहणाभावे लिटीत्यादि=
=धर्मैकाचश्चविशेषणं स्यात्तथा च ...=
=...जागारसादितस्स=
=लिट्परत्वाभावादिति भावः। ३=

तुग्रहणेनापि नार्थः कस्मान्न भवति सस्रवांसो विशृण्विर इति छन्दसि वावचनात् तदेतद्धातुग्रहणं सांन्यासिकं तिष्ठतु तावत् सन्य
ङोः किमियं षष्ठी आहोस्वित्सप्तमी कुतः संदेहः समानो निर्देशः किंचातः यदि षष्ठी सन्यङ्. तस्य द्विर्वचनेन भवितव्यं अथ स[redacted]
१ मीसन्यङोः परतः पूर्वस्य द्विर्वचनेन भवितव्यं ॥ ॥ ॥ ॥

=विभक्तिविचारस्य प्रकृतानुपयोगमाशङ्क्य नत्वर्थ इति। १=

भक्तिविचारद्वारेण तदर्थो विचार्यते किं चात इति अर्थभेदप्रश्नः सन्यङ्. तस्येति प्रसयग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्येति षष्ठीपक्षेतरं न विधिः सप्त ॥ गाम० १२
मीपक्षे तु तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धातोरित्यधिकाराच्च पूर्वस्य धातोः कार्यभाक्त्वे ॥ गश्री ॥ ॥

=द्विर्वचननिमित्तत्वमिति· सन्यङोरित्यस्य षष्ठीत्वात् सन्यङं तस्य द्वित्वप्राप्तिमात्रेण तस्य निमित्तत्वं कार्यित्वं =द्विर्वचनेचीत्यनेन·१= तत्त्वाभ्योगादितिभावः।२=यद्यपीति· यदितुरूपस्यानिवद्भावेन स्यात्स्थानिवद्देवो द्विर्वचनमिति तस्य कार्यित्वेन निमित्तत्वं तस्यादितिभावः।१=
तं तस्मात्कार्यमनुभवतो

कस्मान्न विशेष इति लक्ष्यगतविशेषप्रश्नः हन्तेर्यङ्लुगन्ताद्घ्नत इति गमहनेत्युपधालोपस्य स्थानिवद्भावादृन एव द्विर्वचनप्रसंगः यस्यापीति सतितस्मिन्कार्यभावादस्यैव निमित्तत्वमिति भावः यद्यपि रूपस्थानिवद्भावादीटो न भवति द्विर्वचनं तथापि प्राप्तिमात्राश्रयेण द्विर्वचननिमित्तत्वमीकारस्योच्यते अनुदात्तविशेषणं चेदिति यदाऽनूभयविशेषणं तदा न दोषः उपदेश एकाच्त्वात्स

=सन्नन्तस्य पक्षे इति यङ्लुगन्तम्· २=प्राप्तिमात्रेति· यदि स्थानिवत्त्वं तस्यात्स्यादेव तेषो द्विर्वचननिमित्तत्वमिति कार्यत्वं प्राप्तिमात्राश्रयेणेत्यर्थः।२ =तस्याप्यभावितमात्रेण निमित्तत्वमितिभावः।२=यद्यपीति· एवं चेत्कारस्य द्वित्वनिमित्तत्वाभावात्स्थानिवत्त्वं दुर्लभमितिभावः।२=

कस्मान्न विशेषः सन्यङोः परत इति चेत्तर्हीटो द्विर्वचनं पाणिनीयत्वात्सन्यङोः परत इति चेत्तर्हीटो द्विर्वचनं कर्त्तव्यं अटिटिषति अशिशिषति किं पुनः कारणं न सिद्ध्यति पाणिनीयत्वात् इट् परादिः हन्तेर्घ्नटो द्विर्वचनं कर्त्तव्यं जेघ्नीयते ननु च यस्यापि सन्यङं तस्य द्विर्वचनं तस्यापि स्थानिवद्भावप्रसंगः ईटि स्थानिवद्भावादीटो द्विर्वचनं न प्राप्नोति· नैष दोषः द्विर्वचननिमित्ते स्थानिवदित्युच्यते न चासौ द्विर्वचननिमित्तं यस्मिन्नपि द्विर्वचनं यस्यापि द्विर्वचनं सर्वोऽसौ द्विर्वचननिमित्तं तस्मादीटो द्विर्वचनं तस्मादुभाभ्यामेव ईटो द्विर्वचनं कर्त्तव्यं यस्त्वोभयोर्दोषो न तमेकस्त्वो घोषो भवति एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सनइट्प्रतिषेधः एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सनइट्प्रतिषेधो वृक्तव्यः बिभित्सति चिच्छित्सति द्विर्वचने कृते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति अस्तु तर्हि सन्यङं तस्य सन्यङं तस्येति चेद्गशोः सन्यनिटः सन्यङं तस्येति चेद्गशोः सन्यनिटो द्विर्वचनं वक्तव्यं इयक्षमाणम्भृगुभिः सजोषाः यस्यापि सन्यङोः परतो द्विर्वचनं तेनाप्यत्रावश्यमिड्भावे यत्नः कर्त्तव्यः अशो हि प्रति परमिद्विधीयते स्मिपूङ्रंज्वशांसनीति॥ ॥

[redacted]

न्नं तस्यापि द्विः प्रयोगे द्विर्वचने दोष एव स्थाने द्विर्वचने प्रकृतिप्रत्ययसंप्रमुग्धत्वादिटः प्राप्तिरेव नास्तीति दोषः इयक्षमाण इति अश्नोतेः सनां स्मिपूङ्रंज्वशांसनीति प्राप्त इट् छान्दसत्वान्न भवति द्विर्वचनं हलादिःशेषः सन्यत इतीत्वं सस्यास्य सवर्णे इतीयङ्· एलकलपलानिपूर्ववत्सन इत्यात्मनेपदं शानच् अचिक्षमाण इति तु षष्ठीपक्षे प्राप्नोति॥ ॥

=षष्ठीपक्षे विशेषणं स्यात्सन्नन्तस्यापीति·२=

भा०कै०६ तेनैवेति यथाछांदसत्वाद्गुणनभवत्येवंद्वितीयद्विर्वचनमपि तदभावात्प्रथमद्विर्वचनं वर्णलोप इति पियक्षमाणा इतिप्राप्ते यकारस्यलोपः उपेयप्रापसर्थत्वादु
१३ पायानांधातूनांचानेकार्थत्वान्नियमस्यादर्शनाद्वाः दीर्घकुत्वेति यस्माद्विर्वचनाद्यधिकमुपजायते तस्माद्दीर्घत्वादीनि नसिध्यंति समुदायादेशत्वात्संप्रमु

तेनैवद्वितीयद्विर्वचनमपिनभविष्यति॰१

अथवानैतद्दशरूपं यजेरेषछांदसोवर्णलोपः तद्यथा तुभ्येदमग्ने तुभ्यमिदमग्नइतिप्राप्ते आम्वानांचरंनाम्वानांचरूमितिप्राप्ते आव्या
धिनीरुगणाःसुगणा इतिप्राप्ते इष्कर्तारमध्वरस्य निष्कर्तारमध्वरस्येतिप्राप्ते शिवाउद्रस्यभेषजी शिवारुद्रस्यभेषजीतिप्राप्ते अथवैवं
गम्यते कः पुनरस्यार्थः अश्नोतिर्व्याप्तिकर्मा एवंतर्हियजिरप्यश्यर्थेवर्तते कथंपुनरन्योनामान्यस्यार्थेवर्तते बह्वर्थाअपिधातवो
भवंतितद्यथा वपिः प्रकिरणेदृष्टः छेदनेपिवर्तते केशान्वपति ईडिः स्तुतिचोदनायाञ्चास्वदृष्टः ईरणेचापिवर्तते अग्निर्वाइतोव
ष्टिमीट्टेमरुतोमुतश्च्यावयंतिकरोतिरयमभूतप्रादुर्भावेदृष्टः निर्मलीकरणेचापिवर्तते पृष्ठंकुरुपादौकुरुउन्मृदानेतिगम्यते निक्षेप
णेचापिदृश्यते कटेकुरुघटेकुरु अश्मानमितःकुरुस्थापयेतिगम्यते एवंतर्हिदीर्घकुत्वसंप्रसारणषत्वमधिकस्यद्विर्वचनात् दीर्घ
त्वंद्विर्वचनाधिकस्यनसिध्यति चिचीषति तुष्टूषति समुदायस्यसमुदायआदेशः तत्रसंप्रमुग्धत्वात्प्रकृतिप्रत्ययस्यनष्टःसन्भवति
१ तत्राज्झंतानोसनीतिदीर्घत्वंनप्राप्नोति॥ ॥ ॥ ॥

ग्धत्वात् यदातुसन्प्रत्ययःपरतोद्विर्वचनंतदाप्रत्ययसंमोहाभावाद्दीर्घत्वादीनिसिध्यंति द्विर्वचनेनप्राप्तांतरेणादेशोनाधिकत्वाद्दीर्घाद्यप्रसिद्धिःस्थानेद्विर्वचनेचा राम०
पंदोषोनतुद्धिःप्रयोगे तत्रप्रकृतिप्रत्ययसंमोहाभावात् सर्वेपूर्वपदादेशाद्द्वाश्रयेण संप्रमोहः प्रागेवदीर्घत्वंभविष्यति [redacted] ॥ १३

ततो द्विर्वचनमिति मत्वाह इदमिहेति नित्यं द्विर्वचनमिति = प्राकृतिपक्षे शाङ्गान्तरप्राप्त्यभावात् अनित्यमिति व्यक्तिपक्ष इति [भावः।] जुहूषतीति ह्वातुमिच्छतीति सन् अत्राकृते द्विर्वचने ऽ

इदमिह संप्रधार्यं दीर्घत्वं क्रियतां द्विर्वचनमिति किमत्र कर्तव्यं परत्वाद्दीर्घत्वं नित्यं द्विर्वचनं कृतेऽपि दीर्घत्वे प्राप्नोति अकृतेऽपि प्राप्नोति दीर्घत्वमपि नित्यं कृ
तेऽपि द्विर्वचने प्राप्नोत्यकृतेऽपि प्राप्नोति अनित्यं दीर्घत्वं न हि कृते द्विर्वचने प्राप्नोति किं कारणं समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्य
यस्यानन्तानास्तीति दीर्घत्वं न प्राप्नोति द्विर्वचनमप्यनित्यं अन्यस्य कृते दीर्घत्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति उभयोरनि
त्ययोः परत्वाद्दीर्घत्वं यत्र हि नाकृते द्विर्वचने दीर्घत्वं तन्न सिध्यति जुहूषति कुत्वं द्विर्वचनाधिकस्य न सिध्यति जिघांसति जंघन्यते किं कारणं समुदाय
स्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ह्रो हन्तिर्भवति तत्राभ्यासाङ्गं न हकारस्येति कुत्वं न प्राप्नोति संप्रसारणं च द्विर्वचनाधिकस्य न सिध्यति
जुहूषति जोहूयते समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ह्वो हूयतिर्भवति तत्र ह्वोऽभ्यस्तस्येति संप्रसारणं न प्राप्नोति नैष दो
षः वक्ष्यति ह्येतत् ह्वोऽभ्यस्तनिमित्तस्येति यावता चेदानीं ह्वः अभ्यस्तनिमित्तस्योच्यते सोऽप्यदोषो भवति यदुक्तं यत्र हि नाकृते द्विर्वचने दीर्घत्वं तन्न
सिध्यतीति षत्वं च द्विर्वचनाधिकस्य न सिध्यति पिपक्षति पिपक्षति समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न षः सन् भवति त
त्रैणकुम्यामुत्तरस्य प्रत्ययसकारस्येति षत्वं न प्राप्नोति इदमिह संप्रधार्यं द्विर्वचनं क्रियतां षत्वमिति किमत्र कर्तव्यं परत्वात्षत्वं ॥ ॥ ॥

अभ्यस्तत्वाभावात्संप्रसारणाभावाद्दीर्घोऽप्रसंगः इति पूर्वं द्विर्वचनं ततः संप्रसारणं ततो हल इति दीर्घो [illegible]सरत्वाद् अज्झनगमां सनीति दीर्घत्वं ॥ ॥ श्री ॥ अ

= ननु द्विर्वचने संप्रसारणे हल इति दीर्घत्वेन सिद्धे रत आह परत्वादिति॰ वस्तुतो हल इति दीर्घत्वमपि न प्रकृतिप्रत्ययसंमोहात्संप्रसारणं गाङ्गमभावात्संप्रसारणं तु सामर्थ्यान्न विष्यतीति बोध्यं॰ १ =

भा० कै० ६ क्षीरोदके इति व्यक्तिविशेषविवक्षायां जातिपरत्वाभावादेकवद्भावो न कृतः सप्तम्येकवचनं वा प्रत्ययसकारसहितस्य प्रथमस्यैकाचो द्विर्वचनादामिश्रत्वं सङ्घीति
१४

पूर्वत्रासिद्धे षत्वं सिद्धासिद्धयोश्च नास्ति संप्रधारणा आदेशो स्थान्यस्तु विधिप्रतिषेधः आदेशो स्थान्यस्ताश्रयो विधिः प्राप्नोति सप्रतिषेधः ई
प्सति इत्सति [redacted] ईप्सन् ईत्सन् सेप्स नु एत्सन् किंच स्यात् अद्भावो नुम्प्रतिषेधो जुस्भावरसे नेति विधयः प्रसज्येरन् नैष दोषः उक्तमत्र प =उभे नाम्यस्तमित्यत्र=२=
रिहारः सङ्गाश्रये च समुदायस्य समुदायादेशत्वात् स्थान्याश्रये चाव्यपदेशः आमिश्रत्वात् सङ्गाश्रये च कार्ये समुदायस्य समुदायादेशत्वा
त् स्थान्याश्रये चाव्यपदेशः किं कारणं आमिश्रत्वात् आमिश्रीभूतमिवेदं भवति तद्यथा क्षीरोदके संपृक्ते आमिश्रत्वान्न ज्ञायते कियत् क्षीरं
कियदुदकमिति कस्मिन्वावकाशे क्षीरं कस्मिन्नवकाशे उदकमिति एवमिहाप्या[redacted]मिश्रत्वान्न ज्ञायते का प्रकृतिः कः प्रत्ययः क
स्मिन्नवकाशे प्रकृतिः कस्मिन्नवकाशे प्रत्यय इति तत्र को दोषः स ङि. रु. ली ति कुत्वादीनि न सिध्यंति इदमिह संप्रधार्यं द्विर्वचनं क्रियतां कुत्वादीनि इति
किमत्र कर्त्तव्यं परत्वात्कुत्वादीनि पूर्वत्रासिद्धे कुत्वादीनि सिद्धासिद्धयोश्च नास्ति संप्रधारणा एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति वक्ष्यति तच्चावश्यं वक्तव्यं
=अत्र घत्वादिस्तुतेषु षत्वामि= विभाषितास् प्रयोजयंति द्रोग्धा द्रोग्धा द्रोढा द्रोढा यावता चेदानीं पूर्वत्रासिद्धीयमद्विर्वचन इ[redacted] उच्यते सोऽप्यदोषो भवति यदुक्तं षत्वं न सिध्यतीति
=सर्वोक्तयोगिविद्धितसतीति सि= इह स्थाने द्विर्वचने णिलोपो परिहृतः सन्यङोः परतो द्विर्वचने इटो द्विर्वचनं वक्तव्यं सन्यङ. तस्य द्विर्वचने हेतेः कुत्वमपरिहृतं तत्र सन्यङः तस्य द्विर्वचने ढिः प्रयो
=ढिः। अत्यया द्रोग्धादि सनि= गश्च खेषपक्षो निर्दोषः तत्रेदमपरिहृतं सन न इट् प्रतिषेध इति एतस्यापि सप्तमे परिहारं वक्ष्यति उभयविशेषणत्वात्सिद्धमिति कथं जेघ्नीयते व क्ष्यते तत्र राम०
ढिलकारक श्चायं निर्दिष्टः। लिटि ल्लकारादाविति। एवं च कृत्वा सोप्यदोषो भवति। यदुक्तमात्व एशुसंपरस्थानमिति। यदप्युक्तं ऽपयवायावां प्रतिषेधश्चेति।
शितिषेधो त्तापको नापादपऽपात्वं वा धंत इति। प्रातिपदिकप्रतिषेधः। प्रातिपदिकानां प्रतिषेधो वक्तव्यः। गोभ्यां गोभिः। नौभ्यां नौभिः। सततर्हि वक्त
व्यः। न वक्तव्यः। ऽऽाचार्यप्रवृत्तिर्ज्ञापयति। न प्रातिपदिकानामात्वं भवतीति। पदयं रायो हलीत्यात्वं शास्ति। नैतदस्ति ज्ञापकं नियमार्थमेतत्स्या
त्। रायो हल्येवेति। यत्तर्हि ओतोम्शसोरित्यात्वं शास्ति। एतस्याप्यस्ति वचने प्रयोजनं। ऽमिवृद्धिबाधनार्थमेतत्स्यात्। शसि प्रतिषेधार्थं च। तस्मात्प्रा
तिपदिकानां प्रतिषेधो वक्तव्यः। धात्वधिकारात्प्रातिपदिकस्याप्राप्तिः। धात्वधिकारात्प्रातिपदिकस्यात्वं न भविष्यति। धातोरिति निवर्त्तते। क्व प्रकृतं। लिटि
धातोरनभ्यासस्येति। अथापि निवृत्तं। एवमप्यदोषः उपदेश इत्युच्यते। उद्देशश्च प्रातिपदिकानां नोपदेशः॥ ॥ ॥श्री॥

नवक्तव्यः॥२

एतच्चातः कृकमिकंसेत्यत्र कंसशब्दस्य भेदेनोपादानाद्विज्ञायते। उणादपो बहुलमित्यस्य तु लक्षणस्योदाहरणप्रदर्शनायोणादिपाठ इत्युणादीनामुपदेशाभावः। ननु गवादिभ्योय
दित्यत्र गवादिगणेगो हविस् अष्टके ति गोशब्दस्यास्त्युपदेशः। तथानो वयोधर्मेत्यत्र नौशब्दस्य। नैष दोषः। अर्थवदिति प्रातिपदिकसंज्ञाविधानाल्लब्धसाधिमानः। प्रत्ययविधा
नाय पराण्यागवादयउपात्ताः येषां तु स्वरूपपरसानां नायापूर्वं मुच्चारणं तेषामेवोपदेशव्यवहारः॥ ॥श्री॥ ॥श्री॥ ॥०॥

=अयंभावः। राजकुले देवदत्तं साधयतीत्यतो विषयी भवंतं तथा करोतीत्यर्थः प्रतीते [redacted] ज्ञानव्यापारो विषयीकरणरूपो णिच्प्रत्ययेनाभिधीयत इति न तत्र निषेधः। सेधयति तापसं तपइत्यत्र तु धातुस्तापसस्यैव योगात् तत्र ज्ञातव्योजनकत्वं तपस्यारोप्यप्रत्ययः इति भेदः। ४=
ज्ञाता

भा० कै० ६ २९ कौ इ. जी नौ ऐ ण। आत्वेणम्विति। विभाषा लीयतेरिति विकल्पे प्राप्ते नित्यार्थं वचनं। संमाननेतु विकल्प एव भवति। अन्ये त्वाहुः प्रलंभनशालीनीकरणग्रहणमात्मने पदविषयोपलक्षणार्थमिति संमाननेपि नित्यमात्वं भवति। सिध्यते। पारलौकिकः प्रयोजनमस्येति पारलौकिकं प्रयोजनमितिठञ्। अनुशतिकादीनां चेत्युभयपदवृद्धिः। धात्वर्थोपाधिरयं चेत्सिध्यतिरदृष्टफले वर्त्तते तदा तस्यात्वं भवति। सिध्यतेरज्ञानार्थस्येति। सांकाश्येपि दुः इत्यादौ सिध्यतिर्ज्ञानार्थः प्रयुज्यते। सांकाश्ये ज्ञायत इत्यर्थावगमात्। इह तु ज्ञायमानकर्त्तृकार्थवृत्तिः सिध्यतिरिति प्रतिषेधो न भवति राजकुले देवदत्तं साधयतीति। ज्ञातृव्यापारवृत्तेस्त्वात्वं निषिध्यते। तत्रैव ज्ञान
×आत्वेणौ लीयतेरूपसंख्यानं कर्तव्यं ×१

कौ इ. जी। आत्वेणौ लीयतेरुपसंख्यानं [redacted] प्रलंभनशालीनीकरणयोः किं प्रयोजनं प्रलंभने चार्थे शालीनीकरणे च नित्यमात्वं यथा स्यात्। प्रलंभने तावत्। जटाभिरालापयते। श्मश्रुभिरालापयते। शालीनीकरणे। श्येनो वर्त्तिकामुल्लापयते। रथी रथिनमपलापयते। सिध्यतेरपारलौकिके। सिध्यतेरज्ञानार्थस्य सिध्यतेरज्ञानार्थस्येति वक्तव्यं। इतरथा ह्यनिष्टप्रसंगः। अपारलौकिक इत्युच्यमाने ऽनिष्टं प्रसज्येत। अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति। अस्ति पुनरयं सिध्यतिः क्वचित् ज्ञानार्थे वर्त्तते। अस्तीत्याह। तपस्तापसं सेधयति ज्ञानमस्य प्र काशयतीत्यर्थः स्वान्येवैनं कर्माणि सेधयंति [redacted] ज्ञानमस्य प्रकाशयंतीत्यर्थः॥ ॥ ॥ श्री॥ ॥
=राजकुले दे वदत्तं साधयतीत्यत्र प्रका शंतरेलोपपत्तिमाह ज्ञानेति। १=

समुखत्वात्सिध्यति तापसः आविर्भूतज्ञानलक्षणप्रकाशो भवतीत्यर्थः तपस्सेधयतीति। ज्ञानपूर्विकायां तु संपत्तौ यो वर्त्तते तत्र तु ज्ञानस्य गुणभावात्प्रतिषेधाभावो राजकुले देवदत्तं साधयतीति। अन्नं साधयतीति। न तु ब्राह्मणेभ्यो दास्यामीति वाक्यात्पारलौकिकत्वं गम्यते न तु पदात् तथा त्वर्थस्तन्निष्पत्तिमात्रं। अन्नं निष्पादयतीत्यर्थावगमादिति प्रतिषेधो न भविष्यति। नैतदस्ति। तपस्तापसं सेधयतीत्यत्रापि पदान्तरसंनिधानात् सिध्यर्थस्य पारलौकिकत्वं प्रतीयत इति सर्वत्रैवापगम्यत्वात् पारलौकिकत्वस्य प्रतिषेधप्रसंगः। वार्त्तिककारेणाह ज्ञानार्थ एव व्याख्यातरसाद्दुः। अन्नं साधयतीत्यत्र दृष्टमेवान्नलक्षणं फलं सिध्यत्यर्थस्येति प्रतिषे धो न भवति हेयोपादेयतत्वप्रत्यक्षीकारलक्षणं तु ज्ञानं पारलौकिकमिति तत्रैव प्रतिषेधः प्रवर्त्तते॥ ॥ ॥ एम० २९

=अपारलौकिकइतिपर्युदासः साक्षाददृष्टफले धात्वर्थे साधकत्वोपबंधानेनादृष्टफलेन प्रवर्त्तत इत्याहुः। २=

मीनातिः। उपदेशवचनमित्याद्य उच्चारणेः नुमन्त्र एव प्रत्यय आत्वं कर्त्तव्यमित्यर्थः। भाष्यकारस्त्वेनमेवार्थमन्यथा व्याचष्टे। उपदेशिवद्भावो वक्तव्य इति। उपदेशिन आकारान्ताया वा
मन्तय आकारान्ता निमित्तं प्रत्ययमकृतित्वं यथा प्रतिपद्यन्ते तथा मीनात्यादयोपीत्यर्थः। का इति॥ आतश्चोपसर्गे इत्यकः॥ आतो नुपसर्गे इत्यकः। कौ चाङ्‌ च काः। आतश्चोपसर्गे इत्य ङ्‌ ।

मीनातिः॥ मीनात्यादीनामात्वे उपदेशवचनं प्रत्ययविध्यर्थं। मीनात्यादीनामात्व उपदेशिवद्भावो वक्तव्यः॥ उपदेशावस्थायामात्वं भवतीति वक्तव्यं। किं प्रयोजनं। प्रत्ययविध्यर्थं। उपदेशावस्थायामात्वे कृते इष्टः प्रत्ययविधिर्यथा स्यात्। के पुनः प्रत्ययाः उपदेशिवद्भावं प्रयोजयन्ति। काः। कास्तावत्प्रयोजयन्ति। किं कारणं।
एच इत्युच्यते। न चैजस्ति॥ णलु ह्युत्सुविषयस्तर्हि प्रयोजयन्ति णः। अवदायः। आत इति णः सिद्धो भवति॥ घञ्। अवदायो वर्तते। आत इति घञ् सिद्धो भव
ति। किं च भोः आत इति घञुच्यते। न खल्वप्यात इत्युच्यते। आतस्तु विज्ञायते। कथं। अविशेषेण घञुत्सर्गः। तस्य इव[redacted]वर्णान्ता उवर्णान्ताच्चाजपाव
वा पैदौ। तत्रोपदेशावस्थायामात्वे कृते अपवादस्य निमित्तं नास्तीति कृत्वा उत्सर्गेण घञ् सिद्धो भवति। एवं च कृत्वा न च आत इत्युच्यते। आतस्तु विज्ञायते। यु
च्। ईषद्वदानं। सुवदानं। आत इति युच् सिद्धो भवति॥ इदं विप्रतिषिद्धं। एच उपदेश इति॥ यद्येचः। नोपदेशो। अथोपदेशे नैच् एच श्चोपदेशे चेति विप्रति
षिद्धं। नैतद्विप्रतिषिद्धं। आहायमेच उपदेश इति। यद्येचो नोपदेशो अथोपदेशो [redacted] नैचः॥ ॥

निर्दिष्टः। न चैकेषिति। शक्यं ह्यादित्वात् सरूपमन्यथा कास्विति स्यात्। किं मिचेति गुणप्रतिषेधान्नैजभावः। आतस्तु विज्ञायत इति सामर्थ्यात्तथाहि। मीनात्यादीना
मुपदेश एवात्वे कृते इवर्णान्तलक्षणो जपवादो न प्रवर्त्तेत इति घञेव स्यात्॥ इदं विप्रतिषिद्धमिति॥ नहि मीनात्यादीनामुपदेश एजस्ति। प्रत्ययनिमित्तत्वादेचः॥ ॥

भा०कै०६ तेवयंविषयमिति॥ सतु विषयः प्रत्ययो यस्मिन् प्रत्यये चाभाव्यं तस्मिन्ननुत्पन्न एवात्वं। अन्ये त्विवर्णमेज्विषयमाहुः। यस्येवर्णस्यैचाभाव्यं तस्यात्वं। केचित्त्वेजेव विष
३० य इत्याहुः। एचि भाविन्यात्वेन तु ष्या भिते आत्वं भवतीत्यर्थः। न चान्यार्थमिति॥ तस्यैव तदर्थस्यैवोत्तरत्रानुवृत्तेनादिति भावः। तत्रैतस्मात् तत्र अन्यदेव शब्दरूपं वाक्यान्तरे छनुमी
यत इत्याशंक्याह। न खल्वपीति। अन्यार्थमपीति। स्वरितत्वप्रतिज्ञानाच्छब्दस्वरूपमात्रमुत्तरत्रानुवर्त्यते तस्य पदार्थस्योपयोगस्तदर्थमेवावतिष्ठते॥ शब्दस्त्विति। स्वरितत्व
प्रतिज्ञानात्स्वदंशे शब्दः तरं वाक्यार्थानुगुणार्थमनुमीयते साहचर्यान्तु तदेवेदमिति। तत्वाध्यवसायो भिन्नेष्वपि शब्दरूपेषु भवति तत्रोपदेशग्रहणे समासयो विधीयते

तेवयंविषयंविज्ञास्यामः। एज्विषय इति। तत्र हि उपदेशग्रहणं कर्तव्यं न कर्तव्यं। प्रकृतमनुवर्त्तते। क्व प्रकृतं। आदेशच उपदेशेऽशितीति। तद्वै प्रकृतिविशेष
णं। विषयविशेषणं न चेहार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्त्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवति। यत्तावद
दुच्यते न चान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भव[redacted]ति। तद्यथा। शाल्यर्थं कुल्याः प्रणी
यन्ते। ताभ्यश्च पानीयं पीयते। उपस्पृश्यते च। शालयश्च भाव्यन्ते। यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्त्तनादन्यद्भवती न हि गोधा सर्पन्ती सर्पणादहिर्भ
वतीति। भवेद् द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येन येनाभिसंबध्यते तस्य तस्य विशेषको भवति तद्यथा। गौः प्रुल्कः अश्वः प्रुल्क इति गम्यते निमिमीलियां
खलचोः प्रतिषेधो वक्तव्यः। ईषन्नियमः सुनियमः। निमयो वर्त्तते निमयः। मी। ईषत्प्रमयः सुप्रमयः। प्रमयो वर्त्तते प्रमयः। ली। ईषद्विलयः सुविलयः।
विलयो वर्त्तते विलयः। विभाषा लीयतेः। किमिदं लीयतेरिति। [redacted]। लिनातिलीयत्योर्यका निर्देशः॥
उपदिश्यते तस्मिन्नेजिस्तु पदेशः विषयसप्तमी चेयन्त्वेयं परसप्तमी। तेनानुत्पन्न एव प्रत्यये आत्वमिवर्णो वोपदेशः अथ वोपदेशनमुपदेशः। तत्र निपादनं तत्र पूर्वे सूत्रउ राम०
पदेशग्रहणं प्रकृतस्याभिसंबन्धात् द्विशेषणमिह तु विषयविशेषणमिति न कश्चिद्दोषः। खलचोरिति। पचाद्यच स्वस्य सामान्यग्रहणं। विभाषा। यकानिर्देश इति। यपुनानिर्दे ३०
शे लिनातेर्ग्रहणं न स्यादिति सामान्यग्रहणार्थं यकानिर्देशः आश्रीयक्श्तिपः श्तिकरणसामर्थ्याद्भावकर्मवाचित्वेऽपि प्रवर्त्तते यथा श्वादयोः कर्तृवाचित्वेऽपीति भावः॥०॥
य

बिभेतेर्हेतुभये। हेतुभय इति किमर्थमिति। इहणाविति वर्तते प्रयोजकव्यापारे च णिज्विधीयते इति सर्वत्र हेतुसंबंधिभयसद्भावात् व्यावर्त्याभावादनर्थकं हेतुभयग्रहणमिति
मत्वा प्रश्नः॥ हेतुरेव भयमिति॥ अपादानसाधनो भयशब्दो न तु भावसाधनः। समानाधिकरणपदः समासो न षष्ठीसमासः। तेन पदासाक्षात्प्रयोजको भयस्यापादानं तदैत
दात्वं यदा तु कुञ्चिकादीनि भयस्यापादानं तदा तत्त्वाभावः। एतच्च हेतुभयग्रहणसामर्थ्यादाश्रीयते। भावसाधनत्वे षष्ठीसमासे च तदनर्थकं स्यात्। यद्यपि भावसाधनपक्षेऽपि

बिभेतेर्हेतुभये हेतुभय इति किमर्थं कुञ्चिकयैनं भाययति। हेतुभय इत्युच्यमानेऽप्यत्र प्राप्नो॥ हेतुभयं इति नैवं विज्ञायते तैमोर्मे यं हेतुभयं
हेतुभय इति कथं तर्हि हेतोरेव भयं हेतुभयमिति॥ यदि स एव हेतुः भयं भवतीति। स्तजिदप्सोः अभिसङ्ग्रहणं। अभिसङ्ग्रहणं कर्तव्यं। किमि
दं सदि.ति प्रत्याहारग्रहणं। कस्मिन्निविष्टानां प्रत्याहारः। सनः प्रभृति आ महिङो ङकारात्। किं प्रयोजनं। क्विप्प्रतिषेधार्थं। क्विबन्तस्य मा भूत्।
रज्जुसृड्भ्यां। रज्जुसृड्भिः। देवदृग्भ्यां॥ देवदृग्भ्यां। देवदृग्भिः। उक्तं वा किमुक्तं धातोः स्वरूपग्रहणे तत्प्रत्यये विज्ञानात्सिद्धमिति। शीर्षच्छंदसि। शीर्षन्
हेतुभयं॥ (। छंदसि प्रकृत्यन्तरं। शीर्षन्छंदसि प्रकृत्यन्तरं द्रष्टव्यं किं प्रयोजनं॥ ॥ ॥

पंचमीसमासाश्रयणेनायमेवार्थो लभ्यते तत्र षष्ठीसमासनिराकरणपरत्वाद्भाष्यस्य हेतोरपादानत्वमवश्यमाश्रयितव्यमित्यत्र तात्पर्यात्पंचमीसमासो न निवार्यते। स्तजि
दा। अक्रितीतियादि पर्युदासोऽप्यपि प्रसज्यप्रतिषेधो न लभवति किंतु त्विनेति सर्वेषां रज्जुसृड्भ्यामित्यादौ प्राप्नोतीति मत्वाह। अभिसङ्ग्रहणमिति। शीर्ष॥०॥

आदेशप्रतिषेधार्थमिति। यद्यपि शिरस इति स्थानी साक्षान्न निर्दिष्टस्तथापि समानार्थत्वादादेशेनाक्षिप्यते। यथा शिवादिषु विश्रवणशब्देन विश्रवश्शब्द इति स्थानिनोऽश्र
वणेऽनन्तप्रयोगः स्यादिति स्थान्यादेशभावपरिहारेण प्रकृतसंतरत्वमाश्रयणीयमित्यर्थः। यद्यपि पूर्वसूत्रादन्यतरस्यां ग्रहणानुवृत्त्या इष्टसिद्धिर्भवति तथाप्युत्तरत्रैवदनुवृत्तिराशं
क्येतेति तत्परिसांगेन प्रकृतसंतरप्रश्नो निर्दिष्ट आश्रितः। ये च। वाक्ये शेषे इति। तत्र शिरस्यशब्दस्य केशविषयत्वाच्छिरस्यशब्दादेव केशार्थावगमात् केशशब्देन प्रयो

आदेशप्रतिषेधार्थं। आदेशो माविज्ञापि। प्रकृतसंतरं यथा विज्ञायेत। किं च स्यात्। असकारान्तस्य छंदसि श्रवणं न स्यात्। शिरो मे शीर्यते मुखे। इदं ते शिरो मे
भिनत्तीति। तद्वा अथर्वणः शिरः। ये च तद्धिते। ये च तद्धिते शिरसः आदेशार्थं। ये च तद्धिते इत्यत्र शिरसो ग्रहणं कर्तव्यं। किं प्रयोजनं। आदेशार्थं। आदेशो
यथा विज्ञायेत प्रकृतसंतरं मा विज्ञायि। किं च स्यात्। यकारादौ तद्धिते स्कारान्तस्य श्रवणं प्रसज्येत। शीर्षण्यो हि मुखो भवति। शीर्षण्यः स्वरः। वाक्ये शेषु।
वाक्ये शेषु शिरसः शीर्षन्भावो वक्तव्यः। शीर्षण्याः केशाः शिरस्याः। [redacted] अचि शीर्षः। अचि परतः शिरसः शीर्षभावो वक्तव्यः। हास्तिशीर्षिः॥
पैलुशीर्षिः छंदसि च। शिरसः शीर्षभावो वक्तव्यः। द्विशीर्षं॥ ॥

क्तव्यः। शीर्षण्यशब्दस्य सामान्यवाचीति तत्प्रयोगे विशेषावगमाय केशशब्दः प्रयुज्यत इत्याहुः॥ अचि शीर्ष इति॥ वार्त्तिकं दृष्ट्वा सूत्रेषु कैश्चित्प्रक्षिप्तं। हास्तिशीर्षिरि
ति॥ बाह्वादिषु शिरश्शब्दस्य पाठात् केवलस्यापत्येनायोगाज्जन्दंतविधिः। छंदसि चेति। अन तद्धिते प्रजादौ यथा स्यादिति वचनं। पद्येवमजादौ छंदसि शिरश्शब्दप्र
योगे नाप्नोति शीर्षादेशो बाधनात्स्तिदर्शने सर्वे विधयश्छंदसि विकल्प्यंत इति दोषाभावः॥ ॥ ॥

येचितद्धितइति।। यकारादावजादौचतद्धिते शीर्षन्नभवतीति तेत्रिष्प्रसयेशीर्षन्नभावे कृते टिलोपेच प्रदाः देशः। औरिष्यतद्रस्यर्थः। पद्दन्नो। सर्वेविधयश्छंदसिविकल्प्यंतइतिपा
दादयोपिच्छंदसिप्रयुज्यंते। दोषणीयाचतइति।। औरिदोश्शब्दस्यदोषन्नादेशः।। यत्रसस्क्षुद्रेषिति। यत्रसीमसयो।। क्षुद्रशब्दउत्तरपदे। नसमिति।। नासिकायांभ [redacted]

इहहास्तिशीर्ष्णोपैत्तुशीर्ष्णेति शिरसोयहणेनग्रहणात् शीर्षन्भावः प्राप्नोति।। अस्तुनस्तद्धितइतिटिलोपोभविष्यति। नसिध्यति। येचाभावकर्म
णोरितिप्रकृतिभावः प्रसज्येत। यदिपुनर्येः चितद्धितइत्युच्येतं किंकृतं भवति। इन्निशीर्षन्भावेकृते टिलोपेनसिद्धं।। नैवंशक्यं। इहहिस्थूल
शिरइदंस्थौलशीर्षमिति।। अन्नणीतिप्रकृतिभावः प्रसज्येत। तस्मान्नैवंशक्यं। नचेदेवं शिरसोयहणेनग्रहणात् शीर्षन्भावः प्राप्नोति।
पाक्षिकएषदोषः कृतरस्मिन्पक्षे। ष्यङ्वित्‌-धौ दृतं भवति। अणिञोर्वादेशः ष्यङ्‌-अणिञ्योपरइति। तद्यदातावदणिञोरादेशः।। तदै
षदोषः। यदात्वणिञोपरः। नतदादोषोभवति। अणिञ्भ्यांव्यवहितत्वात्। पद्दन्नो शस्प्रभृतिष्विपुच्यते।। अशस्प्रभृतिष्वपिदृश्यते।
शलादोषणीकृकुद्दोषणीयाचतेमहादेवः। पदादिषुमांसस्तस्नूनामुपसंख्यानं पदादिषुमांसस्तस्नूनामुपसंख्यानंकर्तव्यं। यत्नीक्षणंमांसपच
न्याः। मांसपचन्या इतिप्राप्ते। एतत्सुमर्तेर्ष्वेतन्नासुमर्त्यमितिप्राप्ते। स्नः। नतेदिवोनरष्यि व्याऽधिस्नुष्वधिसानुष्विति प्राप्ते।। नसनासिकायाय

वं नासिकायैहितमितिवाशरीरावयवाद्यत्। नसत्वं इति। प्रपादानेवाहीयात् होरिति तसिः। नः क्षुद्र इति। नासिकया क्षुद्र इति सुप्सुपेतिसमासः।। ।। श्री।।

नत्त्स क्षुद्रेषु। यत्तस क्षुद्रेषु परतो नासि
क्षोभान स भावो व क्रव्य:। समं नसः। क्षुद्र नः क्षुद्रं।।

भा०कै०६ अवर्णो नगरयोरिति। यत्र एतद्विशेषणं। परिमुखादिषु पाठ इति॥ तत्र यो कृते सिद्धं नासिक्यमिति। ननु यत्ति [redacted] त्रिस्वरितमिति स्वरितत्वं भवति॥ एण्ययोस्त्वाद्युदात्तत्वांतोदात्त
३२ त्वे भवत इति स्वरभेदप्रसंगः॥ राजन्यसांकाश्यकांपिल्यनासिक्यदार्वाघाटानामादिर्वांतो वेति प्रतिपदं स्वरविधानाद् आद्युदात्तत्वांतोदात्तत्वाभ्यां पर्यायेणाभाव्यमिति नास्ति स्वरभेदः। य
त्वस्य येच सस्य नासिक्यमित्यत्र यतो ष्यातदर्थ इत्युत्तरपदांतोदात्तत्वं प्रसज्येत। अव्ययसर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिष्यत इति। प्रत्याख्यानमेव युक्तम्। धात्वा। उप

अवर्णो नगरयोरिति वक्तव्यं। इह मा भूत्। नासिक्यो वर्णो नासिक्यं नगरं। तत्र हि वक्तव्यं न वक्तव्यं। इह तावन्नासिक्यो वर्ण इति। परिमुखादिषु पाठः करिष्यते। नासिक्यं नगरमिति। सांकाश्यादिषु पाठः करिष्यते। धात्वादेः षः सः। धात्वग्रहणं किमर्थं। इह मा भूत्। षोडन्। षंडः षडिकः। अषादिग्रहणं किमर्थमिह मा भूत्। पेष्टा पेष्टुं। नैतदस्ति प्रयोजनं। अस्त्वत्र सत्वं सत्वे कृते इणउत्तरस्यादेशस्य सकारस्येति षत्वं भविष्यति। इदं तर्हि लविता लवितुं॥ इदं चाप्युदाहरणं। पेष्टा। पेष्टुं ननु चोक्तं अस्त्वत्र सत्वं सत्वे कृते आदेशसकारस्येति षत्वं भवतीति। नैवं शक्यं। इह हि पेक्ष्यतीति षत्वस्यासिद्धत्वात् षढोः कः सीति कत्वं न स्यात्॥ ॥

देशग्रहणानुवृत्त्या मा तिपदिकानां सत्वं न भविष्यतीति मत्वाह। धात्वग्रहणं किमर्थमिति। इतः सर्वेषु सूत्रेषु विच्छिन्नमुपदेशाधिकार इत्याह। षोडन्निति षडदंता अस्मे
निबहुव्रीहिः॥ वयसि दंतस्य दत्रिति दत्रादेशः। षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं चेति उत्वष्टुत्वे। षण्डशब्दो अव्युत्पन्नं प्रातिपदिकं। षडिक इति। अनुकंपितः षडंगुलिरिति व
कचो मनुष्यनाम्न ठज्वेति ठच्। ठाजादावूर्ध्वं द्वितीयादचः इति। अंगुलिशब्दस्य लोपः। ठस्येक इति इकादेशः। यस्येति चेत्यकारलोपः। लविता। षकारोपदेशस्तु प्रतिलक्षतीत्यादौ शेषे राम० ३२
विभाषा कखादावन्त उपदेश इति णत्वप्रतिषेधार्थः स्यात्॥ ॥

षोडीप्रतीति। षोडन्तमाचष्ट इति णिचि टिलोपे पचाद्यचि कृते षोड इति। ष्ठ्यात्मन इति क्यचि क्यचि चेतीत्वम्। उद्देश इति। लक्षणेन प्रतिपादनं सुब्धातू नाम तु साक्षादुच्चार्य प्रस्थ(?)र्थः। द्वितीयो वर्णः षकार इति। तत्र षस्य सत्वे कृते ष्टुत्वं क्रियते। तु प्रनिर्दिष्ट इति। लोपो व्योर्वलीति लक्षणेन लुप्तः ततः उपदेशे धात्वादि त्वाभावात्सत्वाभावः। तत्र यदाह ष्ठिवु

सादेशे सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधः। सादेशे सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः। सुब्धातु। षोडीप्रति। षण्डीप्रति। ष्ठिवु ष्ठीवति। ष्वष्क ष्वष्कते। सुब्धातून्नं नाम तु न्न वक्तव्यः। उपदेश इति वर्त्तते। उद्देशश्च प्रातिपदिकानां नोपदेशः। यद्येवं नार्थो धातुग्रहणेन। कस्मान्न भवति। षोडन्। षडरः। षडिक इति। उपदेश इति वर्त्तते उद्देशश्च प्रातिपदिकानां नोपदेशः। ष्ठिवेरपि। द्वितीयो वर्णः षकारः। यदि टकारः तेष्ठीव्यत इति न सिध्यति। एवं तर्हि थकारः। यदि थकारः दुष्ठ्यूषति टेष्ठीव्यत इति न सिध्यति। एवं तर्हि द्वाविमौ ष्ठिवू एकस्य द्वितीयो वर्णष्टकारः अपरस्य थकारः। यस्य थकारस्तस्य सत्वं प्राप्नोति। एवं तर्हि द्वाविमौ द्विषकारकौ। ष्ठिवुष्वष्कती। किं कृतं भवति। पूर्वस्य षकारस्य सत्वे कृते परेण सन्निपाते ष्टुत्वं भविष्यति। नैवं शक्यम्। इह हि ष्ठ्यूतिः ष्ठीवति। मधुलिट् ष्ठवष्कते। ष्टुत्वस्यासिद्धत्वात् ठः। सिषुड्गिति षुट् प्रसज्येत। एवं तर्हि यकारादी ष्ठिवुष्वष्कती। किं यकारेण न श्रूयते। लुप्तनिर्दिष्टो यकारः। अथ किमर्थं षकारमुपदिश्य तस्य सकारादेशः क्रियते। न सकार एवोपदिश्येत। लघ्वर्थमित्याह। कथम्। अविशेषेण यं षकारमुपदिश्य सकारमादेशमुक्त्वा लघुनोपायेन षत्वं निर्वर्त्तयति। आदेशप्रत्यययोरिति। इतरथा हि ये षां षत्वमिष्यते तेषां तत्र ग्रहणं कर्त्तव्यं स्यात्। के पुनः षोपदेशाः धातवः पठितव्याः। अथ कोत्र भवतः पुरुषकारः यद्युत्तरेण पाठं किं चिच्छक्यते वक्तुं त उच्यन्ताम्। उत्तरेण पिपाठं किञ्चिच्छक्यते कर्त्तुं। कथम्। अजन्दन्त्यपराः सादयः षोपदेशाः स्मिङ्ष्विदिस्विदिस्वञ्जिस्वपश्च। सृपि सृजि स्तृ सत्या सेककृ स

द्वितीयो वर्णस्य कारस्तदापर्वत्रासिद्धीयमद्विर्वचन इति कृत ष्टुत्वस्यापि द्विर्वचने सर्गः स्वय इति शरोत्वोपेक्रत्वेपूर्वत्रासिद्धत्वनिवृत्तौ तेष्ठीव्यत इति भवति। के पुनरितिपाठं प्रश्नसम्भवात्प्रश्नः। अजन्दन्त्यपरा इतिदं लक्षणहणेन वकारेण न गृह्यत इति आशङ्कास्यादिति स्विदस्वयो भेदेन निर्दिष्टाः॥ वाक्य॥ श्री॥ ॥श्री॥ ॥

=अत्रैकादशमपि बोध्यं यद्यप्र=
=करणोऽस्त्यत इति आख्यात=

=आर्धङ्कतिः नगृह्यत इति मिश्रितेपि स्वरादीनामनुपदेशे संदेहः स्यात् उपदेशे तु तेनवासे देनोपादानाद्दन्त्यग्रहणे वकारेण गृह्यत इत्यसिस्वद दिति सिध्यती साधु॥ ९=

भा०कै०६ लोपो यः। कंडूयतेरप्रत्यय इति। ननु च कंड्वादिभ्यो यगित्यत्र नैतेभ्यः क्विप् दृश्यत इत्युक्तं तत्कथमप्रत्ययः। एवं तर्हि कंडूमिच्छतीति क्यजंतात्क्विप् प्रक्रियते। द्विविधा हि कंड्वा
३२ दयस्तत्र धातुभ्यो यग्विधानात् प्रातिपदिकेभ्यः क्यप्कण्ड्वादयो भवंत्येव। नन्वत्र क्यजंतात्कंडूयशब्दात् क्विपि कृते वेरपृक्तस्येति लोपे अतो लोपे च वलः परस्याभावाद्यलो
पो न प्राप्नोतीति वचनं। न चात्र वलादिमिति। यद्यपि विशेष्यासंनिधानात्तदादिविधेरभावः तथापि संभवमात्रेणोत्तरदुक्तं। संभवति हि कृतमपि सादौ वलादिप्रत्ययः।
ननु चायमिति। अतो लोपस्य चात्र लोपविधिं प्रति स्थानिवत्त्वनिषेधः। अथ कंडूयशब्दस्य धातुत्वाद्यलोपे कृते परिशिष्टस्य धातुसंज्ञा सद्भावादतो लोपस्य स्थानिवद्भावा

णोनः। अथ किमर्थं णकारमुपदिश्य नकारआदेशः क्रियते। न नकार एवोपदिश्येत। लघ्वर्थमपि स्यात्। अविशेषेण णकारमुपदिश्य नकारस्यादे
शमुक्तवान् स्वलघुनोपायेन णत्वं निर्वर्त्तयति। उपसर्गादसमासेऽपि णोपदेशस्येति। इतरथा हि ये पातत्राणत्वमिष्यते ते पातत्रयग्रहणं कर्त्तव्यं स्यात्।
के पुनर्णोपदेशा धातवः। पठितव्याः। कोऽत्र भवतः पुरुषकारो यद्यंतरेण पाठं किंचिच्छक्यते वक्तुं। न तुच्यन्तां अंतरेणापि पाठं किंचिच्छक्यते वक्तुं। कथं। स
र्वे नादयो णोपदेशाः। नृति नंदि नर्दि नक्कि नाटि नाथ्य नाधृ नृ वर्ज्जं। लोपो व्योर्लोपे क्वावुपसंख्यानं। व्योर्लोपे क्वावुपसंख्यानं कर्त्तव्यं। इहापि य
था स्यात्। कंडूयतेरप्रत्ययः कंडूरिति। किं पुनः कारणं न सिध्यति। वलीत्युच्यते। न चात्र वलादिं पश्यामः। ननु चायं क्विवेव वलादिः। क्विब्लोपेव ला
घभावान्न प्राप्नोति। एवं तर्हि इदमिह संप्रधार्यं। क्विब्लोपः क्रियतां यलोप इति। किमत्र कर्त्तव्यं॥ ॥श्री॥ ॥श्री॥ ॥

ऊवङ् कस्मान्न भवति। उच्यते। अतो लोपस्य स्थानिवद्भावादेव कंडूशब्दस्य धातुत्वाभावाद् उवङोऽप्रसंगः। तस्य हि स्थानिवत्त्वे पूर्वस्य धातुत्वं नास्ति। यणादेशस्तर्ह्यल्लोपस्य
स्थानिवद्भावात् प्राप्नोति। भवतु तस्य क्विबाश्रयः उठ् करिष्यते। उठि च कर्त्तव्ये नास्ति स्थानिवद्भावः। अपरिष्टाद् च पूर्वत्वाद् ऊकारस्य। अत एव कंडुवौ कंडुव इत्याहोऽवङि कर्त्तव्ये नास्य स एम०
ल्लोपस्य स्थानिवद्भावः। यदा तु कंडूशब्दात्प्रातिपदिकाद्विभक्तिस्तदा उवङ् भवति। कंड्वौ कंड्व इति॥ ॥श्री॥ ॥श्री॥ ॥ ३२

परत्वादिति॥ नन्वत्र हलन्ते ऽतो ऽल्लोपे यलोपस्याप्रसंगः। तत्राच्छ्लोपादन्तरंगत्वात्पूर्वं विल्लोपे न भाव्यमिति यलोपक्विब्लोपयोर्विप्रतिषेधाभावः। एवं तर्ह्यार्द्धधातुक इति विषयसप्तम्या आश्रयणात्पूर्वमतो लोपः पश्चात्क्विविति भवतीति विप्रतिषेधः। यदि वेति॥ यथा ऽतरणे ऽ इत्यत्रेमागमः। ननु यस्य प्रत्ययलक्षणं निमित्तं वर्णस्तत्र प्रत्ययविशेषणत्वेनोपादीयते तद्वत्प्रत्ययलक्षणेन यथेमागमो हलादौ पिति सार्वधातुके विधीयमानः। यलोपस्तु वर्णनिमित्तो न प्रत्ययनिमित्त इति कथं प्रत्ययलक्षणेन स्यादित्याशंक्य परिहारान्तरमा-

परत्वात्क्विब्लोपः नित्यत्वाच्च। नित्यः खल्वपि क्विब्लोपः। कृते ऽपि यलोपे प्राप्नोत्यकृते ऽपि। नित्यत्वात्परत्वाच्च क्विब्लोपे कृते वलाद्यभावाद्यलोपो न प्राप्नोति॥ एवं तर्हि प्रत्ययलक्षणेन भविष्यति॥ वर्णाश्रये नास्ति प्रत्ययलक्षणं॥ यदि वा कानिचिदन्यान्यपि वर्णाश्रयाणि प्रत्ययलक्षणेन भवन्ति तथेदमपि भविष्यति॥ अथवा एवं वक्ष्यामि। लोपो व्योर्वलि। ततः वेः। व्यन्तपोऽस्य व्योर्लोपो भवति। ततो ऽपृक्तस्य। अपृक्तस्य च लोपो भवति॥ वेरित्येव। वलोपाप्रसिद्धिरूठ्भाववचनात्। वलोपस्याप्रसिद्धिः। आस्रेमाणं जीरदानुरिति। किं कारणं॥ ऊठ्भाववचनात्। च्छ्वोः शूडनुनासिके चेति ऊठ् प्राप्नोति॥ अतिप्रसंगो व्रश्च्यादिषु। व्रश्च्यादिषु चातिप्रसंगो भवति। इहापि प्राप्नोति। व्रश्चनः। श्रीहयः॥

ह॥ अथ वेति॥ वेरपृक्तस्येत्ययं योगो विभज्यते। वेरित्येको योगस्तत्र व्योरिति वर्त्तते। वेरिति च प्रत्ययग्रहणं परिभाषया तदन्तस्य ग्रहणं तस्यैव व्योरिति विशेषणं तेन वकारप्रकारान्तस्य विप्रत्ययान्तस्य लोंत्वस्य लोपो भवति। प्रत्ययलक्षणेन च विप्रत्ययान्तत्वं॥ जीरदानुरिति॥ ननु नात्रोठ् प्राप्नोति। एवं तर्हि तुल्यप्रतिविधानत्वात् उपलक्षितं वलोपावकाशप्रदर्शनेन वास्रेमाणमित्यत्र वलोपासिद्धिः प्रदर्श्यते॥ ॥ ॥

= जीरदानुरित्यत्र च वितायोर्वलोप आस्रेमाणमित्यत्र ... नयाम्नोतीति ... भाष्यार्थः। अन्यथानवकाशा वा लोपः ... कः स्यादिकम्॥

किं कुतिभनुनासिके चेति विधानात् ... ॥

भा० कौ० ६ अन्तरंगो लोप इति॥ तत्र श्वा हुते योरेव संप्रसारणं हलादिशेषयोर्वल्लोपः प्राप्तः उपदेशसामर्थ्यान्न भवति। अनारंभो वेति॥ वाग्रहणं समाधानं वा स्नेमाणमित्यत्राश्रयणीयं। छांद

३४ सत्वाद्गुणानभवती लुक्तं भवति॥ वल्लोपश्चात्र प्रसारण्यायतने नयल्लोपः गौ धेरः पचेर त्रिमादौ न सप्तोपयोगात्। वेरपृक्तस्य भवति चेत् किंचिदिति। यत्तु तेन क्रियते वक्तव्यस्तदाचार्यास्त्वोदयंतीति

=उपदेशेति॰ [illegible] दिनेनोपदेशसामर्थ्यादित्यर्थः॥ [illegible] विमतीत्यमयोः॥ २

उपदेशसामर्थ्यात् सिद्धं। उपदेशसामर्थ्याद्धुश्वादिषु लोपो न भविष्यति। उपदेशसामर्थ्यात् सिद्धमिति चेत्संप्रसारणहलादिशेषेषु सामर्थ्यं। उपदेशसामर्थ्या
त्सिद्धमिति चेत् अस्यत्य उपदेशवचने प्रयोजनं संप्रसारणहलादिशेषेषु वकारस्य श्रवणं यथा स्यात्। ह्वृक्रणः। वृक्णवान्। वृश्चति। विव्रश्चिषतीति। न
वा बहिरंगलक्षणत्वात्। न वा एतत्प्रयोजनमस्ति। किं कारणं बहिरंगलक्षणत्वात्। बहिरंगाः संप्रसारणहलादिशेषाः। अन्तरंगो लोपः। असिद्धं
बहिरंगमन्तरंगे॥ अनारंभो वा। अनारंभो वा पुनर्वल्लोपस्य न्याय्यः। कथमास्नेमाणं जीरदानुरिति। आस्नेमाणं जीरदानुरिति वर्णलोपात्। आस्नेमाणं जी
रदानुरिति छांदसत्वाद्वर्णलोपात् सिद्धं। यथा संस्फानो गयस्फानः। तद्यथा। संस्फायनः। संस्फानः। गयस्फायनः। गयस्फानः इति। वेरपृक्तस्य। दर्विजागृ
व्योः प्रतिषेधः। दर्विजागृव्योः प्रतिषेधो वक्तव्यः। दर्विः। जागृविः। किमुच्यते दर्विजागृव्योः प्रतिषेधो वक्तव्य इति। यदापृक्तस्येत्युच्यते। भवति वै किंचि
दाचार्याः क्रियमाणमपि चोदयंति। तद्धाकर्तव्यं दर्विजागृव्योः प्रतिषेधो वा वक्तव्यः। वेर्लोपे दर्विजागृव्योः प्रतिषेधोऽनुनासिकपरत्वात्॥ वेर्लोपे

॥ दर्विजागृव्योरप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः लोपः कस्मान्न भवति॥ ॥

दर्यस्यासान्यथासिद्धत्वप्रतिपादनाय। तत्र भवति वै किंचिदित्युक्तं वाक्यं किं तदित्याहाचार्याः क्रियमाणमपि चोदयंतीति। अथवा चोदनक्रियापि भवति क्रियायाः कर्त्री भवतीत्ये राम०
कमेवेदं वाक्यं॥ अप्रतिषेध इति॥ अपृक्तस्येति न वक्तव्यमित्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥ ३४

अनुनासिकपरत्वादिति॥ परशब्दो विशिष्टदेशावयववाची। यस्य विशब्दस्य परः इकारोऽनुनासिकोऽतएवेत्संज्ञकः सएवानुक्तत्वो लोपविधानायननुनासिकपरइ
त्यर्थः। इतरः पंचम्यर्थे बहुव्रीहिं मत्वा चोदयति। यदीति॥ विनो नकारस्य लुप्तत्वादनुनासिकपरत्वाभावान्मा भूल्लोपो घृतस्पृगित्यादावेवतु नप्राप्नोतीति क्विनो नका
रस्य लुप्तत्वात्। नैवं विज्ञायत इति। एवं हि विज्ञायमाने प्रियदर्विमन्य इत्यादौ स्यादिशेषे च विषये न स्यात्॥ प्रियदर्वीति। अत्राणो प्रगृह्यस्यानानासिक इत्यनुनासिकः

अनुनासिकपरत्वात्। अनुनासिकपरस्य विशब्दस्य ग्रहणं न चात्रानुनासिकपरो विशब्दः श्रुतुपरश्चात्र विशब्दः। यद्यनुनासिकपरस्य विशब्दस्य ग्रहणमिष्य
ते। घृतस्पृक् दलस्पृक् इत्यत्र न प्राप्नोति॥ न ह्येतस्माद्विशब्दादनुनासिकं परं पश्यामः॥ अनुनासिकपरत्वादिति नैवं विज्ञायते। अनुनासिकः परो यस्मा
त्सोऽयमनुनासिकपरः। अनुनासिकपरत्वादिति। कथं तर्हि अनुनासिकः परोऽस्मिन्सोऽयमनुनासिकः। अनुनासिकपरत्वादिति एवमपि प्रियदर्विं अ
त्र प्राप्नोति। अस्ति ह्यत्रानुनासिकः। एवमपि धात्वं तस्य प्रतिषेधः। धात्वं तस्य प्रतिषेधो वक्तव्यः। इविदिविधिविधात्वं तस्यार्थग्रहणात्। अर्थवतो
विशब्दस्य ग्रहणं न धात्वंतोऽर्थवान्। वस्य वानुनासिकत्वात्सिद्धं॥ अथवा वकारस्यैवेदमनुनासिकस्य ग्रहणं। संति हि यणः सानुनासिकाः निरनुनासिका
श्च॥ हल्ङ्याब्भ्यो॥ यदि पुनरयमपृक्तलोपः संयोगांतलोपो विज्ञायेत। किं कृतं भवति। द्विहल्ग्रहणं तिसो श्च ग्रहणं [redacted] नकर्तव्यं भवति॥
(' हलंतादपृक्तलोपः [redacted] संयोगांतलोपश्चेन्न लोपाभावः॥ ॥

प्रियादर्विर्यस्य तत्प्रियदर्वि। अस्ति इति॥ श्वेतादिसिद्धमिति वचनात्। अर्थेवदिति॥ क्विबादयः कर्त्तरि क्विबितिप्रतिज्ञापिते नार्थेनार्थवत्त्वं। वसेति॥ अनुनासिकवकार
स्येदमनुकरणं वेरिति॥ हल्ङ्या॥ ॥ द्विहलपृक्तग्रहणमिति॥ आपो दीर्घात्सोरिलोपो वक्तव्यमित्यर्थः॥ ॥ ॥

मा०कौ०६ राजेति॥ नलोपे कृते खसंयोगान्तलोपस्यासिद्धत्वान्नकारान्तं पदं न भवति किं तर्हि सकारान्तं॥ पदान्तु स्वादिष्विति सर्वनामस्थाने पञ्चीति अपञ्चिसर्वनामस्थाने पूर्वं पदमिति व्याख्या
३५ तन्तदा सावपि परतः पदसंज्ञायां सत्यां नलोपः सिध्यति कृते लोपे तु नलोपे संयोगान्तत्वाभावात्सुलोपो न प्राप्नोति सुभयथा दोषप्रसंगः॥ पुंस्त्विति। ननु चात्र नकारलोपएव न प्राप्नो
ति। सुलोपस्यासिद्धत्वात् नैष दोषः। पूर्वत्र परस्यासिद्धत्वमुच्यते। तत श्च संयोगान्तलोपे संयोगान्तलोपस्यासिद्धत्वाद्भवत्येव नलोपः। नस्यत्वासिद्धत्वान्नलोपाभावः। आद्य

राजातक्षा संयोगान्तस्य लोपस्यासिद्धत्वात् नलोपो न प्राप्नोति॥ यथा पचन्निति॥ तद्यथा पचन् यन्निमत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न भवति।
नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति सिद्धः। संयोगान्तलोपे नलोप इति। यदयं नदि। संबुद्ध्यो रिति संबुद्धौ प्रति षेधं शास्ति॥ इहापि तर्हि प्राप्नोति॥ पचन् यज
न्। तुल्यजातीयस्य ज्ञापकं भवति कश्च तुल्यजातीयः यः संबुद्धौ वनेतरः। वस्वादिषु दत्वं संयोगादिलोपवल्लोपत्वात्। वस्वादेषु दत्वं वन सिध्यति॥ उ
खाश्रत् पर्णध्वत्। किं कारणं। संयोगादिलोपवलीयस्त्वात्। संयोगान्तलोपात् संयोगादिलोपो बलीयानिति। यथा कूटतडिति। तद्यथा कूटतट्काष्टत
ड्। तत्र संयोगान्तलोपात् संयोगादिलोपो बलीयान् भवति॥ ननु च दत्वे कृते न भविष्यति॥ अप्रसिद्धं दत्वं तस्यासिद्धत्वात् प्राप्नोति॥ सिद्धं काण्डे पठितं वस्वादि
षु दत्वं सोर्दीर्घत्व इति॥ तत्र सोर्दीर्घग्रहणं न क्रियते। वस्वादिषु दत्वं सिद्धमिसेव॥ एवमपि अपदीनत्वान्न प्राप्नोति॥ अथ सावपि पदं भवति राजातक्षा न
लोपे कृते विभक्तेः श्रवणं प्राप्नोति॥ सैषोभयतः स्पाशा रज्जुर्भवति॥ ॥ ॥
न्यासे वा रूपे सिद्धे दृष्टान्त उपात्तः। यः संबुद्धावनेतर इति। पचन्निसत्र नकारसकारेण व्यवहितः। उखाश्रदिति। उखा आसस्त इति। स्थिते संयोगान्तलोप मयपादत्वा द्वाधेला
संयोगादिलोपः प्राप्नोति॥ परोपिद्धप्रवादेव च न प्राप्नोति एषा उत्सर्गे कृते व्येनासिद्धो भवति। संयोगादिलोपे वकृते संयोगाभावात्संयोगान्तलोपाभावः। ततो विभक्तिसकारः।
संसनेरव यवो न भवतीति दत्वं न प्राप्नोति कृष्टत इति। काष्ठंतक्षतीति क्विप्। संयोगादिलोपे कृते षस्य जस्त्व डकारः। दत्वे कृत इति॥ सावपि पदमिति दत्वभावः॥ उभयतस्पाशेति। एम० ३५
स्पशा वाधनस्पर्शनयो रिति भौवादिकस्य। स्पशायहणसंश्लेषणयो रिति चौरादिकस्य वा

तत्सस्येति॥ रेफात्परस्य सकारस्येत्यर्थः। तकारोपीति॥ रात्सस्येति द्वितकारको निर्देशः। यथा लक्षणमिति। लोके प्रयुक्तानामिदमन्वाख्यानमिति। अप्रयुक्ते लक्षणानामप्रवृत्ति
लक्षणं लक्षणमित्यर्थः। तत्रास्य प्रयोगाभावान्न दोषो न प्रयोजनमित्युक्तं भवति॥ अभिनोऽत्रेति॥ भिदेर्लङि. सिपि श्नमि संयोगान्तलोपः। स च परत्वादुत्वस्यासिद्धत्वात्सिद्ध इति॥

रात्रेर्लोपो नियमवचनात्॥ रात्रेर्लोपो वक्तव्यः। अविभर्भवान्। अजागर्भवान्॥ किं पुनः कारणं न सिध्यति। नियमवचनात्। रात्सस्येत्येतस्मान्नियमा
न्न प्राप्नोति॥ नैष दोषः। रात्सस्येत्यत्र तकारोपि निर्दिश्यते। यद्येवं कीर्त्यते प्रत्ययः। कीरिति प्राप्नोति कीर्त इति चेष्यते। यथालक्षणमप्रयुक्ते॥ रोरुत्वं
वा रोश्च्योरुत्वं वक्तव्यम्। अभिनोऽत्रा छिनोऽत्र संयोगान्तलोपस्यासिद्धत्वादतः। अतीत्युत्वं न प्राप्नोति। न वा संयोगान्तलोपस्योत्वे सिद्धत्वात्। न वा वक्तव्यं
किं कारणं संयोगान्तलोपस्योत्वे सिद्धत्वात्। संयोगान्तलोप उत्वे सिद्धः तद्यथा॥ हरिवो मेदिनं इति। तद्यथा हरिवो मेदिनं त्वा इत्यत्र संयोगान्तलोप
उत्वे सिद्धो भवति॥ सत्येवं तर्हि दोषः। सेपो भयतः स्यात इति। तस्मादश्वपो हल्ङ्यादिलोपः संयोगान्तलोपो विज्ञातुं। न चेद्विज्ञायते द्विहल्ङ्यादिग्रहणं ति
स्पोश्च ग्रहणं कर्तव्यमेव॥ एङ्ह्रस्वात्संबुद्धेः॥ संबुद्धिलोप उतरादिभ्यः प्रतिषेधः। संबुद्धिलोप उतरादिभ्यः प्रतिषेधो वक्तव्यः। हे कतरत्। हे कतमत्
किमुच्यते कुतरादिभ्यः। प्रतिषेधो वक्तव्य इति यदा अड्ढ्रस्वेऽस्मिन्ननुवर्तते। ह्रस्वाधिकारस्य निवृत्तत्वात्। निवृत्तोऽह्रस्वाधिकारः॥ ॥

दश्चेति हल्त्वं उत्वे तु संयोगान्तलोपस्यासिद्धत्वाद्व्यवधानादुत्वं न प्राप्नोति। उत्वे सिद्ध इति संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः रसवश्पवक्तव्यमित्यर्थः॥ एङ्। हे कतरदिति॥ कतर
त् इति। इति स्थिते संबुद्धिलोपश्च प्राप्नोति च अड्डादेशः। तत्र शङ्कितस्मात्स्यात्संबुद्धिलोपो नित्यः अड्डावस्था कृते संबुद्धिलोपे न प्राप्नोति। स नित्यः। उभयोरनित्ययोः परत्वादड्डादे
॥ कृते पुनः प्रसंगविज्ञानात्संबुद्धिलोपप्रसंगः॥ ॥ ॥

भा० कौ० ६ अकारलोप इति॥ अकारलोपस्य परनिमित्तत्वाद्दीर्घत्वनिषेधाद्धस्य निवृत्त्याभावः॥ एवमपीति॥ एकदेशविकृतस्यानन्यत्वादिति भावः॥ न चात्राम मिति। मकारस्य

३६ किं उत्तरादिम्पुः प्रतिषेधं वक्ष्यामीत्यतो ऽप्रत्याधिकारो निवर्त्तते॥ नेत्याह। तत्त्वाम र्थे। स चावश्यम प्रत्याधिकारो निवर्त्स्यन्। किमर्थे। अमर्थो। अमो लोपो
यथा स्यात्। हे कुंड हे पीठ। निवृत्ते ऽपि वे अप्रत्याधिकारे अमो लोपो न प्राप्नोति। किं कारणं। न हि लोपः सर्वापहारी। मा भूत्सर्वस्य लोपः। अल्लोन्त्यस्य विध
यो भवंती त्यंतस्य लोपे कृते द्वयोरकारयोः पररूपे सिद्धं स्यात् हे पीठेति। यद्येतल्लभ्येत कृतं स्यात्। तत्तु न लभ्यं। किं कारणं। अत्र हि तस्मादित्युत्तरस्यादेः परस्ये
ति अकारस्य लोपः प्राप्नोति॥ अकारलोपे च संति मकारे ऽतो दीर्घो यञि सुपि चेति दीर्घत्वे हे कुंडां हे पीठां मिति तेन तद्रूपं प्रसज्येत। एवं तर्हि हल्लोलोपः
संबुद्धिलोपः। तद्धल्ग्रहणं कर्तव्यं। न कर्तव्यं। प्रकृतमनुवर्त्तते। क्व प्रकृतं। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलीमिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहा
र्थः। नैष दोषः। एङ्ह्रस्वादित्येषा पंचमी हलितिसायाः प्रथमायाः षष्ठीप्रकल्पयिष्यति। तस्मादित्युत्तरस्येति॥ एवमपि प्रथमयोः पूर्वसवर्णदीर्घत्वे
कृते हे कुंडा हे पीठा इत्येतद्रूपं प्रसज्येत। अपि पूर्वत्वमत्र वा चक्रे भविष्यति। अमीत्युच्यते। न चात्राम् पश्यामः। एकदेशविकृतमनन्यवद्भवतीति॥ अथवा र
दमिह संप्रधार्यं संबुद्धिलोपः क्रियतां एकादेश इति किमत्र कर्तव्यं परत्वादेकादेशः। एवमप्येकादेशे कृते ऽपवर्गाभावात्संबुद्धिलोपो न प्राप्नोति॥ अं
तादिवद्भावेनापवर्गो भविष्यति। उभयत आश्रये नांतादिवत्। नोभयत आश्रयः करिष्यते। कथं। नैवं विज्ञायते ह्रस्वादुत्तरस्याः संबुद्धेर्लोपो भवतीति॥ राम०

लुप्यतां। अथवेति॥ सत्यामेव हल्ग्रहणानुवृत्तौ अयं विचारः। अपवर्गाभावादिति। ह्रस्वात्संबुद्धेरित्युच्यमाने कृते ऽप्येकादेशे नास्ति ह्रस्वसंबुद्ध्योः पौर्वापर्यमित्यर्थः॥ ३६

ह्रस्वादुत्तरस्येति॥ पूर्वं प्रसंगतद्भावाद्ह्रस्वांतमेतद्भवति। संबुद्ध्याक्षिप्तं हि प्रकृतिरूपमेङः ह्रस्वेन विशेष्यत इति तदंतविधिः॥ उक्तं चेति। वक्ष्यमाणपरिहारापेक्षोऽयमाशङ्कः॥ अनुनासिकोपधत्वादिति॥ आदेशस्याकारेणानुनासिक इत्संज्ञको लुप्त इति दकारो विशिष्यते॥ सच भेदाभावात्संबुद्ध्यवयवो न भवतीति न लुप्यत इति भावः। साधीय इति। व्यपदेशिवद्भावाद्यथा हेवृक्षेत्यादाविति भावः। उच्चारणादेवेति॥ उकिलते स्वमोर्नपुंसकादिति स्वमोर्लुक् क्रियते॥ एवमपीति॥ अकाराद्ह्रस्वात्परत्वाद्दकारस्येति भावः॥ विहितविशेषण

कथं तर्हि ह्रस्वादुत्तरस्य हल्लोपो भवतीति॥ सचेत्संबुद्धेरिति। उत्तरणादिभ्यः एतर्हि प्रतिषेधो वक्तव्यः न वक्तव्यः। उक्तं वा। किमुक्तं। सिद्धमननुनासिकोपधत्वादिति॥ एवमपि दलोपः साधीयः। प्राप्नोति॥ उच्चारणार्था। अथवा उकू उत्तरार्हीनामिति वक्ष्यामि। उच्चारणार्था। अथवादिदच्छब्दः करिष्यते। स तर्हि इकारः कर्तव्यः क्रियते न्यास एव। द्विइकारको निर्देशः॥ अड्डुः तरादिभ्य इति॥ एवमपि लोपः प्राप्नोति। विहितविशेषणं ह्रस्वग्रहणं। यस्माद्ध्रस्वात्संबुद्धिर्विहितेति॥ अपृक्तसंबुद्धिलोपाभ्यां लुक्॥ अपृक्तसंबुद्धिलोपाभ्यां लुग्भवति विप्रतिषेधेन। अपृक्तलोपस्यावकाशः। गोमान्। यवमान्। लुकोऽवकाशः त्रपु जतु। इहोभयं प्राप्नोति॥ तद्ब्राह्मणकुलं। यद्ब्राह्मणकुलं। संबुद्धिलोपस्यावकाशः। अग्ने वायो। लुकः स एव। इहोभयं प्राप्नोति॥ ॥ ॥

मिति॥ प्रतिपादितत्वात्तदंतविधेर्ह्रस्वांतात्परस्य संबुद्धिसंबंधिनो हल्लोपो भवतीति सूत्रार्थः॥ ततश्च सामर्थ्यात्प्रकृतिरूपावयववद्ध्रस्वग्रहणं तु यस्मात्तु यस्माद्ध्रस्वात्संबुद्धिर्विहिता तस्मादेव परस्य हल्लोलोप इत्यर्थोऽवतिष्ठते। तेन कतरदित्यत्र टिलोपे कृते प्रकृतेर्ह्रस्वांतत्वाभावाद्दकारलोपो मा भावः॥ ॥ ॥

मा० कौ० ६ हे त्रप्विति॥ लुङि कृते प्रत्ययलक्षणप्रतिषेधात्संबुद्धिगुणाभावः। इकोऽचि विभक्ताविति नुम् च लुग्ग्रहणस्य प्रयोजनं वक्ष्यते इह किं। चित्रग्वे इति। ततो गुणेन भाव्यं न वक्तव्य इति॥
३७ न व्याख्यातव्यः कस्मादित्याह। न चेति। अन्तरंगानपि विधीन्बाधमानो लुग्बलवान् इत्यस्य तुल्यबलेन लोपेन सह द्वन्द्वो नार्हतीति विप्रतिषेधो नोपन्यसनीयः। अनु

हे त्रपु। हे जतु। लुग्भवति विप्रतिषेधेनास्तु तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः। न वा लोपलुकोर्लुग्बधारणाद्यथा न दुष्यत इति॥ न चाप्येवं विप्र
तिषेधे न किंकारणं। लोपलुकोर्लुग्वाधारणात्। लोपलुकोर्हि लुग्बाध्यते। लुक्स्तोपयानां यथा वा यावेकादेशेऽम्पोयथा न दुष्यत इति॥ तद्यथा। अ
न्यद्धानि वा चरति अनडुह्यत इमं त्र लोपलुकोर्लुग्बाध्यते॥ शेः छन्दसि॥ अयं योगः शक्योऽवक्तुं। कथमस्मेत्रीनेवाजिनात्रीषधस्थ्या। नानापिंडा
नामिति। पूर्वसवर्णेनाप्येतत्सिद्धं। नसिध्यति॥ नुमाप्यवहितत्वात् पूर्वसवर्णो न प्राप्नोति। छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः। मधोर्गृह्णातीति। मधोस्त
प्ता इवासते इत्येवमर्थं। तत्र पुंवद्भावेन नुमो निवृत्तिः। नुमि निवृत्ते पूर्वसवर्णेन सिद्धं। भवे सिद्धं। अस्मेत्रीनेवाजिनात्रीषधस्थ्या। इदं न सिध्यति। नानापिं
डानामिति॥ इदमपि सिद्धं। कथं सामान्यकृते पूर्वसवर्णे कृते पुनः षाष्ठिको भविष्यति॥ एवमपि ज्यसि गुणः प्राप्नोति। वक्ष्यत्येतत्। जसादिषु छन्दो वा वचनं प्रा
ङ्णौ चङ्युपधायाः ह्रस्वः। तु किं पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च। तुकि पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति॥०॥

ध्यत इति। सुलोपे सति प्रत्ययलक्षणेन नुमा नौस्मातां लुङि प्रत्ययलक्षणप्रतिषेधान्न भवतः॥ शेश्छं॥ नमोनुहन्त्रिरिति। अमहन्त्रिरेवानिवृत्तिः॥ नानापिंडानामि
ति॥ तद इति। स्थिते नादिवीति पूर्वसवर्णदीर्घप्रतिषेधाद्गुणः प्राप्नोति। सामान्यिक इति॥ सुपां सुलुगिति आकारस्याकारे कृते वा शेरः पूर्वसवर्णदीर्घः क्रियते। जसि गुण इति राम०
१ अस्मेत्रीन इत्यत्रेति भावः। ह्रस्वस्य पूर्वान्तकरणे क्षा पूर्वकारित्व मदर्शनापात्र विचारः॥ ॥ ३७

ग्रामणिपुत्र इति॥ अत्र तु गन्तरंगो ह्रस्वो बहिरंगः पूर्वत्र तु बहिरंगः स्वरह्रस्वावन्तरंगौ॥ परीतादेति॥ तनोतेः क्विपि क्वौ वुगमादीनामित्यनुनासिकलोपः॥ तत्र तु रिपरादौ क्रियमा

आराशस्त्रिच्छत्त्रं धानाशष्कुलिच्छत्त्रं॥ निष्कौशाम्बिच्छत्त्रं निर्वाराणसिच्छत्त्रं॥ द्विगुसस्वरः। पंचारत्निच्छत्त्रं। दशारत्निच्छत्त्रं॥ तुक्कृते। न जंतत्वादेते विधयो न
प्राप्नुवन्ति॥ न वा बहिरंगलक्षणत्वात्। न वा एष दोषः। किं कारणं बहिरंगलक्षणत्वात्। बहिरंगलक्षणस्य ह्रस्वे ऽन्तरंगा एते विधयः। असिद्धं बहिरंगमं
तरंगे। इह तर्हि ग्रामणिपुत्रः सेनानिपुत्रः ह्रस्वत्वे कृते तुक् प्राप्नोति॥ ग्रामणिपुत्रादिषु वा प्राप्तिः॥ ग्रामणिपुत्रादिषु वा प्राप्तिः किं कारणं। बहिरंगलक्षण
त्वादेव। अथवा परादिः करिष्यते। परादौ संयोगादेरित्यतिप्रसंगः॥ परादौ संयोगादेरित्यतिप्रसंगो भवति॥ अपच्छायात्। वाग्न्यस्य संयोगादेरित्येवं प्रसज्येत।
विलोपवचनं च। वेश्च लोपो वक्तव्यः। अग्निचित् सोमसुत्। अपृक्तस्येति वेर्लोपो न प्राप्नोति। नैष दोषः। अपृक्तग्रहणं न करिष्यते॥ यदि न क्रियते दर्विः जागृविः
अत्रापि प्राप्नोति॥ अनुनासिकपरस्य विशब्दस्य ग्रहणं अनुदुपरश्चात्र विशब्दः। एवमपि सतुक्कस्य लोपः प्राप्नोति॥ इट्प्रतिषेधश्च॥ इट्प्रतिषेधश्च वक्तव्यः॥
परीततसतुक्कस्य बलादिलक्षण इट् प्रसज्येत। एवं तर्हि अभक्तः करिष्यते। अभक्ते स्वरः। यद्यभक्तस्तर्हि स्वरभेदो भवति नेदधिच्छादयति। मधुच्छादयति। तिङ्ङः तिङः
इति निघातो न प्राप्नोति॥ ननु च तुगेवातिङ्। न तुक्कः परस्य निघातः प्राप्नोति किं कारणं नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥ नञ्युक्ते इवयुक्ते वाऽन्य
स्मिंस्तत्सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते॥ तद्यथा अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमेवानयति॥ नासौ लोष्टमानीय कृती भवति॥ एवमिहाप्य
(अतिङ् अतिप्रतिषेधादन्यस्मिंस्तिङ्सदृशे कार्यं विज्ञायते॥० ॥
णादृष्टप्रसंगः नहिवृत्तीतिदीर्घः॥० ॥ ॥श्री॥ ॥श्री॥ ०॥

भा०कै०६ संहितायां ॥ परः संनिकर्षो वर्णानां वर्णान्तरेण कालेनाव्यवधानं सा संहिता ङ्कारादिर्विरामो वा । ङ्कारशब्देन वर्णाभिव्यक्तिहेतुर्ध्वनिरुच्यते । तेनैव वर्णाभिव्यक्तिहेतुना दानेन तरमे
३८ वपदानां दान्तरं वर्णान्तराभिव्यक्त्युच्चार्यते तदा संहिता सा च । निरंतरवर्णद्वयविषया ततश्चाग्निविरतेत्यादाविकाराकारयोस्तवर्गीयेन विच्छेदात् संहिताभावाय णोपसंगान्त्रि
र्दिष्टग्रहणमानन्तर्यार्थं न कर्तव्यमित्याहुः त्रिप्रकारमिति । आधारस्त्रयो भेदास्तद्भेदानं त्वानेसमित्याऊः । व्यापकमिति । यथा दध्नि सर्पिः तिलेषु तैलमिति । औपश्लेषि
कमिति ॥ यथा कटे शेते । मथुरायां वसतीति ॥ सर्वावयवव्याप्त्यभावात्कटादेर्व्यापकत्वाभावः । वैषयिकमिति । यथा खे शकुनयः ॥ गुरौ वसतीति ॥ अन्यदत उपश्लेषादिति ।

संहितायां ॥ अयं योगः शक्योऽवक्तुं कथं । अधिकरणं नाम त्रिप्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति ॥ शब्दस्य च शब्देन कोऽन्योऽभिसंबन्धो भ
वितुमर्हति ॥ अन्यत्र दउपश्लेषात् । इकोयणचि अचि उपश्लिष्टस्येति तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति ॥ ॥

ननु च न्यायेऽधातुकर्त्रादौ विषयसप्तमीपक्षस्याश्रितत्वात्सकपमिह संबंधांतराभावः ॥ उच्यते । यदा सामान्यस्य प्राधान्यमाश्रीयते तदा तेन पौर्वापर्याभावाद्विषयभावश्चा
श्रीयते । विशेषस्य तु प्राधान्य आश्रीयमाणे तेन पौर्वापर्यसंभवादुपश्लेषाश्रयणं । तत्र को प्रमाणं इत्यादौ विशेषः प्राधान्येनाश्रीयते न तु सामान्यमिति न कश्चिद्दोषः ।
उपश्लेषे वाश्रिते निर्दिष्टग्रहणमपि न कर्त्तव्यं । व्यवहितयोरुपश्लेषाभावात् । उपश्लेषनिमित्तकार्यप्रसंगात् संहिताधिकारे च प्रसारव्यानोसंहितासंज्ञापि प्रयोजना एम०
भावात् प्रत्याख्यातैव ॥ ॥श्री॥ ॥०॥ ३८

आङ्। आङ्माङोरिति। कर्मप्रवचनीयग्रहणमुपलक्षणार्थं तेनेषदर्थस्याप्याङो ग्रहणं। ईषच्छाया आच्छायेति। वाक्यस्मरणयोस्त्वाकारस्येहणमावादिकल्लोभवति। आच्छा
या। आच्छायेति। इको यणि। इग्ग्रहणमिति। वक्ष्यमाणेऽभिप्रायः। जस्त्वमत्रेति। परत्वादिति भावः। उभयोरप्यनित्यत्वादस्ति विप्रतिषेधः। तत्र शब्दान्तरप्राप्त्या यणो नित्यत्वे
जस्त्वस्यतु कृते यणप्राप्तौ। जस्त्वमिति॥ पूर्वत्रासिद्धमिति जस्त्वस्यासिद्धत्वात्सिद्धयोर्विप्रतिषेधाभावाद्ग्रहणदेशमेवात्र निष्प्रतिद्वंद्विनं प्राप्नोति पश्यं। यश्चेति। पदान्तस्य जश्च्वे

आङ्। अपपरिमर्यादामाङ्योः सानुबंधकयोर्निर्देशः। आङ्माङोः सानुबंधकयोर्निर्देशो गतिकर्मप्रवचनीयप्रतिषेधसंप्रत्ययार्थः। आङ्माङोः सानुबंधक
योर्निर्देशः क्रियते। आङ्योगे गतिकर्मप्रवचनीयसंप्रत्ययार्थं माङः प्रतिषेधसंप्रत्ययार्थः। इह माभूत्। आच्छाया ममाच्छेदः। दीर्घात्पदान्ताद्वा। दीर्घात्पदान्ता
द्वा विभ्रुजनादीनां छेदसि। दीर्घात्पदान्ताद्वेत्यत्र विभ्रुजनादीनां छेदस्तु पंसंख्यानं कर्तव्यं। विभ्रुजनस्यछत्रं। विभ्रुजनस्यच्छत्रं। नछायांकुरवो परोन
च्छायांकुरवोपरो। इको यणि। इग्ग्रहणं किमर्थं। इह माभूत्। अग्निचिदत्र सोमसुदत्र। नैतदस्ति प्रयोजनं। जश्त्वमत्र बाधकं भविष्यति। जश्त्वेन सिद्धे यणमत्रप्
रूपं। असिद्धमत्र जश्त्वं तस्यासिद्धत्वाद्ग्रहणदेशः प्राप्नोति॥ पश्चात्पदान्तो हलवम्यपूर्वः पश्चात्पदान्तो हलचवम्यपूर्वः तस्य प्राप्नोति पचतीत्ति॥ एवं तर्हि दीर्घस्य यणादे
शं वक्ष्यामि तद्दीर्घग्रहणं कर्तव्यं न कर्तव्यं। प्रकृतमनुवर्तते॥ क्व प्रकृतं दीर्घात्पदान्ताद्वेति तद्वै पंचमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः॥ अचीत्येषा सप्तमी दीर्घादिति
पंचम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति। भवेत्सिद्धं कुमार्यत्र ब्रह्मबन्ध्वर्थमिति॥ इदंतु न सिध्यति। दध्यत्र मध्वत्रेति। ह्रस्व इति। प्रकृतं ह्रस्य

स्या घानादपदंतहलोपिपरे दे वेमर्थः॥ अची सेषेति। अलान्त्यापोसप्तमी दीर्घादिति पंचम्याः पूर्वत्र पौर्वापर्य कल्पनेऽलन्त्याया षष्ठ्याः प्रकल्पिका इति भावः। पूर्वत्र तु छे इति
सप्तम्याश्छेत्वेऽत्रालन्त्याया अपि दीर्घादिति पंचम्याशाछ्यासादेत्यादेर्शीकाल्पषष्ठीनप्रकल्पिता॥ ॥ श्री॥ ॥

[illegible]

भा०कौ०६
३९

ह्रस्वादपीति॥ छे चेत्यस्य तु अपदान्तो ह्रस्वोवकाशः इच्छति गच्छतीति॥ संबंधमिति। यद्येवं छे चेत्यत्रापि दोषः पिति कृतीति संबंधस्य ह्रस्वस्य छेन संबंधाभावप्रसंगात्। नैष दोषः।
छे चेति समुच्चयस्य चशब्देन द्योतनात् छेपि पिति कृति च ह्रस्वस्य तुग्भवति। तदेवं ह्रस्वदीर्घयोर्ये रविधानात् ह्रस्व तस्य प्रकृतिभावस्यैष्टत्वान्नार्थे इग्ग्रहणेन हल्त्वाद्वा वृत्त्य
र्थेनाचूपनमिति। व्यक्तौ पदार्थे प्रति व्यक्ति लक्षणेन प्रवर्त्तितव्यमिसे वो पियणादेशो ग्यादे प्रच्छ पर्यायेण प्रवर्तेरन् अयाय्यादयो नेति। द्रव्येपि पदार्थे उत्सर्गोपवादभा
वः। संदिग्धत्वाश्रयो स्तेवा। सन वक्रव्य इति। इग्ग्रहणमन्तरेणापि इको पति सिद्धे पुनरिग्ग्रहणं शाकलयणादेशयोरेकविषयत्वाद्विकल्पितयोर्व्यवस्थितविभाषार्थं वि

पदितदनुवर्त्ततेदीर्घात्पदान्ताद्वा ह्रस्वस्येति ह्रस्वादपि पदान्तात् विकल्पेन प्राप्नोति। संबंधस्य हि सा संबंधमनुवर्तिष्यते। ह्रस्वस्य पिति कृति तुक् संहितायां। ह्रस्व
स्य पिति कृति तुक्। छे च ह्रस्वस्य पिति कृति तुक् आङ्माङोश्च। ह्रस्वस्य पिति। कृति तुक् दीर्घात्पदान्ताद्वा ह्रस्वस्य पिति कृति तुक्। इको यणचि। ह्रस्वस्येति वर्त्तते
पिति कृति तु गोति निवृत्तं। इह तर्हि प्राप्नोति॥ चयनं चायकोल्लवनं लावकः। अपादयोत्र बाधकाः प्रविष्यन्ति। इह तर्हि प्राप्नोति॥ खट्वैन्द्रः। मालेन्द्रः। खट्वैल
कामालैलका। गुणवृद्धिवाधं गुणवृद्धी अत्र वाधिके भविष्यतः। इदं तर्हि प्रयोजनं। इकः अचि यणेव यथा स्यात्। पदन्त प्राप्नोतिनास्तिदितिकिं
चान्यप्राप्नोति। शाकलं। सिन्नित्यसमासयोः शाकल्यप्रतिषेधं चोदयिष्यति। सन वक्तव्यो भवति। यणादेशः ह्रस्व तत्पूर्वस्य यणादेशः प्लुतपूर्वस्य चेति व
क्तव्यं। अग्ना३ इइन्द्रं। अग्ना३ यिन्द्रं। पटा३ उउदकं। पटा३ वुदकं। अग्ना३ ३ आशा। अग्ना३ याशा। पटा३ उआशा। पटा३ वाशा॥०॥ ॥

त्वायतेत्वेन सिन्नित्यसमासयोर्यणादेश एवास्यत्र तत्प्रयं। अग्ना पिंडमिति। अग्ने ३ इंद्र इति स्थिते। एचोप्रगृह्यस्येति पूर्वस्यार्धस्य मात्राया आकार आदेशः स च प्लुतः। उत्तर राम०
स्य त्वर्धस्य मात्राया उत्तावुदात्तत्वमाकारस्य इतो स्वयुगपद्भवति। प्लुतविकारावेति। प्लुतसंहतौ चेकारा वित्यर्थः। यद्यपि सत्तो सिद्धत्वमिइतोरस्ति। तथापि प्लुतासि ३९
ध्यातपोः सिद्धत्वं प्रतिपादयितुं प्लुतासिद्धात योरसिद्धत्वमुच्यते। वार्त्तिकारं मेला श्रया हि इतोः सिद्धत्वं॥०॥ ॥ ॥

स्वरसंधिष्विति। संधिः संहिता तत्कार्येषु सिद्धिरस्य यथा स्यादिति। ननु च प्रकृतिभाववचनेऽप्येवं प्लुतस्याश्रयणात् सिद्धत्वं स्यादिति कथं ज्ञापकं। नैष दोषः। अने
कल्पनासंभवेऽपीष्टसिद्ध्यर्थमियमेव कल्पनाश्रीयते। स्वरसंधिकार्येषु सिद्धं प्लुतप्रकरणमितीदुतोरपि सिद्धत्वं भवति। दीर्घेति। अग्नापि द्रुमि सादौ अकः स
वर्णे दीर्घ इति दीर्घः। प्राप्नोति। अग्नापाशेत्यादौ लिकोः सवर्णे शाकल्यस्य ह्रस्वश्चेति प्रकृतिभावः। भो पिं द्रुमिति। भो शब्दस्य वर्णव्यत्ययेन छांदसः प्लु

किं पुनः कारणं न सिध्यति॥ अप्सिद्धः प्लुतः प्लुतविकारौ वेमौ॥ सिद्धः प्लुतः स्वरसंधिषु कथं ज्ञायते॥ यदयं प्लुतप्रगृह्या अचीति प्लुतस्य प्रकृ
तिभावं शास्ति तज्ज्ञापयत्याचार्यः सिद्धः प्लुतः स्वरसंधिष्विति। कथं कृत्वा ज्ञापकं। सतो हि कार्यिणः कार्येण भवितव्यं। इदं तर्हि प्रयोजनं। दीर्घशाकल्यप्रतिषे
धार्थं। दीर्घत्वं शाकल्यत्वं च माभूदिति। एतदपि नास्ति प्रयोजनं। आरभ्यते प्लुतश्चैव स्य यणादेशः। तयोर्वा व्विसंहितायामिति। तदेव दीर्घशाकल्यप्रतिषेधा
र्थं भविष्यति तन्न वक्तव्यं भवति। ननु च तस्मिन्नप्युच्यमाने इदं न वक्तव्यं भवति। अवश्यमिदं वक्तव्यं। योऽप्लुतपूर्वो विदुतावप्लुतविकारौ तदर्थं। भो इ
इदं। दं। भो इ यिदं। भो इ इ इह। भो इ यिहेति। यदि तर्ह्यस्य निबंधनमस्ति इदमेव वक्तव्यं तन्न वक्तव्यं। तदप्यवश्यं स्वरार्थं वक्तव्यं। अनेन हि सत्युदात्तस्वरित
योर्यण इत्येषः स्वरः प्रसज्येत। तेन पुनः सत्यसिद्धत्वान्न भविष्यति। यदि तर्हि तस्य निबंधनमस्ति तदेव वक्तव्यं इदं न वक्तव्यं। ननु चोक्तमिदमप्यवश्यं व
क्तव्यं यो — तत्पूर्वो विदुतावप्लुतविकारौ तदर्थं। भो इ पिं दं भो इ पिहेति छांदसमेतत्॥ ॥ ॥

तः। इकारो निपातः। तस्य निपातएकाजनाङिति प्रगृह्यसंज्ञा प्लुतप्रगृह्या अचीति प्रकृतिभावे प्राप्ते यणविधानं। अनेन हीति। स्वरे कर्तव्ये अस्य यणः सिद्धत्वात्तयोर्घो
विसर्जनेन तु यणादेश उदात्तस्वरितयोर्यण इति स्वरेः सिद्ध इति ततः परस्यानुदात्तस्य स्वरितत्वाभावः॥ ॥ ॥

भा०कै०६ दृष्टानुविधिरिति॥ सर्वे विधयश्छन्दसि विकल्प्यन्त इति भवत्येव मावाससवर्णदीर्घत्वाभावे यणभावे एव्यतीत्यर्थः। एषोपीति। छान्दसत्वे दमनुकरणं सान्नो नामधेयत्वेन प्रसिद्ध
४० मित्यर्थः। गीतिरहितं स्वरूपमात्रमनुक्रियत इति। अनुकरणे गीत्यभावः। सामर्थ्ययोगादिति। शास्त्रसामर्थ्यात्तत्रार्थस्य बस्यापनात्क्वचिद्वित्यदमात्रमपीहानर्थकमि

दृष्टानुविधिश्छन्दसि भवति। यत्र हि न छान्दसं। मो ऽपि हे तिसामगायति। एषोपि छन्दसि दृष्टस्यानुप्रयोगः क्रियते। जश्त्वं न सिद्धं यणमत्र पक्षपपश्चात्पदान्तो
हल्त्वं च पूर्वः। दीर्घस्य यण् ह्रस्व इति प्रवर्त्तनं संबंधबस्या गुणवृद्धिवाच्यं। निसेवयः शाकल्यमाकूसमासे तदर्थमेतद्गवोस्वकारं सामर्थ्ययोगान्न हि
किंचिदस्मिन् प्रपश्यामि शास्त्रे पदनर्थकं स्यात्। वीतो पि। चा नो देशेस्यानिनिर्देशः। वां ना देशेस्यानिनिर्देशः। कृत्ते व्यं ओकारयोरिति वक्तव्यं एकारैका
रयोर्माभूदिति। सन्नहि वक्तव्यो न वक्तव्यः। वां तय्य हरणं न क्रियते॥ एचो पि मस्य ये पादयो भवंनीसे वा सिद्धं यदि वां तय्य हरणं न क्रियते चेयं जेया पि सन्त्रा
पि प्राप्नोति। क्षय्य जय्यौ शक्यार्थ इत्येतन्नियमार्थं भविष्यति। क्षिय्योरेवेचेति॥ तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति॥ क्षेपं पापं जेयो वृषल इति॥ उभय
तो नियमो विज्ञास्यते। क्षिज्योरेवैवस्ययोश्च शक्यार्थ एवेति। इहापि तर्हि नियमान्न प्राप्नोति। लव्यं पव्यं अवश्यलाव्यं पव्यं। अवश्यपाल्यं। अवश्यपाव्यं।
तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथाजातीयकः क्षिज्योरेचा। कथंजातीयकः क्षिज्योरेच। एकारः एवमपि रायमिच्छति रैयति अत्रापि प्रा
प्नोति। रायिः छान्दसः। दृष्टानुविधिश्छन्दसि भवति। गोर्यूतौ छन्दसि। गोयूतौ छन्दस्युपसंख्यानं कर्त्तव्यं। आनो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं। गोपूरिमिसेवा
न्यत्रा अध्वपरिमाणे च। गोर्यूतौ उपसंख्यानं कर्त्तव्यं गव्यूतिमध्वानं गतः॥ गोरिति किमिसेवान्यत्रा च। तो तन्निमित्तस्यैवकारः किमर्थः। नियमार्थः। नैतदस्ति प्रयोजनं। सिद्धे विधिरा
रभ्यमाणो। तरेसो वकारो नियमार्थो भविष्यति। इष्टतोऽवधारणार्थस्तर्हि। यथैवं विज्ञायेत धातोस्तन्निमित्तस्यैव मैवं विज्ञायि धातोरेव तन्निमित्तस्येति किं च स्यात्। अधातो

स्यर्थः। वां तो। वां तादेश इति। पूर्वं त्वस्यानिविशेषत्वस्य यथासंख्यासंबंधात्। इह तु निमित्ताभावान्नतामा भावः॥ उभयतो नियम इति॥ योगविभागाश्च यणादिति भावः॥ रायिः छान्दस राम०
इति। एतद्राव्यवशात भाषायां रैशब्दो साधुरिति लक्ष्यते॥ अय्वाकाच परएवेरापिः छान्दस इति व्याख्यायते॥०॥ ॥ ॥ ४०

कुप्य·

नदिसनेनेति। प्रकृत्यर्थस्य प्राधान्यात् पर्युदासे पितद्रव्यग्रहणमयुक्तं। तथा हि यदि सुवर्णार्थस्तदर्थ इति तत्पुरुषस्तत्राश्रीयते तदावश्यमेव सुवर्णे स्मिन्नर्थे कुप्यशब्दो वर्त्तेत इति नार्थस्त दर्थग्रहणेन। अथ सोर्थो यस्यासौ तदर्थः शब्दः तदा शब्दस्यैव तत्सम्भवात् तदर्थग्रहणमनर्थकमिति मत्वा पृच्छति। सएवेति। प्रधानस्य परामर्शासंभवे गुणभूतस्य प्रकृत्यर्थस्य विनिमयलक्षणस्य परामर्शस्तस्य क्रयाय यदा प्रयोगवादिच्छया विवक्षापितं तत्र कुप्यशब्दो निपात्यते। क्रेयमिति। मूल्येनोपादातव्यमित्यर्थः। नचास्ति क्रय्यमिति आपणे क्रयाय प्र

×मर्शोन युक्तः प्रत्ययार्थ परा×२

कुप्य·

नदिसनेनकिं प्रतिनिर्दिश्यते स एव क्रीणातेर्यथ इह मा भूत्। क्रेयं नो धान्यं [redacted] नचास्ति क्रय्यमिति भय्या भय्यादिप्रकरणे हृदय्या उपसंख्यानं। भय्यादिप्रकरणे हृदय्या उपसंख्यानं कर्त्तव्यं। हृदय्या आपः। अवशस्य च। अवादेशो भवतीति वक्तव्यं। शरस्य च हृदस्य च वांता देशो वक्तव्य आपः। शरव्या वेतेजनं। शरव्यस्य पञ्चनभि धातुकः स्यात्। शरुवज्राद्वा सिद्धं। शरुर्वज्रा द्वा पुनः सिद्धमेतत्। कं जतिश [redacted] रुरित्यपि शरुद्यव्य प्रवृत्तिर्दिश्यते। शरुहस्त इति च लोके शरहस्तमुपाचरंति॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य प्र

थमे पादे तृतीयमाह्निकं॥ ॥श्री॥ ॥श्री॥ ×व्या·ऋ·द·२

=विक्रयोनाम न लाभे प्या द्व्यद्रव्य ग्रहणं द्रव्यं धान्यादि दानं· अत्र बोध्यत्व विशेषोनफले·१=

प्रसारितं धान्यं ना स्तीत्यर्थः। केचित्तु कुप्यशब्दं क्रीणातिर्विक्रये वर्त्तेत इति व्याचक्षते तेनापरो विक्रयार्थं यद्रव्यं न्यस्तं तत्कुप्यमित्यर्थः। भय्या हृदय्या इति। हृदे भवाः भवे छंदसीति यत्प्रत्ययः। अकारस्यापादेशः। शरव्यस्येति शर शब्दस्य पति परतोऽकारस्यावादेशः। शरुवज्रादिति। शरुशब्दः प्रत्ययान्तस्त्रिही त्यौणादिकस्तस्माद्यतिकृते ओर्गुण इति गुणे वांतो यिप्रत्यय इति वांतादेशे च सिद्धः शरव्य इति॥ ॥ इति महामहोपाध्यायजैय्यटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठाध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥ ॥ ॥

एकः पूर्वपरयोः एकवचनमिति। आदुणाइत्यादावेकस्यादेशस्य सूत्रउपादानात् संख्याया अविवक्षितत्वाच्छष्ठोपात्तसंख्यात्यागेकारणाभावात् गुणभेदे प्रधानस्याभेदात्तस्थानिभेदेप्येकस्येवादेशस्य प्रवृत्तिः सिद्धेतिप्रश्नः। पृथगादेशप्रतिषेधार्थमिति आदेशस्य विधेयत्वात्प्राधान्यात्प्रधाने चग्रहं समाष्टि इत्यादौ संख्याया अविवक्षितत्वात्स्था

=अत्र संस्कार्यत्वाकृतस्य प्राधान्यं गुणादेरपि विभेयस्य साधुत्वेन संस्कार्यबाधाधान्यमिलाशयः।१=

एकः पूर्वपरयोः एकवचनं किमर्थं एकवचनं पृथगादेशप्रतिषेधार्थं एकवचनं क्रियते एक आदेशो यथा स्यात् पृथगादेशो मा भूदिति। न वा द्रव्यवत्कर्म

चोदनायां द्वयोरेकस्याभिनिर्वृत्तेः। नवा एतत्प्रयोजनं किं कारणं। द्रव्यवत्कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तेः एक आदेशो भविष्यति। तद्यथा द्रव्ये शुक्ल

मचोदनायां द्वयोरेकस्याभिनिर्वृत्तिर्भवति। अनयोः पूलयोः कटं कुरु अनयोर्मृत्पिंडयोर्घटं कुरु इति न चोच्यते एकमिति एकं चासौ क[redacted]

रोति। किं पुनः कारणं द्रव्ये शुक्लमचोदनायां द्वयोरेकस्याभिनिर्वृत्तिर्भवति। नचैकवाक्यभावात्। एकवाक्यभावात् द्वयोरेकस्या

भिनिर्वृत्तिर्भवति। आत श्चैकवाक्यभावात्। व्याकरणेऽपि षष्ठ्यन्तद्वयोः स्थानिनोरेक आदेशो भवति। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। मस्जोरुप

धयोरन्यतरस्यामिति। यत्तावदुच्यते एकवाक्यभावादिति तन्न अप्यन्यकारणाद्धि लोके द्वयोरेकस्याभिनिर्वृत्तिर्भवति। अपर्याप्तत्वाच्चैकेन भवति

कमे२ प्रकरणं वाक्यत्वभवति। इदमेवैकमेकमिति। आत श्चार्थाद्वा प्रकरणाद्वा व्याकरणेऽपि हि अन्यत्र द्वयोः स्थानिनोर्द्वावादेशौ भवतः। एहाम्पां निष्ठातो

नः पूर्वस्य च दः उभौ सुप्या सस्येति। कथं यत्तदुक्तं व्याकरणेऽपि हि अन्यत्र द्वयोः स्थानिनोरेक आदेशो भवति। ज्वरत्वरस्रिव्यविमवामुपधायाश्च म

स्जोरुपधयोरन्यतरस्यामिति। इहतावज्ज्वरत्वरस्रिव्यविमवामुपधायाश्चेति तत्रां द्वौ उगौ नास्ति दोषः॥ ॥श्री॥ ॥

निभेदाद्द्वावादेशौ स्यातामिति सेकग्रहणं कृतं नवेति। कर्मचोदनाकर्मणः कारकस्य क्रियमाणत्वेन याचोदनातस्यामित्यर्थः। एकवाक्यभावादिति। यथोपात्तविशिष्टकारकान्वितक्रि राम०

यैव साध्यमाना वाक्यार्थ इत्यर्थः॥ ॥श्री॥ =कर्मशब्दस्य कारकपरत्वादिति भावः।१ ॥श्री॥ ॥श्री॥ ॥ ४१

=येन रूपेण संख्याया दे शिष्येन वाक्यिषामांसाध्यमानत्वं कारकसंबंधादवगंतव्यमित्यगेनक्रियासाधनस्य ... =पक्षसंख्याकंपपूर्वपकारकमनुपानंत तत्संख्याकेन तद्रूपेण नेनान्विताक्रियैव वाक्यार्थ इति भावः।१=

आगमोऽमित्विति तेन नामौ द्वयोः स्थाने विधीयमान इमनेकोनाम भविष्यतीत्यर्थः। उभौग्रहणसामर्थ्यादिति प्राप्तिप्रतीत्यादौ अनित्वेऽस्मिन्ने नोपसर्गोदनन्तरे स नकारस्य णत्वे सि
द्धे साभ्यासस्येत्येतावता वृत्ते वर्द्धयोर्नकारयोर्णत्वं सिद्धमिति सुभौग्रहणमादेशनिर्देशार्थं विज्ञायते साभ्यासस्यानिते हभौ णकारौ भवत इति तद्देवमेकग्रहणं प्रत्याख्यातं। आकृण

= तदेवमागमवद्भूतस्यादिलोपनिवर्तकमेकमेव स्यात् उभौग्रहणं तु उभयोरादेशार्थमितिभावः। १ =

सवर्णदीर्घत्वेन सिद्धं। इह प्रस्नोरेपधयोरमन्यतरस्यामिति वक्ष्यति तेन तां प्रस्नोरेपधयोर्लोपः आगमोऽस्मिन्विधीयत इतीयदुच्यतेऽस्य योत्सर्करणादेतित
न्ने किं कारणं एकवाक्यभावादेव लोके द्वयोरेकस्याभिनिर्देशोनिर्भवति। आत स्त्रै कवाक्यभावात्। अंग हि भवानध्याम्यं पांसुलपादमप्रकरणज्ञमागतं ब्रवीतु
अनयोः पूलयोः कटं कुरु अनयोर्मस्पिंड्योर्घटं कुर्विति। एकमेवासौ करिष्यति। कथं यदुक्तं व्याकरणेऽपि द्वयोरन्यत्र द्वयोः स्थानिनोर्द्वावादेशौ भवतः। र
दाभ्यां निष्ठातो नः पूर्वस्य च दः उभौ साभ्यासस्येति। इह तावद्रदाभ्यां निष्ठातो नः पूर्वस्य च द इति द्वे वाक्ये। कथं। योगविभागः करिष्यते। रदाभ्यां निष्ठातो नः
ततः पूर्वस्य च द इति। इहापि उभौ साभ्यासस्येति उभौग्रहणसामर्थ्यात् द्वावादेशौ भविष्यतः। तत्रावयवे शास्त्रार्थसंप्रत्ययो यथा लोके। तत्रावयवे शा
स्त्रार्थसंप्रत्ययः प्राप्नोति यथा लोके। तद्यथा लोके वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। गर्भाष्ट
मे ब्राह्मणमुपनयेदिति सकृदुपनीय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। तथा त्रिर्हृदयंगमाभिरद्भिरप्रयताभिरुपस्पृशेदिति सकृदुपस्पृश्य कृ
तः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। एवमिहापि सकृद्वृद्धे कृतः शास्त्रार्थ इति कृत्वा मालेन्द्रादि पुनर्न स्यात्॥ ॥श्री॥ ॥

इत्साह्मसंख्यायाः शास्त्रोपात्ताया विवक्षणात्। यत्र तु संख्या न विवक्ष्यते तत्र लक्ष्यसिद्धिरविवक्षितत्वे हेतुः। तत्रावयव इति। व्यक्ति समुदायापेक्षया एकाव्यक्तिरवयव स्तत्रैव शास्त्री
यं कार्यं प्राप्नोतीत्येतावतैव शास्त्रार्थस्यानुष्ठानान्न तु सर्वासु व्यक्तिष्वित्यर्थः॥ ॥श्री॥ ॥ श्री॥ ॥

= तस्यापत्यमित्यादौ। २ =

भा०कै०
४२

सिद्धं त्विति। साधुभिर्भाषितव्यमिति धर्मनियमोऽनेन क्रियत इत्यर्थे प्रतिपादनाय प्रयुज्यमानेषु सर्वेष्वेव शब्देषु इदं शास्त्रमन्वाख्यानाय प्रवर्त्तते न तु कस्यांचिदेव शब्दव्य
क्तावित्यर्थः। अनवयवेनेति। साकल्येनेत्यर्थः। तथा पूर्ववया इति। न केवलं निषेधः सर्वविषयोऽनुष्ठीयते यावद्विधिरपि यथासंभवमिति दर्शयितुमुपन्यासः। अग्न्याधा

सिद्धं तु धर्मोपदेशने अनवयवविज्ञानाद्यथा लौकिकवैदिकेषु। सिद्धमेतत्। कथं। धर्मोपदेशनमिदं शास्त्रं धर्मोपदेशने चास्मिन् शास्त्रे अनवयवेन शा
स्त्रार्थः संप्रतीयते यथा लौकिकवैदिकेषु च कृतान्तेषु। लोके तावत् ब्राह्मणो न हन्तव्यः सुरा न पेयेति। ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीयते। यदि
चावयवेन शास्त्रार्थसंप्रत्ययः स्यात् एकं च ब्राह्मणमहत्वा एकां च सुरामपीत्वा अन्यत्र कामचारः स्यात्। तथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति पूर्ववयो
मात्रं प्रत्युत्थीयते यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यात् एकं पूर्ववयसं प्रत्युत्थायान्यत्र कामचारः स्यात्। तथा वेदे खल्वपि वसन्ते ब्राह्मणोऽग्निष्टोमा
दिभिः क्रतुभिर्यजेतेति। अग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यात् सकृदिष्ट्वा पुनर्द्वितीयायां न प्रवर्त्तेत। उभयथेह
लोके दृश्यते। अवयवेनापि शास्त्रार्थसंप्रत्ययोऽनवयवेनापि। कथं पुनरिदमुभयं लभ्यं। लभ्यमित्याह। कथं। इह तावद्वसन्ते ब्राह्मणोऽग्नीनादधीते
ति अग्न्याधानं यज्ञमुखप्रतिपत्त्यर्थं। सकृदाधाय कृतः शास्त्रार्थः प्रतिपन्नं यज्ञमुखमिति कृत्वा पुनः प्रवृत्तिर्न भवति। अतोऽत्रावयवेन शास्त्रार्थः संप्र
तीयते। तथा गर्भाष्टमे ब्राह्मणमुपनयेत इत्युपनयनं संस्कारार्थं सकृच्चासावुपनीतः संस्कृतो भवति अतोऽत्राप्यवयवेन शास्त्रार्थः संप्रतीयते। तथा
त्रिर्हृदयंगमाभिरद्भिः शाखाभिरुपस्पृशेदिति उपस्पर्शनं शौचार्थं सकृच्चासावुपस्पृश्य शुचिर्भवति॥ अतो चाप्यवयवेन शास्त्रार्थः संप्रतीयते। इहेदा

नीब्राह्मणो न हन्तव्यः सुरा न पेयेति

न निमित्तमिति। अग्न्याधानं निमित्तमस्येति बहुव्रीहिः। सत्यग्न्याधाने अग्निष्टोमादिष्वधिकारात्। यज्ञमुखमिति। यज्ञद्वारं यज्ञोपाय इत्यर्थः॥ ——— ॥श्री॥ एम०

=यजनक्रियाविशेषणं॰= ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ ४२

=संस्कृताग्निसंपादनार्थत्वादाधानस्य संपन्नेष्वग्निषु प्रयोजनाभावात्पुनः करणमिति भावः॰=

=अंगयस्त्वेनफलंप्रसंगप्रतोयागउच्यते.१=

ब्राह्मणवध इति। एकस्मिन्नपि ब्राह्मणे प्रतीयते। ऊर्ध्वं प्राणा इति। अर्थवादोऽयं प्रत्युत्थानप्रशंसापरः। वसंत इति। अंगभूयस्त्वमिति काम्यानि कर्माणि पुनः पुनरधिकारिभिरनुष्ठीयं
ते यस्य पुनः कामिता नास्ति नासौ पुनरनुतिष्ठतीत्येवमिति काम्यपि कर्माणि यदा यदा निमित्तावगमः तदा तदावश्यानुष्ठेयानि। नित्यानां तु नित्यत्वादेवाविच्छेदः। अथ यस्त्वे वेति। आदुणा

×हतेनिबेधातिक्रमात्सर्वब्राह्मणविषयोहननिषेधः×२ स्वाकालमयः२

ब्राह्मणवधे सुरापाने च महानदोष उक्तः स ब्राह्मणवधमात्रे सुरापानमात्रे च प्रसक्तः अतो त्रानवयवेन शास्त्रार्थः संप्रतीयते। तथा पूर्ववयसा ब्राह्मणः प्र
त्युत्थेय इति पूर्ववयसः अप्रत्युत्थाने दोष उक्तः। प्रत्युत्थाने च गुणाः। कथं। ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्ता
न्प्रतिपद्यत इति च पूर्ववयोमात्रे प्रसक्तः अतो त्राप्यनवयवेन शास्त्रार्थः संप्रतीयते। तथा वसंते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति इज्यायाः
किंचित्प्रयोजनमुक्तं। किं। स्वर्गे लोके अप्सरसः एनं जाया भूत्वा प्रशेरते न च द्वितीयस्याः तृतीयस्याश्च ज्यायाः फलं भवितुमर्हति [redacted] अतो
त्राप्यनवयवेन शास्त्रार्थः संप्रतीयते। तथा शब्दस्यापि ज्ञाने प्रयोगे [redacted] प्रयोजनमुक्तं। किं। एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके
कामधुग्भवतीति यद्येकः शब्दः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति किमर्थं द्वितीयस्तृतीयश्च प्रयुज्यते न वै कामानां तृप्तिरस्ति। अथ पूर्वप
रग्रहणं परस्यादेशप्रतिषेधार्थं पूर्वग्रहणं क्रियते परस्यादेशप्रतिषेधार्थं परस्यादेशो मा भूत्। आदुणा इति। कथं च प्राप्नोति। पंचमीनिर्दिष्टाद्धि परस्य

×किमर्थं पूर्वपरग्रहणं×१ पर १ देशः प्राप्नोतीति तद्यथा द्वंद्व तस्मात् उपसर्गेभ्यो पई इति। [redacted] ॥श्री॥ ॥

इत्यादावादित्यादिकापंचमी अचीत्यादेः षष्ठी प्रकल्पयिष्यति अचीत्यादिका सप्तम्यादित्यादेरिति मत्वा प्रश्नः। पूर्वपरग्रहणमिति। परस्यैवादेशो मा भूत् पूर्वपरयोर्यथा स्यादि

१ सूर्यः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

=आदितिपंचम्या प्रकृतार्थया पूर्वत्र कृतार्थया अचीति सप्तम्या एव षष्ठी प्रकल्पना इति भावः।१=

षष्ठीनिर्दिष्टार्थं त्विति। निर्देशो निर्दिष्टं तु शब्दस्य शास्त्रार्थः। अनिष्टनिवृत्तिरिष्टसिद्धिश्च प्रयोजनमित्यर्थः। यदुक्तमिति। तस्मादित्युत्तरस्येत्यत्र सप्तमीपंचम्योश्चेति। स्थानेयु
क्ते इदासइस्यादेः। न चोभयोः प्रकल्पनं विप्रतिषेधान्न भवेत्। सूत्रद्वये प्रमाणत्वात् द्वे भवेतां प्रकल्पिके षष्ठ्याविभक्ती तेनात्र तावपि नार्थत्वमाश्रितं। अंता। किम

=ज्ञापकेन चोभयोः प्रकल्पने निरवकाशत्वानवकाशता योगस्येत्यर्थः।१=

षष्ठीनिर्दिष्टार्थं तु पूर्वपरग्रहणं क्रियते। षष्ठीनिर्देशो यथा प्रकल्पेत अनिर्दिष्टे हि षष्ठ्यर्थे प्रसिद्धिः। अप्रक्रियमाणे हि पूर्वपरग्रहणे षष्ठ्यर्थस्या
प्रसिद्धिः स्यात्। कस्य स्थाने यो गत्वस्य। नैष दोषः। आदित्येषा पंचमी अचीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। तथा अचीसे
षा सप्तमी आदिति पंचम्याः षष्ठीं प्रकल्पयिष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्येति। एवं तर्हि सिद्धे सति यत्पूर्वपरग्रहणं करोति तज्ज्ञापयत्या
चार्यः न उभे युगपत्प्रकल्पिके भवत इति। किमेतस्य ज्ञापने प्रयोजनं। यदुक्तं सप्तमीपंचम्योश्च भावादुभयत्र षष्ठी प्रक्लृप्तिस्तत्रोभयका
र्यप्रसंग इति स न दोषो भवति। अंतादिवच्च॥ किमर्थमिदमुच्यते। अंतादिवद्वचनमाभिश्र्यस्यादेशवचनात्। अंतादिवद्वचनं क्रियते।
आभिश्र्यस्यादेशवचनात्। आभिश्र्यस्यायमादेश उच्यते स नैव पूर्वग्रहणेन गृह्यते नापि परग्रहणेन। तद्यथा॥ ॥ ॥

र्थमिति। स्थानिवद्भावेन कार्यो णत्वसिद्धिं मत्वा प्रश्नः। आभिश्र्यस्येति। समुदायस्येत्यर्थः। पूर्वपरसमुदायो ह्येकादेशस्य स्थानी न प्रत्येकं पूर्वपराविति तदाश्रयं कार्यं स्थानिवद्भा
(१वादस्याप्रमनेनातिदिश्यते॥ ॥श्री॥ ॥श्री॥ ॥

क्षीरोदके इति। नियतव्यक्तिविवक्षायां जातिमाश्रित्याभावादेकवद्भावः। पदिति हि समुदायः स्थानी नावयवः तत्र यदुक्तं योऽयमुभयोः स्थाने भवति स लभते सावन्यतरतो व्यपदेशमि

ति स्व दूर्श्पे द्व साद्रोरपरत्वं भवतीति। समुदायव्यतिरिक्तसमुदायाभावात् वस्तुस्थित्या श्रयेणान्यतरतो व्यपदेशाविरोधः। स्थानिवद्भावे तु स्थानी साक्षान्निर्दिष्ट आश्रीयते। न

न्वादेशग्रहणादनुमानिकस्यापादेशस्य स्थानिवद्भावात् स्थान्यप्यानुमानिक आश्रीयते। यथोदाहृतमेऽः पचतु इत्यत्र हीकारेणोकाराणां तः स्थान्यनुमीयते उकारेण एकारांत

स्यादेशः तस्य स्थानिवद्भावात् इदं तं पदमिति पदसंज्ञा भवति। एवमेकादेशस्यानुमीयमानस्थानिवत्पूर्वपरापवाश्रयं कार्यं सिद्धमिति किमनेनातिदेशेन। एवं तर्ह्येन त्वि

क्षीरोदके संपृक्तत्वान्मिश्रत्वान्नैव क्षीरग्रहणेन गृह्यते नाप्युदकग्रहणेन इष्यते च ग्रहणं स्यादिति तेरेणायत्नं न सिध्यतीति वक्तव्यं अन्तादिवद्

च नं एवमर्थमिदमुच्यते अस्ति प्रयोजनमेतत् किं तर्हीति। तत्र यस्यान्तादिवत्त्वनिर्देशः। तत्र यस्यान्तादिवद्भाव इष्यते तन्निर्देशः कर्तव्यः। अस्यान्तव

द्भवतीति अस्यादिवद्भवतीति वक्तव्यं। सिद्धं तु पूर्वपराधिकारात्। सिद्धमेतत्कथं पूर्वपराधिकारात् पूर्वपरयोरिति वर्तते पूर्वस्य कार्यं प्रसंगेन तवद्भवति परस्य

कार्यप्रसादिवद्भवति। अथ यत्रोभयमाश्रीयते किं तत्र पूर्वस्यान्तवद्भवति। आहोस्वित्परस्यादिवद्भवति॥ ॥श्री॥ ॥

=एकादेशे कृते एकाजुत्तरपदत्वाभावात् न स्यात्।१= क्वचिदिति। क्षीरपेलस्यादौ। तत्र हि कृतेन एकादेशे पूर्वः पांतस्तदंतत्वादेकादेशस्यैकाजुत्तरपदत्वात् णत्वं भवति। मयपीत्यंबाकृतत्पूर्व

धौ स्थानिवद्भाव उक्तो। त्विधयर्थमिदं तथा क्षीरपेयेणत्वादौ एकाजुत्तरपदे ण इति णत्वमत्विधिरप्यंतवद्भावाद्भवति। यत्विह वार्त्तिकमन्तादिवचनमामिश्रस्यादेशवचनादिति तत्रादे

शग्रहणमयोजनापरामर्शेन। तत्र पसेति। अन्तादिशब्दयोरवयवविशेषवाचित्वाद्द्वयं वा भिमतमाक्षेपेऽप्यवयवविशेषप्रतिपादनाय तन्निर्देशः कर्तव्यः अस्यार्थः। पूर्वस्येति। क्वचि

दादेशविधानात्मागपो पूर्वपरौ नोपलभ्येते यथा वृक्षौ वृक्षाविसत्र सुपमौका[illegible]रं प्रसादिवद्भावादेकादेशस्य सुबंतं पदमिति पदसंज्ञा भवति। क्वचित्तु कृत एकादेशे यो पूर्वपरौ

१ नोपलभ्येते॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

...पूर्वमपि सिध्यतीत्यभिप्रायः॥१॥

उभयत इति। यथा एते लिङ्गी इति ह्रस्वत्वमुपसर्गोत्तरस्य विधीयमानमतीयात् पीयादिस्तादौ न भवति। तथा ह्येतादि शब्दावयव विशेषवाचिनौ। तत्र यदि पूर्वं प्रत्ययव
बुद्ध्या एकादेशः पाश्रीयते तदा तस्यैव परं प्रति कथमादिवद्भावः स्यादेवं परं प्रत्यादिवत्त्वे पूर्वं प्रत्यन्तवद्भावो न स्यादेकस्योभयापेक्षया पारतंत्र्य विरोधादिति भावः। द्वादशा
न्यिक इति। द्वादशान्यानि कर्माणि अध्ययने प्रवृत्तान्यस्येति तद्धितार्थ इति समासः। एकादेशस्यान्तवत्त्वाद् ह्रस्व पूर्वपदं भवतीति ठञि धत्ति। उत्तरपद विशेषः श

उभयत आश्रयेनान्तादिवत् किंवक्तव्यमेतत् न हि कथमनुच्यमानं गम्यते। लौकिको यं दृष्टान्तः तद्यथा लोके द्वयोस्तुल्यबलयोरेकः प्रेष्यो
भवति स तयोः पर्याये ण कार्यं करोति पदान्तु तमुभौ युगपत्प्रेषयतः नानादिक्षु च कार्ये भवतः तत्र यद्युभयोर्विरोधार्थी भवति उभयोर्न करोति।
किं पुनः कारणमुभयोर्न करोतीति यौगपद्यासम्भवात्। नास्ति यौगपद्येन सम्भवः। अथान्तवत्त्वे कानि प्रयोजनानि। अन्तवत्त्वे प्रयोजनं ब्रह्म पूर्वपदाट्ठ
ञ्विधाने [redacted] द्वादशान्विकः पूर्वपदोत्तरपदयोरेकादेशः पूर्वस्यान्तवद्भवति। यथा शाकपे तत्कृते ब्रह्म पूर्वपदात् न भवति। तत्कृतर्हि स्यात्। यत्र त्व
नेप्येकादेशे ब्रह्म पूर्वपदं भवति। तयोर्द्वाशान्विकः। मत्स्ये एकादेशः पूर्वविधौ प्रयोजनं मत्स्यैकादेशः पूर्वविधौ प्रयोजनं। मधु पिबन्ति। शिद्ग्रहणे तोरेकादेशः
शितोऽन्तवद्भवति। यथा शाकपेतत्कृते शितीति पिवादेशः कृतर्हि स्यात्। यत्रैकादेशो न भवति। पिबति॥ ॥श्री॥ ॥

हेनना श्रित इत्युभयाश्रयाभावो प्रतिषेधाभावः॥ कृतर्हीति। वचनाद्भूतपूर्वगतिराश्रयिष्यत इति मन्यते। पचेति। सांप्रतिक सद्भावे भूतपूर्वगत्याश्रयणस्यायुक्तत्वात्। पिबन्ती
ति। पाघ्रा ध्मेति इति स्थिते अन्तरंगत्वाच्चैकादेशे कृते पिबादेशो न प्राप्नोति शितं प्रत्यन्तवद्भावाद्भवति। वार्णादांगं बलीय इत्यनाश्रित्येदमुक्तं॥ ॥श्री॥ ॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

वैभक्तस्येति। विभक्तौ भवो वैभक्तः। अमी इति। अदसस्त्यदाद्यत्वं अतो गुण इति पररूपे जसः शी आद्गुणः। अदे इति स्थिते ईत्वमत्वे। अमू इति। अदौ इति स्थिते ऊत्वमत्वे। क्व तर्हीति। अदस इति पंचम्याश्रयिष्यते न षष्ठी आनंतर्यं संबंधे वा षष्ठी विज्ञास्यत इति भावः। अमीभिरिति। पूर्वोक्तकार्याश्रयणो अत्र नस्यातामीत्वोत्वे इसवयवावयविसंबंधे ष्याश्रीयते।

वैभक्तस्य णत्वे प्रयोजनं। क्षीरपेण सुरपेण। उत्तरपदविभक्त्योरेकादेश उत्तरपदस्यांतवद्भवति। यथा शक्येत कर्तुं एकाजुत्तरपदे णो भवतीति। क्व तर्हि स्यात् यत्रैकादेशो न भवति। क्षीरपाणां सुरापाणां। अदस ईत्वोत्वे प्रयोजनं। अमी अत्र अमी आसते अमू अत्र अमू आसाते। अदस्विभक्त्योरेकादेशोऽदसोंतवद्भवति। यथा शक्येत कर्तुं अदसोऽसेर्दादु दो मः एत ईद्बहुवचन इति। क्व तर्हि स्यात् यत्रैकादेशो न भवति। अमीः अमूभ्यां। स्वरितत्वे प्रयोजनं। कार्याहार्या। भि[illegible] तिरिति तोरेकादेशस्तितोंऽतवद्भवति। यथा शक्येत कर्तुं तित्स्वरितमिति क्व तर्हि स्यात् यत्रैकादेशो न भवति कार्यो हार्यः। स्वरितत्वे विप्रतिषेधात्। स्वरितत्वं क्रियतामेकादेश इति। किमत्र कर्त्तव्यं। परत्वात्स्वरितत्वं भविष्यति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। नित्य एकादेशः कृतेऽपि स्वरितत्वे प्राप्नोत्यकृतेऽपि। अनित्य एकादेशः। अन्यथा स्वरस्य कृते स्वरितत्वे प्राप्नोति अन्यथा स्वरस्याकृते स्वरितत्वे प्राप्नोति। स्वरभिन्नस्य च प्राप्नुवन् विधिरनित्यो भवति। अंतरंगस्तर्ह्येकादेशः। कांतरंगता। वर्णावाश्रित्यैकादेशः पदस्य स्वरितत्वं। स्वरितत्वमप्यंतरंगं। कथं। उक्तमेतत् पदग्रहणं परिमाणार्थमिति। उभयोरंतरंगयोः परत्वात्स्वरितत्वं स्वरितत्वे कृते आंतर्यतः स्वरितानुदात्तयोरेकादेशः स्वरितो भविष्यति॥ ॥श्री॥ ॥श्री॥ ॥

कार्येति। कार्ये आ इति विभज्यान्वाख्याने विचारः। यदानुस्वार्थमभिधायेति क्रम आश्रीयते तदा लब्धसंस्कारात् स्वरितं तात्कार्ये शब्दादुत्पन्नो प्रयोजनाभावः। नित्य एकादेश इति। स्वरितत्वं नु कृते एकादेशे नैव कृतान्न प्राप्नोतीत्यनित्यं। आंतर्यत इति॥ स्वरिते नुदात्तस्य सद्भावात्॥ ॥श्री॥ ॥श्री॥ ॥

=एपतोऽकारस्यैकादेशे नापहारादितः असमस्यांशाबात्. ९= पाठ

लिंगविशिष्टेति। तित्स्वरितमित्यत्र तिदिति प्रत्ययग्रहणमिति वचनात् प्रत्ययग्रहणेयस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणं तस्य च प्रातिपदिकत्वात् प्रातिपदिकग्रहणे लिंगविशिष्टस्या
पिग्रहणमिति परिभाषोपस्थानात्। न चेयं स्वरूपविधावेव परिभाषोपतिष्ठत इति उख्याः प्रातिपदिकादित्यत्रप्रतिपादितं। गुडोदकमिति। उभयाश्रयत्वादत्र निषेधो न भवति। एक
देशविकृतस्यानन्यत्वादुदकशब्दस्याप्युदकशब्दग्रहणेन ग्रहणात्पूर्वपदं प्रत्यंतवत्त्वमेवोपयुज्यते। एतत्प्रयोजननिराकरणायाह। पूर्वपदांतोदात्तत्वमिति। ननु वर्णाश्रयत्वादे

=अन्यथाहस्तिनीत्यत्रमित्याहेप्रमाणेत्यत्रलिंगेति प्रत्ययोनाप्येकोनस्यात्। स्वरूपविशेषणविधानात्। २= निषेधइति। अंतादित्वस्य। २=

पद ३

लिंगविशिष्टग्रहणाद्वा। अथवा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीत्येवमत्र स्वरितत्वं भविष्यति। पूर्वपदांतोदात्तत्वं च प्रयोजनं। गुडोदकं।
मथितोदकं। पूर्वपदोत्तरपदयोरेकादेशः पूर्वस्यांतवद्भवति। यथा शाकेपतकर्तृ उदके केवलेपूर्वपदस्यांतउदात्तो भवतीति। कृतं हि स्यात्। यत्रैकादेशो नास्ति।
उदश्चिदुदकं। पूर्वपदांतोदात्तत्वं च विप्रतिषेधात्। पूर्वपदांतोदात्तत्वं क्रियतामेकादेश इति किमत्र कर्तव्यं। परत्वात्पूर्वपदांतोदात्तत्वं। पूर्वपदांतोदात्तस्यावु
काशः। उदश्चिदुदकं एकादेशस्यावकाशः। दंडाग्रं क्षुपाग्रं। इहोभयं प्राप्नोति। मथितोदकं गुडोदकं। पूर्वपदांतोदात्तत्वं भवति विप्रतिषेधेन। स चावश्यं वि
प्रतिषेध आश्रयितव्यः। एकादेशे हि स्वरितप्रसिद्धिः। एकादेशे हि स्वरितस्याप्रसिद्धिः स्यात्। योहि मन्यते स्वत्वैकादेशः। एकादेशे कृते पूर्वपदांतोदात्तत्वं
भविष्यतीति। स्वरितत्वं तस्य न सिध्यति स्वरितो वानुदात्ते पदादाविति। गुडोदकं मथितोदकं। कृदंत प्रकृतिस्वरत्वं च प्रयोजनं। प्रादितः॥ ॥

कादेशांतरंगः पूर्वपदोत्तरपदाश्रयत्वात्स्वरो वहिरंगः। समुक्तोयं विप्रतिषेधः। नेदमपूर्वं चोद्यते। एकादेशप्रसंगस्त्वंतरंगत्वलीयस्त्वादितिवक्ष्यमाणत्वात् नेंद्रस्य परस्येति ज्ञापकाश्र
येण च परिहरिष्यते। स्वरितत्वं तस्य न सिध्यतीति। एकादेशस्योदात्तत्वमेव पूर्वपदांतोदात्तत्वे न स्यात्। पूर्वं तु पूर्वपदांतोदात्तत्वे सति अनुदात्ते पदमेकवर्जमित्युदकशब्दोनुदात्त इत्येकादे	एम० ४५

१ शः पक्षे स्वरितो भवति॥ ॥श्री॥ ॥श्री॥ ॥

प्राशितेति। तच्चात्र नितुनादौ चनितिकृत्सतावितिपूर्वपदप्रकृतिस्वरो भवति। नहीदानीमिति। एकादेशे नवावधानात्। नचैकादेशाविकृतस्यानन्यत्वे नोत्तरपदं भविष्यति। एका
देशस्य तु पूर्वं प्रत्यंतवद्भावेन स्वरः से त्स्यतीति युक्तं कल्पयितुं। प्राशनमिस्मादौ द्वौ प्रसंग्रात्। तथा ह्यशनशब्दो लित्स्वरेणाद्युदात्तस्तत्रैकादेशस्य पूर्वं प्रसंत वत्वे प्रसयात्सर्वे उदा

=तयोर्द्वयस्यतिरोधानात्। १=

प्राशिताः कृत्स्त्योरेकादेशोंऽतवद्भावात्तियथाशक्ये तकृत्तुं गतिकारकोपपदात्कृदंतमुत्तरपदं प्रकृतिस्वरं भवतीति। कृतर्हि स्यात्। यत्र नैकादेशः प्रकारकः प्र
करणं। कृदंतप्रकृतिस्वरत्वं विप्रतिषेधात्। कृदंतप्रकृतिस्वरत्वं क्रियतामेकादेश इति किमत्र कर्तव्यं कृदंतप्रकृतिस्वरत्वं भवति विप्रतिषेधेन। कृदंतप्रकृति
स्वरस्यावकाशः प्रकारकः प्रकरणं। एकादेशस्यावकाशः। दंडाग्रं क्षुपाग्रं। इहोभयं प्राप्नोति प्राशिता प्राशितः कृदंतप्रकृतिस्वरत्वं भवति विप्रतिषेधेन। सच्चा
वश्यं विप्रतिषेध आश्रयितव्यः। एकादेशे ह्यप्रसिद्धिरुत्तरपदस्यापरत्वात्। यो हि मन्यते अस्त्वत्रैकादेशे कृदंतप्रकृतिस्वरत्वं भविष्यतीति। कृदंतप्रकृतिस्व शः एकादेः
रत्वं तस्य न सिध्यति किं कारणं उत्तरपदस्यापरत्वात्। नहीदानीमेकादेशे कृते उत्तरपदं परं भवति। ननु चांतादिवद्भावेन परं। उभयत आश्रये नांतादिवत्।
[redacted] उत्तरपदवृद्धिश्चैकादेशात्। उत्तरपदवृद्धिश्चैकादेशाद्भवति विप्रतिषेधेन। उत्तरपदवृद्धेरवकाशः। पूर्वत्रैगर्तकः। एकादेशस्या
वकाशः दंडाग्रं क्षुपाग्रं। इहोभयं प्राप्नोति पूर्वेषुकामशमः अपरेषुकामशमः। उत्तरपदवृद्धिर्भवति विप्रतिषेधेन। एकादेशप्रसंगस्त्वंतरंगवलीयस्त्वा
त्। एकादेशस्तु प्राप्नोति किं कारणं अंतरंगवलीयस्त्वात्। अंतरंग वलीयो भवति। तत्र को दोषः॥ ॥श्री॥ ॥श्री॥७॥

=इषुकामशमीशब्दस्य प्राच्यग्रामवाचित्वात् प्राचां ग्रामनगराणामिति सूत्रस्य प्रवृत्तिः। प्रोक्तता त्रिगर्तशब्दस्य च नगरवाचित्वेन ग्रामवाचित्वाभावादिति भावः। २=

त्तमावीनास्तीति कथमुत्तरपदस्य स्वरः स्यात्। तस्मात्सर्वे स्वरः कर्तव्यः। पश्चादेकादेशः। पूर्वत्रैगर्तक इति। पूर्वेषु त्रिगर्तेषु भव इति तद्धितार्थे समासः। तस्य सर्वोऽद्धि दिक्शब्देभ्यो
जनपदस्येति तदंतविधिना। अवृद्धादपीति वुञ्प्रत्ययः। दिशोऽमद्राणामित्युत्तरपदवृद्धिः। ननु प्राचां ग्रामनगराणामित्यस्यावृद्धेरवकाशो दर्शनीयः। एवं तर्हि प्रकरणा
१८ अयोगो कः इदं तदाहरणं पूर्वकां र्शमनिक इति॥ ॥श्री॥ ॥

=ननु तथापि परादिवद्भावेन आशनशब्दस्योत्तरपदत्वं [redacted] मूइति कृदंतस्यचैवं गतित्वमिति गतेः कृदंतस्य स्वरः सिध्यति। नैतत्। ति एकदेशविकृतन्यायेन जातिवंजन्योवमवदर्शनस्यवीजभावाइतिसंज्ञायाश्च परिच्छिन्नपरिमाणप्रेस्यादिविशिष्टविषमसेन किंचिन्न=
=नेन गतित्वस्याव्यंजनादित्याशयात्। एतेनाभीयादित्यादावुभयतआश्रये कदेशविकृतन्यायेन यणो नांतादिवत्। नैतत्। इति चिंत्यं एकदेशविकृतन्यायाश्रयणादुभयतआश्रयणाभावादिति शंकाप्रयुक्ता। २=

[redacted]

भा० कै० ६ तत्र वृद्धिविधानमिति। एकादेशस्सो भया श्रयणं तौ रिवद्भावाभावात् वृद्धेरप्रसंगात्। अघा हत इति। वाक्यसंस्कारपक्षाश्रयणेनेतान्युदाहरणानि॥ ॥श्री॥ ॥७॥

४६ = नन्वेकादेशस्य पराद्विवद्भावेनोत्तरपदत्वं न तर्हि आगमस्तेनोपविहितत्वात् न पूर्वपदत्वमिति वृद्धेः प्रसंगाभावस्योक्तत्वात् ज्ञापकानुपपत्तिरिति चेन्न उत्तरपदाद्यक्षानिक वृत्तस्य भावेनागमे सत्यानतिदेशात्

तत्र वृद्धिविधानं। तत्र वृद्धिर्विधेया। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेन्द्रस्य परस्य प्रतिषेधं शास्ति।

कथं कृत्वा ज्ञापकं। इन्द्रे द्वावचौ तत्रैकोयस्येति लोपेन ह्रियते परएकादेशेन। अनवकइन्द्रः संपन्नः तत्र कोवृद्धेः प्रसंगः पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्ता

वत्कार्यं भवति। नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। अथ पादिवत्त्वे कानि प्रयोजनानि। आदिवत्त्वे प्रयोजनं प्रगृह्यसंज्ञायां। आदिवत्त्वे प्रयोजनं

भवति ४ प्रगृह्यसंज्ञायां। अग्नी इति वायू इति। द्विवचनाद्विवचनयोरेकादेशो द्विवचनस्यादिवद्भवति। यथा शक्येत कर्तुमीदूदेद्द्विवचनं प्रगृह्यमिति। कृतर्हि स्यात् य

त्रैकादेशो न भवति त्रपुणी इति जतुनी इति सुप्तिङ्। विधिषु प्रयोजनं। सुपा वृक्षेति प्लक्षेति सुप्सुपोरेकादेशः सुप आदिवद्भवति यथा श

क्येत कर्तुं सुबन्तं पदमिति। कृतर्हि स्यात् यत्रैकादेशो न। वृक्षस्तिष्ठति। सुप्तिङ्। पचेयज इति तिङ्तिङोरेकादेशस्तिङ् [redacted] आदिवद्भवति। यथाश

क्येत कर्तुं तिङन्तं पदमिति। कृतर्हि स्यात् यत्रैकादेशो न पचति यजति। आप्। खट्वा। आबन्तयोरेकादेश आप् आदिवद्भवति। यथा शक्येत कर्तुं आबन्तात्सोर्लोपो

भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। कुंचा। उष्णिहा। देवविशा। आङ्ग्रहणे परविधौ प्रयोजनं। अघा हते कुरा हते। आङ्नाङोरेकादेश आङ् आ

दिवद्भवति। यथाशक्येत कर्तुं माङो यम हन इत्यात्मनेपदं भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। आहते। आट्श्च वृद्धिविधौ प्रयोजनं। अद्यैहिष्ट कुदैहि

ष्ट। आटः अद्य शाइस्य चैकादेश आट् आदिवद्भवति। यथा शक्येत कर्तुं आटश्च वृद्धि [redacted] एम०

भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। ऐहिष्ट। कृदन्तप्रातिपदिकत्वे च प्रयोजनं॥ ॥श्री॥ ॥ ४६

ऐहिष्ट

धारय इति धारयतीति धारयः। अनुपर्गो लिंपेति शः कर्मेरिशपा। उपेयाजेति। उपइयाज इति स्थिते आदुणास्तस्य परं प्रत्यादिवद्भावाद्ध्रस्वत्वप्रसंगः। यो ह्यन इति। अग्रग्रहणानुवृत्तिमु
भयत्र अग्रयेनांताद्विवर्द्विते तद्वान पेक्ष्ये दमुक्तं। अं वाने ति। अवार्थ नद्योर्ह्रस्व इति ह्रस्वत्वेकृते एकादेशे चतस्यांतवद्भावात्पुनर्ह्रस्वप्रसंगः। निष्कौशांबीरमिति। नपुंसकह्रस
=आद्गुणः स्थानेऽस्य तत्र ह्रस्वप्रसक्तये कण्ठाद्यत्नो। निस्यनुवर्त्तते उपसर्गाद्ध्रस्वकृतेरिति म.१=

धारयः। पारयः। कृदकृतोरेकादेशः कृद्ग्रहणे न गृह्यते यथा शकोत्तकर्तुं कृदं तं प्रातिपदिकमिति। कृतह्रिस्यातयत्रैकादेशो नाकार्ये हार्यं। न अभ्यासादीनां
ह्रस्वत्वे। अभ्यासादीनां ह्रस्वत्वे नांताद्विवद्भवतीति वक्तव्यं। के पुनरभ्यासादयः। अभ्यासो ह्रां बार्थे नदी नपुंसकोपसर्जन ह्रस्वत्वानि। अभ्यास ह्रस्वत्वे।
उपेयाज। उपेयाय। उपोवाप। उहे ह्रस्वत्वं उपोह्यते। मोह्यते। अवार्थे नदी नपुंसकोपसर्जन ह्रस्वत्वानि। अंबात्र। अक्कात्र। कुमारीदं। किशोरीदं। आ
राशस्त्रीदं। धानाशष्कुलीदं। निष्कौशांबीदं निर्वाराणसीदं। अभ्यासोहां बार्थे नदी नपुंसकोपसर्जन ग्रहणे न ग्रहणाद्ध्रस्वत्वं प्राप्नोति। न च ऐव हिरंगमंत
रंगे। वर्णाश्रयविधौ च। वर्णाश्रयविधौ च नांताद्विवद्भवतीति वक्तव्यं। किं प्रयोजनं। खट्वाभिर्जुहाव अस्या अभ्व इति। इह खट्वाभिः मालाभिः अतो
भिस ऐस भवतीत्यैस भावः प्राप्नोति। नैष दोषः। तपरकरणसामर्थ्यान्न भविष्यति॥ अस्त्वन्यत्र परकरणे प्रयोजनं। किं। कीलालपाभिः। शुभंया
भिः। जुहाव। आत औ णल इत्यौत्वं प्राप्नोति। अस्या अभ्व इति एङः पदांतादतीति पूर्वत्वं प्राप्नोति॥ ×बहिरंगलक्षणत्वात्। नवाएतद्वक्तव्यं। किं कारणं। बहिरंगलक्षणत्वात्
[illegible]

त्वात्परत्वादुपसर्जन ह्रस्वः। जुहावेति। ह्वयते र्लिटि तिपि णल्यभ्यस्तस्य चेति संप्रसारणं। संप्रसारणाच्चेति पूर्वैकादेशः। तस्याकारं प्रत्यादिवद्भावात्स्मल औत्वप्रसंगः। अस्या अ
भ्व इति। इदमस्तु तुर्य्येकवचनं स्त्रियामाद्यत्वं टाप् सर्वनाम्नः स्याड्ढ्रस्वश्चेति स्याट् ह्रस्वश्च। वृद्धिरेकादेशः हल्ङ्यादिलोपश्री ङ्ग्रस लोपः। एचोयवायाव इत्यैकारस्यायादेशः। लोपः शाक
१ ल्यस्येति यलोपः॥ ॥ ॥

नवेति। कार्यमात्रमनेनातिदिश्यते ननु रूपविशिष्टवर्णरूपाश्रयाश्चेत्तेविषयोनातिदिश्यते तुक्यसिद्धवचनेचास्मार्थेस्यलिंगंपश्यामः आद्योविधिरनेनातिदिश्येत
नद्याधीत्यप्रेत्येत्यादौ एकादेशस्य ह्रस्वप्रसादिवद्भावात्तुकः सिद्धत्वात्तुक्यसिद्धत्वं न ब्रूयात्। षत्वतुगोरुत्सर्गेति। उत्सर्गः स्थानीसामान्येनोत्सृष्टत्वात्। नान्यस्ये

=श्रीगेषेलेत्याद्येत्वकार विशिष्टएकाद्व्रत्न पदत्वं नवसेवअप्राधान्येनवर्णाश्रयणादि शिष्टवर्णरूपाश्रयत्वाभावात् कार्यमात्र मित्यर्थः चावयवधाचकात्सादिश आभ्यामाक्षिप्त समुदाय निमित्त कार्यमात्रमित्यर्थः तदेवं वर्णाश्रये चेतिवार्तिकं प्रसजया

नवाता द्रूप्यातिदेशात्। नवावक्तव्यं किंकारणंन्नत्ताद्रूप्यातिदेशात् नहितद्रूप्यमतिदिश्यते रूपाश्रयावैएतेविषयाः अतताद्रूप्यान्नभविष्य
ति। षत्वतुकोरसिद्धः। किमर्थमिदमुच्यते। षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थंच। षत्वतुकोरसिद्धत्वमुच्य
ते आदेशलक्षणप्रतिषेधार्थं उत्सर्गलक्षणभावार्थंच आदेशलक्षणप्रतिषेधार्थंतावत्कोसिचत्। सोसिचत्। एकादेशेकृते इणाइतिषत्वंप्रा
प्नोति। असिद्धत्वान्नभवति। उत्सर्गलक्षणभावार्थंच। अधीत्यप्रेत्य एकादेशेकृते ह्रस्वस्येतितुक्नप्राप्नोति। असिद्धत्वाद्भवति। अस्तिप्रयोजन
मेतत्। किंतर्हीति। ततोत्सर्गलक्षणप्रसिद्धिरुत्सर्गाभावात्। ततोत्सर्गलक्षणस्यकार्यस्याप्रसिद्धिः अधीत्यप्रेत्य किंकारणं उत्सर्गाभा
वात्॥ ह्रस्वस्येत्युच्यमानेनचात्रह्रस्वंपश्यामः। ननुचानाप्यसिद्धवचनात्सिद्धं असिद्धवचनात्सिद्धमितिचेन्नान्यस्यासिद्धवचनादन्यस्यभावोद्भा
वोभवति। नहिदेवदत्तस्यहंतरिहतेदेवदत्तस्यभावोद्भावोभवति। तस्मात्स्थानिवद्वचनमसिद्धत्वंच तस्मात्स्था[redacted]
निवद्भावोवक्तव्यः असिद्धत्वंच। अधीत्यप्रेत्येतिस्थानिवद्भावः। कोसिचत्सोसिचदित्यत्रासिद्धत्वं। स्थानिवद्वचनानर्थकंशास्त्रासिद्ध
त्वात्। स्थानिवद्वचनमनर्थकं किंकारणंशास्त्रासिद्धत्वात्। नानेनकार्यस्यासिद्धत्वंक्रियतेकिंतर्हिशास्त्रासिद्धत्वमनेनक्रियते॥ ॥

ति कार्यासिद्धत्वाश्रयेणेदमुच्यते। आदेशेनस्थानिनोनिवृत्तत्वात्समप्यादेशस्यासिद्धत्वे स्थानिनः प्रत्यापत्त्यभावात्। असिद्धत्वंचेति। षत्वेऽसिद्धत्वंस्थानिवद्भा
वेनस्वाश्रयस्यानिवृत्तेर्नात्वप्रसंगः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

=अंतादिवद्ग्रहणं चेति। एवमेतेन तत्र विचनं पूर्वपरयोरित्यनुवर्तमाने पूर्वपरयोर्यएकादेशः स तदन्तवत्तदादिवदित्यर्थे जल्पते। तादृशग्रहणानुरोधात्सामर्थ्यात् पूर्वपरयोः परयोर्वा चंता नयोरेकादेशोऽसिद्धः पूर्वपरत्रालदस्येयपिनवक्तव्यमिति। २=

एकादेशशास्त्रमिति। ततश्च पूर्वं तुकृशास्त्रं प्रवर्तते पश्चादेकादेशशास्त्रमित्युक्तं भवति। शकहूष्विति। शकान् हूयंतीति क्विप्। संप्रसारणं पूर्वैकादेशः हलइति दीर्घत्वं। तत्रैकादेश स्यासिद्धत्वादिणउत्तरस्य विधीयमानं षत्वं न स्यात् वृक्षेछत्रमिति। एकादेशस्यासिद्धत्वान्नित्यो ह्रस्वाश्रयस्तुक् सनादीर्घात्पदांताद्वेति विकल्पेन लिष्यते। पदांतपदाद्योरिति। ननु तुल्येवाचनिकत्वेको विशेषो येन संप्रसारडीह्रुसिद्ध इति प्रसारव्यायते पदांतपदाद्योरिति तुक्रियते उच्यते [redacted] लाघवात्सदस्येसेववक्तव्यं छंतादिग्रहणं च पूर्व

एकादेशशास्त्रं तुकृशास्त्रे ऽसिद्धं भवतीति। संप्रसारणाङीहुसिद्धः संप्रसारणाङीहुसिद्ध एकादेश इति वक्तव्यं। शकहूषु परिवीषु संप्रसारणाङि। वृक्षेछत्रं। वृक्षेच्छत्रं प्लक्षेछत्रं प्लक्षेच्छत्रं ङि इट्। अपचेछत्रं। अपचेच्छत्रं। अपजेछत्रं अपजेच्छत्रं। संप्रसारणाङीहुसिद्धः पदांतपदाद्योरेकादेशस्या सिद्धवचनात्। संप्रसारणाङीहुसिद्ध एकादेशः कुतः पदांतपदाद्योरेकादेशस्यासिद्धवचनात्। पदांतपदाद्योरेकादेशोऽसिद्धो भवतीत्युच्यते। नचैषु पदां तपदाद्योरेकादेशः यदि पदांतपदाद्योरेकादेशो ऽसिद्धः सुससा ओषधीस्त्वधि सुपिप्पला ओषधीस्त्वधि। अत्र षत्वं प्राप्नोति। न विधिं प्रतिपदांतपदा द्योरेकादेशो ऽसिद्धः। षत्वं प्रत्येकादेशमात्रमसिद्धं शकहूषु परिवीषु अत्र षत्वं न प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथं सुससा ओषधीस्त्वधि

×षत्वं प्रत्येकादेशमात्रमसिद्धं यदि×

॥सुपिप्पला ओषधीस्त्वधि नेषदोषः॥

॥श्री॥

॥७॥

सुत्रादनुवर्तते। तेन पदांतपदाद्योरेकादेशो ऽसिद्धो भवतीत्यर्थो लभ्यते। ओषधीस्त्वधीति। ओषधिशब्दाद्द्वितीयाबहुवचनं। ओषधेश्च विभक्तावप्रथमायामिति दीर्घः। ततः पूर्वसवर्णदीर्घो हल्विसर्जनीयो। कःकरत्करतीति [redacted] विसर्जनीयस्य सकारो विधीयते इणः षः सधिकारादिण उत्तरस्य षकारः। तत्रैकादेशस्य प दांतपदाद्योरिति वचनादसिद्धत्वाभावात्तत्वप्रसंगः। अप्रसिद्ध तत्वैकादेशस्य षत्वाप्रसंगात्सकारः सिध्यति॥

॥श्री॥ =अयं ग्रंथः षकारनिमित्तप्रतिपादनाय॥ ७॥

=इणन्तत्त्वाभावात्। १=

भा०कौ० ६ भ्रातुष्पुत्रग्रहणमिति। ऋतो विद्यायोनिसंबंधेभ्य इत्यलुक्। ऋत उदित्युकार एकादेशो रपरत्वं रात्सस्येति सलोपो रेफस्य विसर्जनीयः तत्रैकादेशस्यासिद्धत्वात् इदुदुपधस्य
४८ चाप्रत्ययस्येति षत्वे सिद्धे कस्कादिषु पत्वार्थं भ्रातुष्पुत्रग्रहणं ज्ञापयति नैकादेशात्परस्य विसर्जनीयस्य षत्वं भवतीति वेत्र इति। ऋकारस्य संप्रसारणं षष्ठ्येकवचने ततः सा
वपि पदमिति पदसंज्ञायां सत्यामुकारः पदादिः आकारः पदान्त इति तयोरेकादेशस्यासिद्धत्वाद्ब्रुवां तत्वाभावाज्जुक्न प्राप्नोतीत्यर्थः यथालक्षणमिति। माभूज्जुगाग
म इत्यर्थः। अथवेति। पूर्वपरयोरित्यनुवर्तते छे नादिग्रहणं च तत्र यथासंख्यसंबंधात्पूर्वस्य पदस्यान्तस्य पदस्यादेश्चैकादेशो सिद्ध इत्यर्थः संपद्यते। आकार आत्रपदा
परस्य

भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्य। यदयं कस्कादिषु भ्रातुष्पुत्रग्रहणं करोति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात्परस्य ष
त्वं भवतीति यद्येतज्ज्ञाप्यते शकहूषु परिवीषु इत्यत्र षत्वं न प्राप्नोति तुल्यजातीयस्य ज्ञापकं किं च तुल्यजातीयं यः कुधोः। यद्येवं वेञोऽप्रत्यये
परतः उ इति प्राप्नोति उ दिति चेष्यते। यथालक्षणमप्रयुक्ते। अथवा नैवं विज्ञायते पूर्वस्य पदादेः परस्य च पदान्तस्येति कथं तर्हि परस्य च पदा
देः पूर्वस्य च पदान्तस्येति। आ उणः उणग्रहणं किमर्थं न आदेको भवतीत्युच्यते आदेकस्त्वे उणः के न। आदेकस्त्वे उणः केनेदानीं भविष्यति।
खट्वैन्द्रो मालैन्द्रः खट्वौदकं मालोदकं। तच्छानेंतरतमो हि सः। तच्छानेप्रायमाणानामंतरतम आदेशो भवति॥ ॥ ॥
=एङः पदान्तादतीति कौं सिवादिति पदद्वयमाश्रयते षत्वविधौ तु तथा नाश्रीयते इणः परस्य षत्वविधानात्
का
दिने भवति नाप्युकारः पदान्त इत्यसिद्धत्वाभावाज्जुगभवत्येवेत्यर्थः। किमर्थं षत्वं तु कोरेकादेशस्यासिद्धत्वमुच्यते यावता हि पदाश्रयत्वाद्बहिरंगत्वादेवैकादेशस्यासिद्धत्वं सिद्धं। ए
वं तर्हि ज्ञापनार्थं एतज्ज्ञापयत्यबोधनं तदर्थं बहिरंगस्यापि नासिद्धत्वं भवति। तेना क्षद्यूरित्यत्रोठो सिद्धत्वाभावाद्गुणादेश उपपन्नो भवति॥ आद्गुणः। गुणग्रहणमिति। वृ राम०
द्धस्मा माणान्नियमाद्गुण एव भविष्यतीति प्रश्नः। तच्छानेंतरतमो हि स इति। पूर्वपरयोः कंठतालव्ययोरंतरतमः कंठ्यतालव्य एकारः। कंठोष्ठ्ययोस्तु कंठोष्ठ्य ओकारः॥०॥ ४८

ऐदौतावपीति। ऐकारस्यापि कंठ्यतालव्यत्वादैकारस्यकंठोष्ठ्यत्वाच्चेति भावः। ऐदौतौ नैचीति। ऐदौतोरनेन सिद्धयोर्ह्रस्वे रेचीति नियमार्थं भविष्यति एच्येव वृद्धिर्भवतीति। उभयतो नियमस्य व्याख्यास्यते वृद्धिरेचीति। नोभयांतर इति। अकारस्तु विधिष्यमाण एव परो भवतीति स्थाननंतरउभयांतरः। प्लुतश्चेति। प्लुतविधाने सति यस्मिन् विषये प्लुतो विहितस्तस्मि

= नन्वेवं वृद्धिरेचीति नियमादेदैच्यप्रसक्तावपि एच्येदौतौ स्यातामत आह उभयतरति।

ऐदौतावपि तर्हि प्राप्नुतः। ऐदौतौ नैचि तावुक्तौ। ऐदौतौ न भविष्यतः किं कारणं। एचि ऐदौतावुच्येते। इह तर्हि खट्वर्ष्यः मालर्ष्यः ऋकारो नोभयांतरः उभयोर्यौ तरतमस्तेन भवितव्यं। न च ऋकार उभयोरंतरतमः। आकारस्तर्हि प्राप्नोति। आकारो न निधानेऽस्ति। आकारो न [redacted] भविष्यति किं कारणं ऋतिधानो आकार उच्यते तन्नियमार्थं भविष्यति। ऋकारान्तो धातावेव नान्यत्रेति। प्लुतस्तर्हि प्राप्नोति। प्लुतस्य विषये स्मृतः विषये प्लुत इत्युच्यते। यदा च स विषयो भवितव्यमेव तदा प्लुतेन। आंतर्यात् त्रिचतुर्मात्राः इदं तर्हि प्रयोजनं। आंतर्यतः त्रिचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इंद्रः खट्वेन्द्रः खट्वा उदकं खट्वोदकं। खट्वा ईषा खट्वेषा। खट्वा ऊढा खट्वोढा खट्वा एलका खट्वैलका। खट्वा ओदनः खट्वौदनः खट्वा ऐतिकायनः खट्वैतिकायनः खट्वा औपगवः खट्वौपगवः। अथ क्रियमाणेऽपि गुणग्रहणे कस्मादेवात्र त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवंति। तपरत्वान्नते स्युस्ताः। तपरे गुणवृद्धी ननु च तः परो यस्मात् सोऽयं तपरः। नेत्याह। तादपि परस्तपरः यदि परस्तपरः ऋदोरप् इहैव स्यात् यवः लवः पवः स्तवः न स्यात्। नैष तकारः ककारस्तर्हि दकारः किं दकारे प्रयोजनं। अथ किं तकारे अप्संदेहार्थस्तकारः यद्यसंदेहार्थस्तकारः दकारोऽपि अथ मुखसुखार्थस्तकारः दकारोऽपि। ॥ ॥श्री॥ ॥

= ...यत्र पुनर्गुणग्रहणादिनं न भवति तत्र विधिरिति...

न्नप्यनेनैव भाव्यं। अस्मिन् कर्तव्ये आष्टमिकस्यासिद्धत्वादिति पक्षे। नुवारप्रसंगात् प्लुतो न भविष्यतीत्यर्थः। त्रिचतुर्मात्रा इति। प्लुता प्लुतप्रसंगे प्लुतस्य विषये स्मृत इति न्यायो न तु प्लुतप्रसंगे इति त्रिमात्रप्रसंग उच्यते। तपरत्वान्नते स्युस्ता इति। सती हि गुणग्रहणे गुणसंज्ञाविधौ तपरकरणात् त्रिमात्रचतुर्मात्राणां गुणसंज्ञाया अभावादप्रसंग इत्यर्थः॥ ०॥

= नन्वनेनैव न्यायेन त्रिमात्राद्यापादनप्रसंगतमत आह प्लुताप्लुतेति। यथोपदेशं त्रिमा

भा० कै० ६ वृक्ष इंद्र इति स्थिते प्राद्गुणः इस्य कारेकारयोर्गुणः प्राप्नोति इकारयोः सवर्णदीर्घत्वं च तत्र शब्दपरविप्रतिषेधाद्दीर्घत्वप्रसंगे गुण उच्यते। नवेति। एकपदाश्रयत्वाद्गुणोऽन्तरंगः। एसे। ए

४९ से ध सोरे ऐ॰ पररूपमिति प्राप्ते उप्याद्गुणे च वृद्धिविधानं। किमिदमिति। एतिरेवात्र विचार्यते। एधेरत्वान्मनेपदित्वाद्रूपग्रहणाभावः साहचर्यानुद्ध्यो र्मिर्दृशः। यद्येतीतिति ऐ॰ तानुकरणं

वृक्ष इंद्र इति २

गुणो ऐ॰ प्रौहमुपसंख्यानं कर्तव्यं। हि। वृक्ष इंद्रः प्लक्ष इंद्रः॥ शीप इंद्रं तत इंद्रं। इंद्रा अपच इंद्रं अपजइंद्रं। किं प्रयोजनं। दीर्घत्ववाधनार्थं सवर्णदीर्घत्वं माभूदिति। नवा

वहिरंगलक्षणत्वात्। नवा कर्तव्यं किं कारणं बहिरंगलक्षत्वात। बहिरंगलक्षणं सवर्णदीर्घत्वं। अंतरंगो गुणः असिद्धं बहिरंगमंतरंगे। आदेकस्थे द्गुणः केन

स्थानेंतरतमो हि सः। ऐ है तो नै चिन्ताबुक्तावकारोन्तो भयांतरः। आकारेण तिधातोस्सः प्लुतस्य विषये स्मृतः। अंतर्योत्रि चतुर्मो वा स्तरे पत्वान्मते स्मृताः।

एत्सेध किमिदमेत्सेधसो रूपग्रहणमाहो स्विद्धातुग्रहणं किं चातः यदि रूपग्रहणं सिद्धमुपेति उपैषि प्रेमीति न सिध्यति। अथ धातुग्रहणं सिद्धमेतद्भ उपैमि ४

वति। किं तर्हीति। इणो कारो रो प्रतिषेधः इणिरकारादो वृद्धेः प्रतिषेधो वक्तव्यः। उपेतः। प्रेतरइति। योगविभागात्सिद्धं। योगविभागः करिष्यते। वृद्धिरेचिततःए

त्सेधसोः एत्सेधसोश्च एचि च वृद्धिर्भवति। ततउठिउठि च वृद्धिर्भवतीति। एवमपि आइतः एतः प्रेतरइत्यत्रापि प्राप्नोति। [redacted] आङिःपररूपमत्र बाधकं भविष्य

ति। नभविष्यति। नाप्राप्ते पररूपे इयं वृद्धिरारभ्यते। सा यथैव एङि॰ पररूपं बाधते एवमाङि॰ पररूपं बाधेत न बाधते किं कारणं। येन नाप्राप्ते तस्य बाधनं

भवति। न चाप्राप्ते एङि॰ पररूपे इयं वृद्धिरारभ्यते। आङि॰ पररूपे पुनः प्राप्ते चाप्राप्ते च॥ ॥श्री॥ ॥७॥

भावा॰

ततो रूपग्रहणं। अथेक्शिपा वितिश्तिपा निर्देशः ततो धातुग्रहणमिति संशयात्प्रश्नः। योगविभागादिति एकस्मिन्योग एचीत्यस्मोठा संबंधार्थ्य विभागस्य करणे न शक्यत्वाद्यो एम॰

गविभागसंश्रयः। सा यथैवेति। बाध्यमात्रापेक्षायां सर्वस्य बाधा प्रसंग इति भावः। येन नाप्राप्त इति। कार्यविशेषचिंतायां सर्वविषयव्यापि बाधस्यान्याप्यत्वात्॥ ॥ ॥ ४९

=येनेत्यस्य यदुत्तरावच्छिन्ने न कार्यरोत्पर्थात॰१ =येनेत्यस्य यत्स्वाप्राप्ते नेकार्यरोत्पर्थात॰१=

अथ वेति। अनंतरो वाऽवधिर्ज्ञाते तद्बाधया वचनस्य चरितार्थत्वात् उत्तरेणास्य सहस्रार्द्धायां परत्वात् उत्तरं भवतीत्यर्थः॥ अक्षादिति। अक्षानूहते ऽवश्यमित्यावश्यके णिनिः साधनं कृतेति स
मासः॥ प्रादिति। प्रेष्यशब्दः स्त्रीप्रेष्यशब्दे भवति। प्रोढा शब्दः प्रोढा ऽप्रोढ। प्र ऊढा इति स्थिते ओमाङोश्चेति पररूपं भवति। स्वैरीति। स्वेनात्मना ईर्त्ते गच्छत्यवश्यमिति णिनिः इति नेति

= स्वे रेवव एव्यस्य ईषेत्स्त्रीवर्द्धव्यस्य॥ = आवश्यके घोसेनिरूपपदे णिनिर्विसुपपदसमासाभावात् साधनं स्तेति॥ =

अथवा पुरस्तादपवादा अनंतरान्विधीन्बाधंते इति इयं वृद्धिरेङि पररूपं बाधिष्यते नाङि पररूपं। अक्षादूहिन्यां अक्षादूहिन्यां वृद्धिर्वक्तव्या। अक्षौहि
णी। प्रादूहोढोढ्येषैष्येषु। प्राद् ऊह ऊढ ऊढि एष एष्य इत्येतेषु वृद्धिर्वक्तव्या। प्रौहः प्रौढिः प्रैषः प्रैष्यः॥ स्वादीरेरिणोः॥ स्वात् ईर ईरिन् इत्येतयोर्वृद्धिर्वक्त
व्या। स्वैरं। स्वैरी॥ ईरिन्ग्रहणं शक्यमकर्तुं। कथं स्वैरी। ईरिन्नेतन्मत्वर्थीयेन सिद्धं। स्वैरोऽस्यास्तीति स्वैरी। ऋते च तृतीयासमासे वृद्धिर्वक्तव्या। सुखार्त्तः दुः
खार्त्तः॥ ऋत इति किं। सुखेतो दुःखेतः॥ तृतीयाग्रहणं किं। परमर्त्तः॥ समास इति किं। सुखेन र्त्तः। प्रवत्सतरकंबलवसनानां च ऋणे। प्रवत्सतरकंबलव
वृद्धिः सनानां च ऋणे वृद्धिर्वक्तव्या। प्रार्णं। वत्सतरार्णं। कंबलार्णं। वसनार्णं। ऋणदशाभ्यां च। ऋणदशाभ्यां च वृद्धिर्वक्तव्या। ऋणार्णं। दशार्णं। आरो किमर्थमु
कारः॥ वृद्धेरनुकर्षणार्थः। नैतदस्ति प्रयोजनं। प्रकृता वृद्धिरनुवर्तिष्यते। इदं तर्हि आरोऽ चित्वृद्धिरेव यथा स्यात् पररूपं मा भूदिति
॥ किं चान्यत्प्राप्नोति पररूपं स्वोमाङ्श्चाटः पररूपप्रतिषेधं चोदयिष्यति स न वक्तव्यो भवति॥ ॥ श्री॥ ॥

णिनिः सत्यनभिधानान्न भविष्यति स्वैरी ति प्रयोगमाबादिति माङः। दशार्णो दशार्णे री विशेषस्य देशविशेषस्य च संज्ञा। उपसर्गात् ऋषभमिति प्रगतार्षभात् अक्षादि
ति बहुव्रीहिः। उणादीनाममुसत्निपक्षे धातुर्ऋषभशब्दे नास्ति॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ०ः

= ऋषेरत्ति निरुणादत्नात्॥ =

भा०कै०६ उपसर्गादृति। उपसर्गे णौ वधातोग्रहणं न कर्त्तव्यं। यत्रो पसर्गत्वं न संभवति तत्रोपसर्गग्रहणेन प्रार्यो लक्ष्यन्ते। यथा नास्ति कायानस्त् भावविधौ न तु संभवत्युपसर्गत्वे।
५० प्रर्छ्छकदृति। प्रगतान्कच्छका ऋत्सारिति बहुव्रीहिः परत्वादिति। सति धातुग्रहणे योगविभागेन पुनर्विधीयत इति शाकलं वाध्यते। अग्ने ऋत्रमिति। अग्नि स्त्र्छत्रं इति स्थिते ए उ

उपसर्गात्धातावितिकिमर्थं इहमाभूत्। प्रर्षभं वनं। उपसर्गाद्दृद्धिविधौ धातुग्रहणे उक्तं किमुक्तं गास्तुपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः प्रादयस्तंप्रती
तिवचनमिति क्रियमाणेऽपि धातुग्रहणे प्रर्छ्छक इति प्राप्नोति। यत्क्रियायुक्ताः प्रादयस्तंप्रतीतिवचनान्नभवति। इदं तर्हि प्रयोजनं। उपसर्गादृति धातोर्वृद्धि
रेव यथा स्यात्। यदन्यत्प्राप्नोति तन्माभूदिति किंचान्यत्प्राप्नोति दूस्वत्वं क्रस कदृति। क्रति दूस्वा दुपसर्गाद्वृद्धिः एवं विप्रतिषेधेनेति चोदयिष्यति स न वक्तव्यो भ
वति। छेतुकः संवृद्धिगुणाः [redacted] छेतुभवती त्यसं स्मात्संवृद्धिगुणो भवति विप्रतिषेधेन। छेतुभवती स स्यावकाशः। अग्ने वायो इहो भयं प्रा
प्नोति। अग्ने छत्रं। अग्ने छत्रं। वायो छत्रं। वायो छत्र्यं संवृद्धिगुणो भवति विप्रतिषेधेन। स तर्हि विप्रतिषेधो वक्तव्यः न वा बहिरंगलक्षणत्वात्। न वा
वक्तव्यः किंकारणं बहिरंगलक्षणत्वात्। वहिरंगलक्षणस्तुक्। अन्तरंगलक्षणाः संवृद्धिगुणाः असिद्धं बहिरंगमन्तरंगे। अन्तरेणापि विप्रतिषेधमन्तरे
णापि चैतां परिभाषां सिद्धं। कथं। इदमिह संप्रधार्यं संवृद्धिलोपः क्रियतां गुण इति किमत्र कर्त्तव्यं परत्वात्गुणः निसः संवृद्धिलोपः कृते पि गुणेऽप्रा
प्नोस कृते पि गुणोऽपि निसः कृते पि संवृद्धिलोपे प्राप्नोसः कृते पि [redacted]। अनिसो गुणः न हि कृते संवृद्धिलोपे प्राप्नो
१ तितावसेवच्छेनानंतर्यं तत्रतुकाभवितव्यं॥ ॥श्री॥ ॥

दूस्वात्संवुद्धेरिति सुलोपे कृते यदि पूर्वं कृस्वान्नदृस्वांतत्वाभावादुणेनस्यात्पूर्वं तु गुणे दूस्वाभावात्तु कनस्यादिति विप्रतिषेधो पन्यासः वहिरंगलक्षणस्तुगिति द्विप
दाश्रयत्वात् आचार्यदेशीयः पंडितंमन्यत्वादाह। अन्तरेणापीति। आचार्य आह। अनित्यो गुण इति॥ ॥श्री॥ ॥७॥ ग्रा०म०
५०

तस्मादिति। पूर्वोक्तार्थं निगमयति। शाकृच्छ्वि इति। ह्वयतेः क्विपि संप्रसारणे पूर्वैकादेशे च कृते ह्रस्वस्य पिति कृति तुक् प्राप्नोति हल इति दीर्घत्वं च प्रकार्येति। तुकि सति ते
न व्यवधानात् क्विलोपाप्रसंगः। अपचच्छतुरिति। छो: शूडने आत्वं अनुस्वार आतो लोप इटि च सार्वलोपः तस्य स्थानिवत्वाद् द्विर्वचनं छाछूइति। छिते। यदि दीर्घादिति पूर्वे तुक्
छे॰

तस्मात्तुक् च्यते। छेतुकः संवृद्धि गुणाः न वा वृद्धि रंगलक्षणत्वादिति संप्रसारणादीर्घत्वणपल्लोपाभ्यासगुणादयश्च तुको भवंति विप्रतिषेधेन। संप्र
सारणादीर्घत्वस्यावकाशः। हूतः जीनः संवीतः शूनः। तुकोऽवकाशोऽग्निचित् सोमसुत्। इहोभयं प्राप्नोति परिवीषु शाकृच्छ्षु। णिलोपस्याव
रल॰हा२ काशः। कारणा तुकः स एव। इहोभयं प्राप्नोति। प्रकार्यगतः प्रहार्यगतः। अल्लोपस्यावकाशः। प्रचिकीर्षिता। प्रजिहीर्षिता। तुकः स एव। इ
होभयं प्राप्नोति। प्रचिकीर्ष्यगतः। प्रजिहीर्ष्यगतः। अभ्यासगुणादयश्च तुको भवंति विप्रतिषेधेन। के पुनरभ्यासगुणादयः॥ ह्रस्वत्वात्वेत्वगु
तस्थुः५ णाः। ह्रस्वत्वस्यावकाशः। ययतुः। ययुः। तस्थतुः। तुकः स एव। इहोभयं प्राप्नोति। अपचच्छतुः। अपचच्छुः। आत्वस्यावकाशः। चकतुः। चकुः।
तुकः स एव। इहोभयं प्राप्नोति। अपचच्छदतुः। अपचच्छदुः। इत्वस्यावकाशः। पिपक्षति पिपक्षति। तुकः स एव। इहोभयं प्राप्नोति। चिच्छाद
यिषति। चिच्छदयिषति। गुणस्यावकाशः। लोलूयते वेभिद्यते। तुकः स एव। इहोभयं प्राप्नोति। चेच्छिद्यते। चोच्छुप्यते। यणादेशादाडुणः। य
णादेशादाडुणो भवति विप्रतिषेधेन। यणादेशस्यावकाशः। दध्यत्र। मध्वत्र। आडुणस्यावकाशः। खट्वेन्द्रः। खट्वोदकं इहोभयं प्राप्नोति। वृक्षोत्र।
प्लक्षोत्र। इह्नर्गुणवृद्धिविधयश्च यणादेशाद्भवंति विप्रतिषेधेन। इह्रस्वकाशः। आस्तीर्णं निपूर्त्तोः पिंडः। यणादेशस्यावकाशः। चक्रतुः चक्रुः। इहोभयं
स्यात् तदा जंतेत्वाभावाद्भ्रस्वो न स्यात्। अपचच्छदतुरिति। उच्छृदिर् दीप्तिदेवनयोरिसस्य द्विर्वचने कृते यदि पूर्वं तुक् स्यात्तत ऋकारांतत्वाभावादुरदित्वं न स्यात्। चिच्छदयि
ति यति। छर्दे वमने चुरादिः। वृक्षोत्रे ति। वृक्षस्स अत्र इति स्थिते। ससजुषोरुः अतो रोरित्युत्वं ततः उकारस्याकाराश्रयो यण् प्राप्नोति। पूर्वं सहाडुणश्च॥ ॥ ॥
णा॰

=हलादिः शेषस्तु न अभ्याससंज्ञाप्रवृत्तिकाले साक्षात्तस्यानिर्दिष्टत्वात् साक्षिहितानामेव हलांते न निरंतः। अत्र च तुगलघ इति तुग्विधानं ज्ञापकमिति नास्पर्श॰२=
=उभयत्रैव पगत्वे रेफनिवृत्सर्पं॰=

भा०कौ० ६
५१

ननुरिति। आद्गमेति द्वि किनोरन्य तरः। लिटू द्वावा द्विर्वचनं गबहुलत्वं दासीसुलंर परत्वं च। दासीति। दक्षस्यापत्यं स्त्री अत इञ्। इतो मनुष्यजातेरिति ङीष्। सवर्णदीर्घत्वं

वाधित्वा यस्येति लोपो भवति। दाक्षस्य गणइति। दाक्षेरपत्यं युवायञिञोश्चेति फक्। फस्यायनादेशः। तत इका रस्य परत्वात्प्राप्नोति लोपश्च। गांगेय इति। शुभ्रादिभ्यश्चेति ढक्। ढस्य

एयादेशः। वृद्धिरेचीति वृद्धिर्लोपेन वा ध्यते। गांग इति। शिवाद्यण्। सवर्णदीर्घत्वं लोपेन वाध्यते। अर्थमिति। अर्थ इति पूर्वपदप्रकृतिस्वरेण धातुस्वरे सति यणादेशो

च उदात्तस्वरितयोर्यण इति स्वरितत्वं भवति। श्रीषेति। ईषेरिगुपधलक्षणः कः। श्रीरीषा यस्येति बहुव्रीहिः। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरेण धातुस्वरः। तत एका

ह्वरेत्यघ्याजगुरिः। मित्रावरुणौ ततुरिः। किरतिगिरति। गुणाद्ध्योरवकाशः। चेतागोः। यणादेशस्य स एव। इहोभयं प्राप्नोति। चयनं चायकः। लवनं लाव

कः। भलोपधातुप्रातिपदिकप्रत्ययसमासांतोदात्तोदात्तनिहत्तिस्वराएकादेशाश्च भवंति विप्रतिषेधेन। भलोपस्यावकाशः। गार्ग्यः। वात्स्यः। एकादेश

यणादेशयोरवकाशः। दधीन्द्रः मधूदकं। दध्यत्र मध्वत्र। इहोभयं प्राप्नोति। दाक्षी दाक्षायणः। प्लाक्षी प्लाक्षायणः। अचि भलोपएकादेशाद्भवति विप्र

तिषेधेन। अचि भलोपस्यावकाशः। दाक्षी दाक्षायणः। एकादेशस्यावकाशः। इन्द्राग्नं स्रुपायं। इहोभयं प्राप्नोति। गांगेयो गांगः। धातुस्वरस्यावका

शः। पचति। पठति। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। अर्थं। श्रीईषा श्रीषा। प्रातिपदिकस्वरस्यावकाशः। अग्निः। एकादेशयणादे

शयोः स एव। इहोभयं प्राप्नोति॥ अग्न्युदकं॥ ॥

=असिन्पक्षेऔषेनित्वतीयानिर्देशः।१८

देशः सचस्वरितो वानुदात्तेपदादाविति स्वरितउदात्तो वा। अर्थवाश्रियमिच्छतीति क्विप्। कृदुत्तरपदप्रकृतिस्वरेण धातुस्वरेणोदात्तत्वे सत्योदात्तादुत्तरपदादिर्निविभक्तेरुदात्त

त्वं वा भवति। अग्न्युदकमिति। अग्निसहितमुदकमग्न्युदकं। समानाधिकरणाधिकारे तृतीयापूर्वपदउत्तरपदलोपश्चेति समासः। उदके केवल इति पूर्वपदान्तोदात्तत्वं। ए

वं तु व्याख्यायमाने प्रातिपदिकस्वरो न प्रदर्शितो भवति। तस्मादग्निरुदकं अस्मिन्नसुक्षत्वाद्दादहत्वाद्यस्मिन्निति बहुव्रीहिः कर्तव्यः। ततो बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृति

स्वरेण प्रातिपदिकस्वरे सति यणादेशे चोदात्तस्वरितयोरिति स्वरितत्वं भवति एवं यतिमतिनसिध्येत॥ ॥ ॥ रा०म०
५१

वृक्षार्थमिति। अर्थे इति पूर्वपदप्रकृतिस्वरे सत्येकादेशः स्वरितो वानुदात्ते पदादाविति सिध्यति। एवं वृक्षैकादेशेन सिध्येत्। चिकीर्षार्थमिति। उदात्तस्वरितयोर्यण इति अ
कारस्य स्वरितत्वं। औपगवार्थमिति। स्वरितो वानुदात्ते पदादाविति वा स्वरितत्वं। राजवैरी हन्त इति। राज्ञो वैरीति षष्ठीसमासः। ई हन्त इत्यस्य तिङ्। तिङ इति निघातः।
चिक्षियिवेति। क्षिक्षयेलिट् क्वादिनियमादिट्। सवर्णदीर्घप्राप्ते इयङ्। येन नाप्राप्तिन्यायेन यणोपवादाविति यङुवङौ सवर्णदीर्घस्य तु परत्वाद्बाधकौ। साधु

वृक्षार्थं। प्रसपस्वरस्यावकाशः। चिकीर्षुः औपगवः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। चिकीर्षार्थं औपगवार्थं समासान्तोदात्तस्यावका
शः। राजपुरुषः। व्रासणकं बलः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति राजवैर्यर्थं राजवैरी हन्ते। उदात्तनिवृत्तिस्वरस्यावकाशः। नदी कुमारी।
एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। कुमार्यर्थं। कुमारी हन्ते। अल्लोपल्लोपावार्द्धधातुके एकादेशाद्भवनेति विप्रतिषेधेन। अल्लोपस्यावकाशः।
चिकीर्षिता जिहीर्षिता। एकादेशस्यावकाशः पचंति। पठंति। इहोभयं प्राप्नोति। चिकीर्षको जिहीर्षकः। आल्लोपस्यावकाशः पपिः सोमं ददिर्गाः। एकादे
शस्यावकाशः। यांति। वांति। इहोभयं प्राप्नोति। ययतुः ययुः। इयङुवङ्गुणवृद्धिटिल्किन्नित्पूर्वपरविकारेभ्यश्च एकादेशपरणादेशाभ्यां भवन्तीति विप्रतिषेधे
न। इयङुवङोरवकाशः। श्रियौ श्रियः। भ्रुवौ भ्रुवः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। चिक्षियिव। चिक्षियिम। लुलुवुः पुपुवुः। गुणवृद्ध्यो
रवकाशः। चेता गौः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। साधुचापी सुचायी। नञ्भावुकौ। च्यवेयुः शयिता शयितुं टितोः वकाशः। सुस्नं सुप्ना
ऽ नो पचानो। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति॥ ॥ ॥

चिनोतीति साधुचायी साधुकारिणि चेति णिनिः। सुचिनोतीति तच्छीलं सुचायी सुप्यजाताविति णिनिः। सुपीति वर्त्तमाने [redacted] सुब्रह्मणास्तुम्भात्रे यथास्पादिति
भाष्ये स्तुत्। अनस्रोन स्रोभवतीति नञ्भावुकः। आ ढ्यसुभगे सत्तु वर्त्तमाने कर्त्तरि भुवः खिष्णुचखुकञाविति खुकञ्प्रत्ययः तत्र सवर्णदीर्घत्वे प्राप्ते वृद्धिः॥

हृस्वाणामिति। नुडागममात्रमनपेक्ष्य तत्स्थाने एव ऋकारस्य ह्रस्वस्य दीर्घविधानान्नाम्यसत्वविप्रतिषेधोपन्यासः। न हि सत्यल्प्राणस्य नुटः पंचानामित्यादिरवकाशः। नृ चिरग्रीनामिति पाठः। तत्रायं भावः। पुष्पिकविषयव्यापिनो यणएकापवादो नुड्दीर्घस्य तु परत्वाद्बाधकः। दायक इति। येन नाप्राप्तिन्यायेन नुडागमः पाठं बाधते। परत्वेन तु सवर्णदीर्घत्वमिति मत्वा विप्रति षेधोपन्यासः। अस्खीनीति। येन नाप्राप्तिन्यायेन नुमागमो यणादेशं बाधते परत्वेन तु सवर्णदीर्घत्वं। अतिसखीनीति वं दुखीहि। वीप्सामिति। अत्र यणप्राप्तः प्रेप

=अधिकेति·इकारोकारऋकाराणामामि परे प्राप्तः अकारस्य तु दीर्घः। एवमुत्तरत्रापि ष्टसाद्गुणामि = क्वचिदिति·टिद्वकाराग्रदर्शनेनल्मिसाधपनीयन्नीनां वायूनामिति पाठ इत्यर्थः। ननु एवं यणएदीर्घयोरपवादत्वादेव नुडापको न तु परत्वादतआह तत्रायमिति·

कृक्षाणां। प्लक्षाणां [redacted]। किं तोवकाशः। साधुदायी सुष्ठुदायी। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। दायको धायक इति नोवका शः। त्रपुणी जतुनी। एकादेश [redacted] यणादेशयोः स एव। इहोभयं प्राप्नोति। अस्खीनि दधीनि। अतिसखीनि ग्रामणीकुलानि। पूर्वपदविकारेणामव काशः। होतापोतारौ। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। नेष्टोद्गातारौ। प्राग्रेद्रं। उत्तरपदविकारश्चेति वक्तव्यं। उत्तरपदविकारेणामव काशः समीपं दुरीपं। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति नीपं वीपं प्रेपं परेपं। औनो मशासः। औतत्तिरिः। प्रतिषेधः। औतस्तिरिं प्रति षेधो वक्तव्यः। अश्चिनवं। अस्तुनवं। स न हि प्रतिषेधो वक्तव्यो न वक्तव्यः गोग्रहणं करिष्यते। आगोत इति वक्तव्यं। गोग्रहणे घोहपसंख्यानं। गोग्रह णे घोरूपसंख्यानं कर्तव्यं॥ घांगव्य॥ ॥ श्री ॥ ॥

मिति सवर्णदीर्घत्वं चेत्तेन न बाध्यते ईत्वमनवर्णान्तादिति वक्तव्यमित्येकीयमतत्वान्नाश्रीयते। औनो। औतस्तिरिःति। साहचर्येस्य व्यवस्थाहेतुत्वमनाश्रित्योच्यते। सुप एव हि शसोत्र संभवो चीत्यधिकारात्तद्धितस्याग्रहणात्। अश्चिनवमिति। लङ्·मिप्। अम् भावः। विकरणस्य गुणे कृते आत्वप्रसंगः। न्यासांतराश्रयणेन व्याप्तिरिति दर्श ॥ यन्नाह गोग्रहण इति। प्रतिव्याप्तिरपत्रे निदर्शयति॥ ॥ ॥ एम०
५२

समासाच्चेति। एकयोगे चेति। यसमस्त्वरितत्वं प्रतिज्ञायते तदेवानुवर्त्तते नान्यदिति भावः। घोश्चेति। ओतो णिदिति सूत्रं पठितव्यं। गोत इत्योकारांतोपलक्षणार्थे काव्या

समासाच्च प्रतिषेधो वक्तव्यः। चित्रगुं पश्य शबलगुं पश्य। ननु च औत इत्युच्यमानेऽपि समासात्प्रतिषेधो वक्तव्यः। न वक्तव्यः। ह्रस्वे कृते न भविष्यति। इह
मिह संप्रधार्यं आत्वं क्रियतां ह्रस्वत्वमिति किमत्र कर्त्तव्यं परत्वादात्वं। न वा बहिरंगलक्षणत्वात्। न वा वक्तव्यः। किं कारणं बहिरंगलक्षणत्वात्। ब
हिरंगलक्षणमात्वं अंतरंगं ह्रस्वत्वं असिद्धं बहिरंगमंतरंगे। ननु च आगोत इत्युच्यमानेऽपि समासात्प्रतिषेधो न वक्तव्यः। कथं ह्रस्वे कृते न भविष्य
ति। स्थानिवद्भावात्प्राप्नोति। ननु चौत इत्युच्यमानेऽपि स्थानिवद्भावात्प्राप्नोति। नैष दोषः। अनल्विधौ स्थानिवद्भावः। आगोत इत्युच्यमानेऽपि न
दोषः। प्रतिषिध्यते च स्थानिवद्भावः। गोः पूर्वणित्वात्त्वस्वरेषु स्थानिवन्न भवतीति। स एव तर्हि दोषो गोग्रहणे घोरुपसंख्यानमिति सूत्रं च भिद्यते य
थान्यासमेवास्तु ननु चोक्तं ओतः स्ति ङि प्रतिषेध इति। स्त्वधिकारात्सिद्धं स्तुपीति प्रकृतं वर्त्तते क्व प्रकृतं वा सुप्यापिशलेरिति। यद्यनुवर्त्तते इहापि
विभाषा प्राप्नोति। सुपग्रहणमनुवर्त्तते वाग्रहणं निवृत्तं कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्त्तते एकदेशो न। एकयोगे चैकदेशानुवृत्तिरन्यत्रा
पि नावश्यमिहैव। एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति। अन्यत्रापि नावश्यमिहैवकान्यत्र। अलुगधिकारः प्रागानङः। उत्तरपदाधि
कारः प्रागंगाधिकारात् एवमपि अम्युपसंख्यानं वृद्धिवलीयस्त्वात्। अम्युपसंख्यानं कर्त्तव्यं गां पश्य किं पुनः कारणं न सिध्यति वृद्धिर्बलीय [redacted] स्त्वात् परत्वाद्वृद्धिः प्राप्नोति। न वाऽवकाशत्वात्। न वा वक्तव्यं। किं कारणं। अ
नवकाशत्वात्। अनवकाशमात्वं वृद्धिं बाधिष्यते। सावकाशः। द्यां गच्छ। घोश्च सर्वनामस्थानेऽवृद्धिर्विधेया। किं प्रयोजनं॥ यद्यावदेडेति दर्शनात्। यद्यावदेडेश

काशमात्वं कोवद

एवेयां वर्णानिर्देशो हि तपरत्वं प्रसिद्धं॥ ॥ ७॥ ॥ ७॥ ॥ श्री॥ ॥ श्री॥ ॥

एङि। तुन्वो रिति। सप्तमीनिर्देशान्न तदादिविधिः। तु इत्यावत। त्वावत्। तु वानीति। वाते लोडुत्तमैकवचने वानीति रूपं। एक एवेति। अथे मे इत्यभावादेको निपातः। एवे चानियो

ग इति। नियोगोऽवधारणं भावो वधारणं। तस्मादन्यत्रार्थे पररूपं भवति। यथा केव भोक्ष्यते। अज्ञानवत्। मात्वेव शङ्कः। यदा त्ववधारणे वर्त्तते तदा वृद्धिः। शकं धु रिति। अंधुरु

एङि पररूपं। पररूपप्रकरणे तु न्वोर्वि निपातउपसंख्यानं कर्त्तव्यं। तुवैत्वैं तु वै न्वै। वकारादावितिकिमर्थं त्वावृत्। न्वावृत्। निपात इति किमर्थं। तु
वानि तु वानि। न वानि पाते कत्वात्। न वा कर्त्तव्यं किंकारणं निपातैकत्वात्। एक एवायं निपातः। त्वैन्वै। एवे चानियोगे पररूपं वक्तव्यं। इहेव। अद्येव।
अनियोग इति किमर्थं इहैव भव मा स्म गाः। अद्यैव वत्समिह वयं स्तु शेवाः। शकन्ध्वादिषु च। शकन्ध्वादिषु पररूपं वक्तव्यं। शक अन्धुः। शकन्धुः। कुल
अटा। कुलटा। सीमन् अन्तः। सीमन्तः। केशेष्विति वक्तव्यं। यो हि सीम्नोऽन्तः सीमान्तस्स भवति। ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यं। स्थूलोतुः।
स्थूलोतुः। बिम्बोष्ठी बिम्बौष्ठी। एवमन्त्रादिषु छन्दसि पररूपं वक्तव्यं। अपां त्वेमन्त्सादयामि अपां त्वोद्मन्त्सादयामि। ओमाङोश्च। किमर्थश्चकारः एङि
सनुकृष्यते किं प्रयोजनं इह माभूत्। अद्य आ ऋश्यात्। अद्यार्श्यात्। नैतदस्ति प्रयोजनं। अद्यर्श्यादित्येव भवितव्यं। एवं हि सौनागाः पठन्ति। चोनर्थ
कोनधिकारादेङः। उस्योमाङ्क्ष्वाटः प्रतिषेधः। उस्रिपररूपे ओमाङोश्चाटः प्रतिषेधो वक्तव्यः। औस्रीयत्। औढीयत्। औंकारीयत्। सति हि प्रतिषेधो
वक्तव्यो न वक्तव्यः। उक्तमाट्श्चेत्यत्र चकारस्य प्रयोजनं। आटोऽपि वृद्धिर्यथा स्यात् यदन्यत्प्राप्नोति तन्माभूदिति॥ ॥ ॥
यथा

दयानां। कुलटेति। अटतिरयमटाय चाद्यच् पश्चात्कुलेन सम्बन्धः। अन्यथा कर्मण्यण्यत्प्रसङ्गः। ओत्वोष्ठयोरिति। ओतुर्बिडालः। ओमा। अद्य ऋश्यादिति प्रतिपद

विधेर्बलवत्वात्सत्यपि सवर्णदीर्घो बाध्यते। औढीयदिति। वहेराङ्पूर्वस्य क्त प्रत्यये ओढमिति रूपं ततः क्यच्चि लङि रूपमेतत्॥ ॥ ॥

उस्य· अर्थवद्ग्रहणमिति। अथ सन्नं प्रातिपदिकमुक्तं शब्दः इसुसक्तानर्थकं। नैषेति। ननु न प्रयोजनानुवर्तिप्रमाणमिति कथमनाश्रयणमुपपद्यते। अनित्यत्वादस्याः परिभाषायाः। तच्चानित्यत्वमपृक्तनत्वजितितं स्तचोर्भेदेनोपादाने नार्वादेशत निवृत्त्यर्थेन ज्ञापितं। नित्यत्वे त्वानर्थकपादर्वादेशग्रहणप्रसंगात् अन्निवृत्तेः सिद्धत्वात्। भिंद्युरिति। अनागमकानां सागमकाः आदेशा इति न्यायाद्यास्तुदादेः प्रत्ययस्यार्थवत्त्वेन ननु तदेकदेशस्य। यदा त्वर्थवतो त्वागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यत इति न्यायस्तदार्थवत्त्वमेवोस्तः। एवं तर्हीति। उत्साशब्दो वसेः स्फायितंचीति रकि संप्रसारणेऽनु साध्यते। शासिवसीति षत्वं न रपरेति प्रतिषेधान्न भवति। एवमत्रोति तिलाक्ष्णाकंरूपं॥

उस्यपा अपदांतादिति किमर्थं का उस्राकोस्रा अपदांतादिति शक्यमकर्तुं कस्मान्न भवति का उस्राकोस्रा। अर्थवद्ग्रहणेनानर्थकस्येति नैषा परिभाषा शक्या विज्ञातुं। इह हि दोषः स्यात्। भिंद्या उस्र भिंद्युः। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति। उक्तार्थे तत्यपदांतग्रहणं कर्तव्यं। अनोगुणः पदांताद्यथा स्यादिति। इह मा भूत्। दंडाग्रं क्षुपाग्रमिति। अव्यक्तानु। इतावनेकाजग्रहणं श्रदर्थं इतावनेकाज्ग्रहणं कर्तव्यं। किंप्रयोजनं श्रदर्थं। इह मा भूत् श्रदिति। [redacted] नाम्रेडितस्यांतस्य तु। नित्यमाम्रेडिते डाचि परतः पूर्वं कर्तव्यं। पटपटा इति। अकारांतानुकरणाद्वा। अथवा अकारांतमेतदनुकरणं भवेत्सिद्धं पटा अकारांतं पदान्तरखलुच्छ चछ हांतं तदा न सिध्यति। विचित्रास्तद्धितवृत्तयः। नातस्तद्धित उत्पद्यते। अकः। सवर्णे दीर्घत्वे ऋतिऋवा भवतीति वक्तव्यं। होतृऋकारो होतृकारः। लृ तिलृवा भवतीति वक्तव्यं। होतृ लृकारः। होतृकारः॥ ॥ इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥ ॥ ॥

नाम्रेडि। नित्यमाम्रेडिते डाचीति वार्त्तिकदर्शनात् सूत्रे केचित् सम्प्रति पठंति। विचित्रा इति। प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावे प्रवृत्तिरिति भावः। अकः। ऋवेति ऋलृ इत्येतयोः संवृतत्वाद् द्विर्नाम्नामकार लृकारात्मपामसावर्ण्याद् ग्रहणेनाग्रहणाद् द्रुतत्तीयमात्रत्वाद्वा कालत्वाभावाद्दीर्घसंज्ञाया अभावाद्वचनं॥ ॥ इत्युपाध्याय जय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥ ॥ ॥०॥ ॥

=स्वजपोऽपहिताभ्यां·तुल्यास्यप्रयत्नेतुकैयर्ट·नयोरिस्य...

भा०कै०६
५४

प्रथमयोः पूर्वसवर्णः। प्रथमशब्दः सन्निवेशविशेषापेक्षो ऽभिधेये वर्त्तते। तत्र विशेषानवधारणात् पृच्छति। कयोरिति। ननु धातुनिपातादीनामपि प्राथम्यसंभवाद्विशेष
विषयः प्रश्नो नोपपद्यते। नैष दोषः। दीर्घाज्जसि चेति लिंगाद्धात्वादीनां ग्रहणाद्विभक्त्योः प्रत्यययोर्वा ग्रहणे ऽयं प्रतिषेध उपपद्यते। ननु धात्वादीनामन्य[redacted]तमग्रह
णम्। ननु सामान्यग्रहणे ऽपि प्रतिषेधोपपत्तौ लिंगत्वानुपपत्तिः। नैतदस्ति प्रथमयोरिति कस्यचिदेव विशेषस्य ग्रहणं न तु यौगपद्येन सर्वेषां विशेषाणां सर्वे विशेषविषयस्य
सन्निवेशापेक्षस्य प्राथम्यस्य युगपद्बुद्ध्यापेक्षितुमशक्यत्वात् प्रतिनियतविशेषालंबित्वात्प्राथम्यज्ञानस्य। तत्र प्रसिद्ध्याश्रयेण विभक्तिग्रहणमाशंकितं प्राप्तिप
दिकार्थे स्वादौ विभक्तिग्रहणस्य प्रसिद्धत्वात्। अंतरंगत्वात्तु प्रत्ययग्रहणमाशंकितं। प्रत्ययस्य हि प्रथमत्वमंतरंगं विकल्पस्तु बहिरंगं। तत्र प्रथमसाहचर्यात्प्रा
थम्यारोपणाद्द्वितीयस्यापि प्रथमशब्देनाभिधानं। यथा देवौ पुंसि चेति गोमयादीनामर्द्धर्चशब्देन। तथा च बहुवचनं कृतं। अन्ये त्वाहुः। द्वितीयस्य तु प्र

=युगपदुच्चारो हासंभवात्। २= तत्र सन्निवेशस्थित तत्तत्पदार्थालंबनबादिसर्पः। ३= तत्र सन्निवेशस्थितसर्वापेक्षया प्रथमत्वात्। २=

प्रथमयोः पूर्वसवर्णः। प्रथमयोरित्युच्यते। कयोरिदं प्रथमयोर्ग्रहणं। किं विभक्त्योराहोस्वित्प्रत्यययोः। विभक्त्योरित्याह। कथं ज्ञायते। अची
ति वर्त्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञायते। अजादी यौ प्रथमौ। अजादीनां वा यौ प्रथमाविति॥ ॥ ॥

×संबंधोपपत्तिः। प्रत्यययोस्तु ग्रहणे सुप्प्रत्ययस्यानजादित्वात् जसोऽप्याप्राथम्यात् प्रत्यययोरजादी इति।×४ =न च विशेष्यत्वेकथं तदादिविधिरिति वाच्यं। दीर्घाज्जसि चेति लिंगात् प्रत्यययोर्बुद्धिसन्निधापितताद्वशी सत्यत इति

प्रथमापेक्षया द्वितीयत्वं नान्यथा। ततः प्रथमद्वितीययोरनपेक्षितपरस्परयोरपि परापेक्षं प्राथम्यं मुख्यमेव। तत्र प्रथमयोरिति द्विलिंगनिर्देशे विभक्तिग्रहणम्। पुलिं
गनिर्देशे तु प्रत्ययग्रहणं समानच्छन्निर्देश इति संदेहः। न चाजादी इति। प्रथमयोरिति विशेष्यं तद्विशेषणमचीति तेनाजाद्योः प्रथमयोरिह ग्रहणं न च सुप्शब्दे जादि भवतीति नासाविह
प्रथमशब्देनोच्यते। विभक्त्योस्त्वजादित्वं संभवतीति तयोरेव ग्रहणं। यद्यपि प्रथमे त्रिके सुशब्दस्याजादित्वासंभवस्तथाप्यवयवांतरद्वारकत्रिकस्याजादित्वव्यपदेश इति अजा
द्योः प्रथमयोरिति संबंधायोगः। अजादी यौ प्रथमाविति। अजादी[redacted]विशेष्यो तद्विशेषणं प्रथमयोरिति। तेनायमर्थो भवत्यजादी यौ प्रत्ययौ अन्या
पेक्षया लब्धप्रथमव्यपदेशौ तयोः परतः पूर्वसवर्णदीर्घ इत्येवमौजसोरेव ग्रहणं प्राप्नोतीति विभक्तिग्रहणस्याजग्रहणं न लिंगं। अजादीनां वेति। अचीति वर्त्तते निर्धारणे
सप्तमी चेह श्रीयते। जातौ चैकवचनं। तुल्यजातीयस्य च निर्धारणं भवतीति अजादीनां[redacted]प्रथमौ यावजादी अन्याजादिप्रत्ययापेक्षया लब्धप्रथ

एम०
५४

सत्समिति। सर्वेत इति। धातुसंज्ञाया अपीत्यर्थः। यस्माद्धातूपसर्गसमुदायेन विशिष्टा क्रिया प्रतिपाद्यते अडादिव्यवस्थार्थं तु पृथग्धातूपसर्गप्रकल्पनं। तत्र संस्कृशब्दे व्यवस्थित एव सुट् भवति पश्चात्समुदाया व्यवस्यते नार्थेनार्थवतो धातुसंज्ञा। परिभुनरिति। सुट् इति ककारमनुबंधं कृत्वेत्यर्थः। संस्कर्तेति। समः सुटि कीत्युच्यमाने संभक्त्वा स्तुकः

=उपसर्गार्थविशिष्टे धातोः शक्तिः उपसर्गो द्योतक इति भावः।१= =ननु सुट् पूर्वांत इति विरुद्धमत आह ककारमिति।१=

सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबंधः तमभ्यंतरं कृत्वा धातुः साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्यास्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्यात्। एवं च कृत्वा सुट् सर्वेत्योऽन्तरंगतरको भवति कात्पूर्वे यग्रहणं चापि शक्यमकर्तुं यदि पुनरयं सुट् कात्पूर्वांतः क्रियते। कात्पूर्वांत इति चेद् द्विविधिप्रतिषेधः कात्पूर्वांत इति चेत् रुः कश्चिद्विधेयः कश्चित्प्रतिषेध्यः संस्कर्त्ता समो विधेयः सुटः प्रतिषेध्यः समस्तावत्र विधेयः। वक्ष्यते तत्तं पुंकानां सत्वं रुत्वविधौ ह्यनिष्टप्रसंग इति। सुट्यपि न प्रतिषेध्यः समः सुटीति द्विसकारको निर्देशः। सुटि सकारादाविति। अपवाद परादिः करिष्यते। परादावि कुत्वप्रसंगः यदि परादिः इकुणो प्राप्नुतः संस्कृषीष्टेत्यत्र संयोगादेरिती प्राप्नोति। संस्क्रियते। गुणोऽर्ति संयोगाद्योरिति गुणः प्राप्नोति॥ एवं तर्ह्यभक्तः करिष्यते। अभक्ते स्वरे दोषः यद्यभक्तः॥ ॥ ॥

=पौर्वादिः एवं च न स्पष्टभावा विस्तकृत्वंचासंबद्धस्यादिति भावः।१= =पदांतत्वादिति। स सजुषो रिति सनेन।१= =पयान्यासे पीति। वा शरीति विसर्गो पदान्त इत्यर्थः।१= =पौर्वापर्यं चेति। वस्त सामर्थ्यादिति भावः। इदं च संपु ऽधामिति वार्तिकारंभे व्यावर्तकं। अन्यथा तस्यापि सुटि परत्वात्प्रत्येकं ...।१=

पौर्वापर्यामावादभकारस्य रुत्वं न प्राप्नोति। स्तुक स्तुपदांतत्वादुत्वप्रसंगः सं पुंकानामिति। एतच्च यथान्यासेऽपि वक्तव्यमिति भावः। सुटि सकारादाविति। यथान्यासाश्रये गौरुच्यते। सुवि संकारादाविति वक्तव्यं। तत्र सकारादित्वविशेषणान्यथानुपपत्त्या सुकोऽन्त्यत्वाभावः पौर्वापर्यं चाश्रुतिकृतमाश्रयिष्यते। अभक्त इति। टकारोऽनुबंधो न करिष्यते॥ ॥ ॥

भा० कै० ६
६८

स्वरो न सिध्यतीति। स्वरविधौ व्यंजनमविद्यमानवदिति परिभाषा नास्तीति ज्ञापयति हि हल्स्वरप्राप्तौ व्यंजनमविद्यमानवदिति तदेवममन्तपक्षे स्वरदोषप्रसंगात्परादिः सुट् क्रियते। इड्गुणौ स्तु प्रतिषेधो वक्तव्य एव। अथ वा एकाच उपदेशेऽनुदात्तादित्यत उपदेशग्रहणमनुवर्त्तते संयोगादेरित्यत्रानुवर्त्तते। तेनोपदेशे संयोगादेरिति विधानात् सुटि कृते न भविष्यति। गुणोर्त्तिसंयोगाद्योरित्यत्रापि नित्यं छन्दसीत्यतो नित्यग्रहणमनुवृत्तेः सानित्यं यः संयोगादिस्तस्य गुणविधानात् सुटि कृते तेसं

स्वरो न सिध्यतीति संस्करोति। तिङ्ङतिङ इति निघातो न प्राप्नोति। ननु चात्र सुडेवातिङ्। न सुटः परस्य निघातेन भवितव्यं॥ किं कारणं। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः नञिवयुक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते। तद्यथा। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं क्षत्रियमानयति। नासौ लोष्टमानीय कृती भवति। एवमिहाप्यतिङिति प्रतिषेधादन्यस्मादतिङः तिङ्सदृशात्कार्यं विज्ञास्यते किं चान्यदतिङ्सदृशं पदं। अपाच्चतुष्पात्। किरते हर्षजीविकाकुलायकरणेषु किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यं। अपस्किरते वृषभो हृष्टः अपस्किरते कुक्कुटो भक्षार्थी। अपस्किरते श्वा आश्रयार्थी। अपरस्पराः। किमिदं सातत्य इति संततस्य भावः सातत्यं। यद्येवं सांततस इति भवितव्यं॥ ॥ ॥

=स्वरोपात्तोपाधेर्विषयविशेषाद्व्यवस्थापनाय वार्त्तिकं। तत्रात्मनेपदवत्सुटो तिङ् २ विषयविशेषे विधानसामर्थ्यादेव सिद्धे सत्यांशोपाधिरनर्थक इत्याह हर्षादयस्त्वेव ॥ एतत्समानाकारमेवात्मनेपदविधायकमेतान्मेव वचो ... =

योगादेर्गुणाभावः। अपस्किरते इति। हर्षादय एवोपाधय उपादातव्याः न चतुष्पाच्छकुनयः तथा चात्मनेपदविधौ हर्षादय एवोपात्ताः न चतुष्पाच्छकुनयः। न चातिप्रसंगो विशिष्टहर्षादिविषयत्वात् सुडात्मनेपदयोः प्रयुक्तानां शब्दानां साधुत्वान्वाख्यानात्। अपरस्पराः किमिदमिति। मकारलोपलक्षणानुत्वं प्रभान्निपातनाश्रयणे न बाधकत्वान्निपातनानां संततशब्दस्य बाधप्रसंगात्प्रश्नः॥ ॥श्री॥ ॥ ॥ एम० ६८

इतरो लक्षणान्तरं शब्दान्तरसिद्ध्यर्थमवश्यमाश्रयितव्यमिति मन्यमान आह । समो हिततततयोर्वेति । उभयविकल्पा या आश्रयेणानुसंततस्य भाव इति वाक्यमेव भवति । ननु ष्यन्त्रि ति सांततस्यमिति न भवति । संहितायां समासे चैषां मकारलोपः पर्युद्यते नान्यत्रे सारुः गोष्पदं । सेवितप्रसंग इति । यत्र सेवनं संभवति तत्रैव स्यात् । यत्र तु गवामसंततमसंभवस्तत्र न स्यात् । असेवितग्रहणसामर्थ्यात् बहुव्रीहिराश्रीयते । तेन यत्र गवामसंततमसंभवस्तत्रैव गोष्पदशब्दः प्रयोक्तव्यो न तु सेवितप्रसंग इति केचिदाहुः । अन्ये त्वविशेषेण गोष्पदशब्दप्रयोगमिच्छन्ति । असेविते गोष्पदशब्दस्यासंभवाद् गोष्पदशब्दार्थमसेवितग्रहणं । इह प्रमाणे गोष्पदशब्दो निपात्यते यदा वर्षादेः परिच्छेदः प्रतिपाद्यते गो

=बहुव्रीहित्वं तु ... असेवितशब्द इति । ननु सेवितेपि गोष्पदस्यैव निपातनादगोष्पदानीत्युदाहरणासंगतिः ... ॥१= ननु ... आह । अव्ययीभाव इति ॥४= अविशेषेणेति सेवनसंभवे गवामसंततासंभवे चेत्यर्थः ॥२=

समो हिततततयोर्वा लोपः समो हिततततयोर्वा लोपो वक्तव्यः । संहितं सहितं । समस्तुमुनोः कामे लोपो वक्तव्यः सकामो भोक्तुकामो मनसि च वक्तव्यं । समनाः भोक्तुमनाः । अवश्यमः कृत्ये लोपो वक्तव्यः । अवश्यभाव्यं । गोष्पदं । इदमपि बहु क्रियते सेवितासेवितप्रमाणेषु इति । सेवितप्रमाणयोरिति सिद्धं । केनेदानीमसेविते भविष्यति । न चासेवितप्रतिषेधं विज्ञास्यामः । नैवं शक्यं । सेवितप्रसंग एव स्यात् असेविते न स्यात् । असेवितग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञास्यते अविद्यमानसेवितेः सेविते । तस्मादसेवितग्रहणं कर्तव्यं विष्किरः विष्किरः शकुनौ विकिरो वेति वक्तव्यं । शकुनौ वेति सुच्यमाने शकुनौ वा स्या-

×संततं सततं ×४ (१ दन्यत्रापि नित्यं । तत्तर्हि वक्तव्यं न वक्तव्यं ॥ ॥ ॥

=अपि किराविकल्प इति शकुनौ वा अन्यत्र वेत्याकारः ... भाष्ये ... ॥१= तत्तुल्यजातीय इत्यर्थः ॥१= सर्वे शकुनयो ... कुक्कुटादय ... ॥२= ... शकुनौ विकिरो वा भवति ...

ष्पदप्रं वृष्टो देवो गोष्पदमात्रं क्षेत्रमिति । नात्र गोष्पदं स्वार्थमुपादीयते यथा चेलक्नोपं वृष्टो देव इत्यसमस्तमपि चेलक्नोपम प्रयुज्यते न तथा गोष्पदप्रं वृष्टो देव इत्यसमस्तमपि गोः पादपूरणे । विष्किरः विष्किरः शकुनौ वेति सूत्रपाठमाश्रित्य वार्तिकारंभः । शकुनौ वा स्यादिति । इह सिद्धशब्दस्य विकल्पेनाभिसंबंधो नास्ति यथा मेध्यः पशुर्विभाषित इति नात्र पशुत्वं विकल्प्यते किं तर्हि आलंभनं तत्र स्वाधिकरणे विकल्पः प्राप्नोतीति भावः । यदि त्वन्यत्रापि स्यात् किमर्थं शकुनिग्रहणमिति चेत् तत्तुल्यजातीयप्रतिपत्त्यर्थं ॥ ॥

(१ स्यात् शकुनौ वा भवति तत्तुल्यजातीये चान्यस्मिन्नर्थ इति ॥

भा०कै०६
६९

नवा वचनेनेति स्फुटो भावो विकल्प्यत इत्यर्थः आश्चर्यं आश्चर्यमद्भुतमिति अद्भुतं विस्मयहेतुः अनित्य इत्येवेति निपातनाच्चानित्यविशेषो विस्मयहेतु
र्गृह्यते साचानित्येति वृक्षांतरे तथाविधायाउच्चतायाअदर्शनात् नीलतेति साचसदादिविनश्यत इत्यनित्यता पतनक्रियेति नत्वर्थयुक्तेति भावः अ
बंधनस्यानस्यापतनं नदृश्यत इत्यनित्यं मस्करा मा कृतेति कृतञ्च यं मा कृतेसु पक्रम्य उपशांतितः काम्यकर्म परिहा । लिर्युष्माकं श्रेयसीत्युपदेष्टाम

=नातोघनानवनित्येआश्चर्यशब्दप्रयोगइतिभावः।२=   भवंता   =निपातनानःसुडिन्यर्थः।१=

नवा वचनेन शकुनिरभिसंबध्यते किं तर्हि [redacted] निपातनमभिसंबध्यते विष्किर इत्येतन्निपातनं शकुनौ वानिपात्यत इति।
आश्चर्यं आश्चर्यमद्भुत इतिवक्तव्यं इहापियथास्यात् आश्चर्यमुच्चतावृक्षस्य आश्चर्यं नीलाद्यौः। आश्चर्यं मंतरिक्षेऽबंधनानि नक्षत्राणि
न पतंतीति। नत्वर्हि वक्तव्यं नवक्तव्यं अनित्य इत्येवसिद्धं इहतावदाश्चर्यमुच्चतावृक्षस्येति आश्चर्यग्रहणेन वृक्षोभिसंबध्यते किं तर्हि उच्चतासा
चानित्या आश्चर्यं नीला द्यौरिति नाश्चर्यग्रहणेन द्यौरभिसंबध्यते किं तर्हि नीलता साचानित्या आश्चर्यमंतरिक्षेऽबंधनानि नक्षत्राणि न पतं
तीति नाश्चर्यग्रहणेन नक्षत्राण्यभिसंबध्यंते किं तर्हि पतनक्रिया साचानित्या तत्रानित्य इत्येव सिद्धं मस्कर मस्करिग्रहणं शक्यमकर्तुं कथंमस्क
री परिव्राजकः इनिनैतन्मत्वर्थीयेन सिद्धं मस्करोस्यास्तीति नवै [redacted] मस्करोस्यास्तीति मस्करी परिव्राजकः किं तर्हि मा कृत कर्माणि शांति
र्वः श्रेयसीत्याहातो मस्करी परिव्राजकः पारस्कर अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः पारस्करो देशः कारस्करो वृक्षः रथस्यानदी किं
ष्किंधा गुहा किष्कुः तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च तस्करः बृहस्पतिः प्रायस्य चित्तिचित्तयोः सुड स्कारो वा प्रायश्चित्तिः प्रायश्चि
त्तं   इति श्रीमत्पतंजलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य प्रथमे पादे पंचममाह्निकम्॥   ॥   ॥

स्करीत्युच्यते माङ्युपपदे कृञ् इतीरितिः सुडागमो माङो ह्रस्वश्च निपात्यते पारस्करं तत्करोतीति तस्करः तच्छब्देन चौरकर्म प्रसिद्धं नित्यं परामृश्यते अस्कार इति   राम० ६९
अस्यस्थाने अस्कारो स्कारः शकंध्वादित्वात्पररूपं इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे पंचमाह्निकम्॥   ॥

=अस्यस्थानेइतिप्रायशब्दस्याकारस्यस्थानेइत्यर्थः।अन्यथासर्वादेशःस्यादितिभावः।१=

अनुदात्तं पदमेकवर्जं। किमनुदात्तानीति। पदमिति जातावेकवचनं मन्यते यथा ग्रहं संमार्ष्टीति ग्रहाणां यथा संस्कार्यत्वात्प्राधान्यात्संख्याया अविवक्षा तथा पदमित्यत्रापि पदस्य संस्कार्य-
त्वात् अनुदात्तत्वं प्रति चलौ किं मन्यते। लोकास्तुदात्तं पदमनुदात्तं पदमिति व्यपदिशन्ति॥ अनुदात्तगुणयोगात्पदमनुदात्तं। तत्राचामनुदात्तगुणयोगे यं जनमपि तत्साहचर्यात्त-
द्धर्मि गृह्यते इसकलसमुदायरूपं पदमनुदात्तं इति सामानाधिकरण्येन निर्देश उपपद्यते॥ एकवर्जमित्यत्रैकशब्देन प्रत्यासत्त्या पदमेवोच्यते तत्रायं सूत्रार्थो वाक्ये पदमेकं वर्ज-
यित्वा पदान्तराण्यनुदात्तानि भवन्तीति पूर्वः पक्षः पदे येषामिति। यथा पशुना यजेतेति व्यक्तिगतमेकत्वं यथा गुणत्वादप्राधान्याद्विवक्ष्यते। तथा पदमित्यत्रा

=नन्वनुदात्तानीत्यादि अस्याविपरिभाषितत्वात्पदेन सामानाधिकरण्यमयुक्तमतआह· अनुदात्तेति·२= यथा ग्रहमिति·अविवक्षा च यथैव यज्ञातावेकवचनकरणं·१= अनुदात्तगुणयोगादिति·गुणगुणिनोरभेदोपचारादिति भावः। तथास्य सामानाधिकरण्यनिर्देशोऽनुदात्तं पदमिति·१=

अनुदात्तं। किमनुदात्तानि पदानि भवन्तीत्येकं पदं वर्जयित्वा नेत्याह। पदे येषामुदात्तप्रसंगः तेऽनुदात्ता भवन्ति एकमचं वर्जयित्वा॥ सत्त-
र्हि तथा निर्देशः कर्तव्यः अनुदात्ताः पदे अनुदात्ताः पदस्येति वा। न कर्तव्यः अनुदात्तं पदमेकवर्जमित्येव सिद्धं कथं॥ ॥

=नन्वेवमनुदात्तशब्देनानुदात्ताच्कपदाभिधाने पदस्य प्राधान्यादेकशब्देन परामर्शः स्यात्तत्र च इत्यत आह·पदेहीत्यादिः·२= =पदेन सामानाधिकरण्यं तत्वर्भावि चार्थयं·१=

पि पदानुवादेनाचामनुदात्तविधानात्सदस्यगुणत्वादुर्णोश्च संख्याया अविवक्षितत्वात्। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति चास्मायाः अनुदात्तशब्देनाच उच्यन्ते॥ एकव-
र्जमित्यत्राप्येकशब्देनाज्ज एव गृह्यते। यदि ह्येकशब्देन पदं गृह्येत ततो नियमकारणाभावात्सर्वेषां पदानां पर्यायेण वर्जनात्स्वरनियमो न स्यात्। अचस्तु ग्रहणे यस्याचः स्वरो
बलवान्स वर्ज्येत इत्यस्ति नियमाभावः सत्तर्हीति॥ अजकलसमुदायवाचिनः पदशब्दस्याज्मात्र [redacted] वाचिना उदात्तशब्देन सामानाधिकरण्य-
मनुपपन्नमिति भावः॥ ॥ ॥

भा० कै० ६ मतुब्लोप इति। अवयवावयविनोरभेदोपचारादनुत्पत्तिरेव मतुब्लोपः नतु गुणवचनेभ्यो मतुपो लुगिति मतुब्लोपः अनुदात्त शब्दस्याधिसंज्ञात्वेन विनियोगाद्गुणवचन
७० त्वाभावात् पुष्यका इति त्रयो विंशति उच्यंते तेन योगात् विज्ञात्वाः पुष्यकाः साकुः अयवेति भेदसंबंधाश्रयेण प्रतिपाद्यते अर्शआदेराकृतिगणत्वादकारः कि
मर्थमिति। पर्यायो योगपद्ययोर्वक्ष्यमाणो नत्वा पकेन निरासान्वार्थः सत्रेणेति मत्वा प्रश्नः चत्वार इति चत्वेरूरन्निति चतुः शब्द आद्युदात्तः आँदात्तः तत्र विरोधा
मु

मतुब्लोपे त्रयः तद्यथा पुष्यका एषां ते पुष्यकाः कालका एषां ते कालकाः अथवाकारो मत्वर्थीयः तद्यथा तुंदो घाट इति किमर्थं पुन
रिदमुच्यते आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः आगमस्य चतुरनडुहेराम् उदात्तः चत्वारः अ
नड्वाहः विकारस्य अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः अस्थ्ना दध्ना प्रकृतेः गोपायति। धूपायति प्रत्ययस्य च कर्तव्यं तैत्तिरीयः =मधोदात्तमिति...
एतेषां पदे युगपत्स्वरः प्राप्नोति इष्यते चैकः स्यादिति तच्चांतरेण यत्नं न सिध्यतीत्यनुदात्तं पदमेकवर्जमेवमर्थमिदमुच्यते नैतदस्ति
प्रयोजनं योगपद्यं तवै सिद्धं यदयं तवै चांतश्च युगपदिति सिद्धे योगपद्ये यौगपद्यं शास्ति तत् ज्ञापयत्याचार्यः न युगपत्स्वरो भवती
ति ॥ ॥

भावादुदात्तद्वयप्रसंगः अनड्वाह इति अनो वहतीति अनसि वहेः क्विब् अनस इति क्विप् अन प्रशब्दो युत्प्रत्ययांत आद्युदात्तः गतिकारकोपपदात्कृदित्युत्तरपद
प्रकृतिस्वरेण धातुरंतोदात्तः अस्थ्ना इति असि संज्ञिभ्यां क्थिन् नित्साद्युदात्तो क्थिन्शब्दो दधिशब्दो [redacted] न द्विविषयस्तानि संतत्सेत्साद्युदात्तः। तवै चांतश्च युगपदिति अनेन
गतेः पूर्वस्य पदस्य प्रकृतिस्वरो विधीयते तवै प्रत्ययांतस्य चांतोदात्तत्वं तत्र युगपद्ग्रहणमंतरेण विरोधाभावाद्योगपद्ये सिद्धे युगपद्ग्रहणमन्यत्र योगपद्याभावस्य एम०
ज्ञापकं ॥ ॥ ७०

पर्यायस्तर्हीति॥ ज्ञापकेन यौगपद्येनिरस्ते पर्यायप्रसंगः ॥ िके विभाषेति। अनेनाद्युदात्तत्वं पक्षे त्वं तो दात्तत्वं तस्य प्रत्ययस्वरेण॥ तदेवं पर्याययौगपद्यनिरासे पर
निसत्वादियुक्तं स्वरो भविष्यतीति नार्थं सूत्रेण॥ स्वरितेनेति। उदात्तस्वरितयोरेकस्मिन्नचि देसमावेशप्रसंगः स्वरितेऽपीति। उदात्ते पर्याययौगपद्यनिरासे ज्ञापका

पर्यायस्तर्हि प्राप्नोति॥ पर्यायो रिक्त शासनात्॥ यदयं रिक्ते विभाषेति सिद्धे पर्याये पर्यायं शास्ति तत् ज्ञाप
यत्याचार्यः न पर्यायो भवतीति॥ उदात्ते ज्ञापकं त्वेतत् एतदुदात्ते ज्ञापकं स्यात्। स्वरिते न समाविशे
त्॥ स्वरितेन समावेशः प्राप्नोति। स्वरिते ऽप्युदात्तो ऽस्ति तस्मान्नार्थो नेनयोगेन॥ ॥

ल[redacted]ते स्वरिते ऽप्युदात्तसद्भावादुदात्तस्वरितयोरपि पर्याययौगपद्यनिरासः सिद्ध इत्यर्थः। उदात्तश्रुतिमात्रविषयस्य ज्ञापकस्याश्रयणादेवं लभ्यते यत्तू
दात्तश्रुत्या स्वरितस्याग्रहणमिह शास्त्रे तद्युक्तं। मुख्यस्योदात्तस्याचः संज्ञिनो ग्रहणस्य युक्तत्वात्। तथा चोदात्तस्वरितयोरिसादौ भेदेन स्वरितो निर्दिष्टः
१॥ ॥ ॥श्री॥ ॥

भा०कै०६ ७१ आरम्यमाणेपीति ज्ञापकादस्य शास्त्रस्य संदिग्धा प्रतिपत्तिर्भवति साक्षाद्विधाने तु स्पष्टा चासंदिग्धा चेति यदि योग आरभ्यते तदा आरभ्यमाणे दोषप्रसंगः इदमेवानुदात्त
स्य विधाय कं लक्षणमिति मत्वा दोषोपन्यासः एकमचं वर्जयित्वा शिष्टानाम[redacted]चामनेनानुदात्तत्वं क्रियते तत्र येषामचामुदात्तत्वं स्वरितत्वं वा साक्षान्न विधीयते
ते स्यावकाश इति येषां शास्त्रेण उदात्तत्वं स्वरितत्वं वा विधीयते तत्रैषा न निवर्त्येत । यथामलकीज इत्यत्र चतुर्णामुदात्तत्वं शास्त्रेण विधीयते ई । षं प्रत्ययाद्युदात्तत्वं गति
कारकोपपदात्कृदिति कृत्स्वरः ई । घेकाशानुबन्धाष्टद्वेट्ज इति पूर्वपदाद्युदात्तत्वं । अयं तास्मृवेव हृच इति लकारस्योदात्तत्वमिति विरोधाभावाद्युगपदुदात्तचतुष्टयं स्यात्

= असम्भवे इति । विलंबेनोपस्थानात् । संदिग्धेति । किमुदात्तश्रुतिमात्रविषयं ज्ञापकमुतानुस्यूतोदात्तग्रहणं तद्वारेणास्याप्रवृत्तिरिति स्वरूपा । ४ =

आरभ्यमाणेप्येतस्मिन्ननुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्संभवात् अनुदात्ते विप्रतिषेधो नोपपद्यते पठिष्यति त्याचार्यो विप्रतिषेधं
जेदीर्घात् बहृच इति सविप्रतिषेधो नोपपद्यते । किं कारणं एकस्मिन्युगपत्संभवात् असति खलु संभवे विप्रतिषेधो भवति अस्ति च संभवो यदुभयं स्या
त् कथं संभवः यदनुदात्तं पदमेकवर्जमित्युच्यते तदिह नास्ति किं कारणं नानेनोदात्तत्वं प्रतिषिध्यते किं तर्हि अनुदात्तत्वमनेन क्रियते अस्ति च सं
१ भवो यदुभयोश्चोदात्तत्वं स्यात् अन्येषां चानुदात्तत्वं ॥ ॥ ॥

= नत्वतीति । एवंमुत्पादनं किमर्थमिति चिंत्यमेतत् । २ =

= इत्वं च परिभाषापक्षेपि समानमित्याह । तथा चेति । १ =

शिष्टस्य चानुदात्तत्वमेकवर्जमित्यस्मादिर्वचनाद्यस्य यस्योदात्तस्वरितविधानं स सवर्ज्येत इति विप्रतिषेधानुपपत्तिश्चोद्यते तथा चांतस्थत्वे युगपदिसादिषु पूर्वोक्ते न प्रकारे
ण द्वावपि वर्ज्येते । उदात्तादनुदात्तस्य स्वरित इति स्वरितत्वं न भवति नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति प्रतिषेधात् । एकस्मिन्निति । पद इत्यर्थः नानेनोदा
त्तत्वं प्रतिषिध्यत इति यदि नोदात्तं पदमेकवर्जमिति सूत्रन्यासं कृत्वा उदात्तत्वं प्रतिषिध्येत तदा स्याद्दोषः एकं चं वर्जयित्वा सर्वेषामुदात्तत्वनिषेधात् क्वचित्पाठो नानेनोदात्तत्वं क्रिय ॥ राम० ७१
त इति तत्रायमर्थोपपद्युदात्तं पद एकमिति सूत्रं कृत्वोदात्तमेकमेव पदे भवतीति नियमाद्योदात्तत्वं क्रियते तदा न स्याद्दोषः ॥ ॥

परिभाषेयमिति न्यासांतरे यदि परिभाषात्वमाश्रीयते तदा यथान्यासेऽपि न दोषः फले विशेषाभावात्स्वरविधिलिंगाच्चेयं परिभाषा एकशब्दः संख्येयवाची अनुदात्तं सुपा
दात्ताद्विरोधी स्वरित उदात्त स्य संख्येयोग्यत्वात् न तत्रोदात्तस्वरितविधावस्या उपस्थानात्तद्वयोर्लक्षणयोरस्या उपस्थाने विप्रतिषेधोपपत्तिः अथवेति लक्षणमिदमु
दात्तत्वप्रतिषेधार्थमेकवर्जमित्यस्मिन्ने न तु प्रतिषेधपर्युदासं क्रियत इति लक्षणद्वयस्यैकस्मिन्प्रदेसंनिपाते कोवर्ज्यतामित्युपेयते विप्रतिषेधः स्वरितेऽप्युदात्तोऽस्ती

=सर्वपदमुदात्तरहितं भवतीत्यर्थः ७५ क सेक स्यापत्तु रामस्त्रितिचेयस्य लक्षणंतरेण स्वरविधिरितिलक्षण ७=

परिभाषेयं किंकृतं भवति कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यं जेदीर्घो नस्मादिरुदात्तो भवतीत्युपस्थितमिदं भवत्यनु
दात्तं पदमेकवर्जमिति अंसासूर्वेब द्रूच इत्युपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति तत्र पूर्वेणात्रवर्ज्यमानता परेण वेति परेणा भविष्य
तिपरत्वात् अथवानेदं परिभाषिकानुदात्तस्य ग्रहणं किं तर्ह्यन्वर्थग्रहणं अविद्यमानोदात्तमनुदात्तमिति एकवर्जमिति चाप्रसिद्धिः संदेहात्
एकवर्जमिति चाप्रसिद्धिः कुतः संदेहात् न ज्ञायते क एको वर्जयितव्य इति सिद्धं तु यस्मिन्ननुदात्त उदात्तवचनानर्थकं तदर्जं सिद्धमेतत्कथं य
स्मिन्ननुदात्ते उदात्तवचनमनर्थकं स्यात् स एको वर्जयितव्यः। प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वादप्रसिद्धिः प्रकृतिप्रत्यययोः स्वरस्य सावका
शत्वादप्रसिद्धिः स्यात् प्रकृतिस्वरस्यावकाशः यत्रानुदात्तः प्रत्ययः पचति प्रकृतिप्रत्ययस्वरस्यावकाशः यत्रानुदात्ता प्रकृतिः समत्वं सिमत्वं इहोभ
ये प्राप्नोति। कर्तव्यं तैत्तिरीयः॥ ॥ ॥

तित्तस्यापि प्रतिषेधोऽनेन विधीयते एकवर्जमिति चाप्रसिद्धिरिति परनित्यांतरंगत्वेन सर्वत्र व्यवस्थानामिमतेति भावः। सिद्धं त्विति। अनवकाशास्वरो वर्ज्यत इत्यर्थः। अनव
काशत्वेन सर्वत्र व्यवस्थानोपपद्यत इति मतलाहा। प्रकृतिप्रत्यययोरिति॥ ॥श्री॥ ॥श्री॥ ॥७॥

विप्रतिषेधादिति। पूर्वं विप्रतिषेधादित्यर्थः। काम्यापादयइति। काम्यच्यञ्चित्करणां प्रत्याख्यातं तत्कर्तव्यमेव। ञ्यापेयइत्यस्य पूर्वं चित्वं कर्तव्यमित्युभयोपादानं उच्य-
न्यथा पूर्वं विप्रतिषेधाद्धातुस्वरं बाधित्वा प्रत्यया द्युदात्तत्वं स्यात्। प्रकृतिस्वर इति। धातुस्वरः सतिशिष्टत्वाद्भविष्यतीति भावः। सिद्धमिति। प्रकृतिस्वराद्बलीयस्त्व

विप्रतिषेधात्प्रत्ययस्वरो भविष्यति नैवं विप्रतिषेधे परमित्युच्यते न परः प्रत्ययस्वरः नैष दोषः इष्टवाचीपरशब्दः विप्रतिषेधे परं यदिष्टं त-
द्भवतीति विप्रतिषेधात्प्रत्ययस्वर इति चेत्काम्यायादिषु चित्करणं विप्रतिषेधात्प्रत्ययस्वर इति चेत्काम्यादिषु चित्करणं कर्तव्यम् पुत्रका-
म्यति गोपायति ऋतीयते नैष दोषः प्रकृतिस्वरोऽत्र बाधको भविष्यति। प्रकृतिस्वरे प्रत्ययस्वराभावः कर्तव्यः तैत्तिरीयं सिद्धं तु प्रकृ-
तिस्वरबलीयस्त्वात्प्रत्ययस्वराभावः सिद्धमेतत्कथं प्रकृतिस्वरात् बलीयस्त्वात्प्रत्ययस्वरस्याभावः सिद्धः कथं प्रकृतिस्वरात्प्रत्ययस्वरो बली-
[redacted]यान् भवतीति वक्तव्यं सतिशिष्टस्वरबलीयस्त्वं च सतिशिष्टस्वरबलीयस्त्वं च वक्तव्यं तच्चानेकप्रत्ययसमासार्थं तच्चावश्यं सति-
शिष्टस्वरबलीयस्त्वं वक्तव्यं किं प्रयोजनं अनेकप्रत्ययार्थमनेकसमासार्थं च अनेकप्रत्ययार्थं तावत् औपगवः प्रकृतिस्वरमप्रत्यस्व-
=प्रकृतिस्वरात्प्रत्ययस्वरस्य बलीयस्त्वं पि गोपायतीत्यादौ दोषोत आह- सतिशिष्ट इति- स्वरं व्यापकत्वादित्येवादर्शनं-२- १रो बाधते॥ ॥श्री॥ ॥७॥

मितिसुप्सुपेति समासः सतिशिष्टबलीयस्त्वाद्धि कर्तव्यमित्यादौ प्रकृतिस्वरं बाधित्वा प्रत्ययस्वरो भवति गोपायतीत्यादौ धातुस्वर एव सतिशिष्ट इति प्रत्ययस्व-
राभावः कः पुनर्विशेषः काम्यादयश्चितः क्रियेरन् सतिशिष्टबलीयस्त्वं वोच्येत इत्याशंक्याह। तच्चेति॥ ॥ ॥

भा०कै०६
७३

औपगवत्वमिति एकयोगलक्षणो ऽन्तस्वर इति विप्रतिषेधेनाव्यवस्थायाः प्रसिद्धत्वात् स्यादिस्वर इति विकरणस्वर इत्यर्थः सार्वधातुके परतः स्यादीनां विधानात् तत्स्वरः स
तिशिष्टः तासेः परस्यैव परत्वाल्लादेशे कृते सुतासिरिति प्रक्रियाश्रयेण ज्ञापकमुच्यते लावस्थायां तु तासौ कृते सार्वधातुकोऽसन्नौ न ज्ञापकं भवति लसार्वधातुकस्वर
स्य सतिशिष्टतया प्रसंगात् तद्बाधनार्थत्वादनुदात्तविधानस्य शास्त्रपरेति विप्रतिषेधे परं कार्यमित्यत्र नायं नियमो लक्षणयोर्विप्रतिषेधे परं भवतीति किं त

तिर

×राजपुरुषः। राजपुरुषपुत्रः।×१

=नेतिः तथा चैतत्तांशे वा वनिकं मिं यितिभावः।२=

औपगवत्वं तत्स्वरेण स्वरं बाधते औपगवत्वकं त्वस्वरं कस्वरो बाधते ऽनेकसमासार्थे राजपुरुषपुत्रपुरुषः यदि सतिशिष्टस्वरबलीयस्त्व
मुच्यते स्यादिस्वरं सार्वधातुकस्वरं बाधेत सुनुतः चिनुतः स्यादिस्वरप्रसंगश्च तासेः परस्यानुदात्तवचनात् स्यादिस्वरस्य चाप्रसंगः कुतः ता
सेः परस्यानुदात्तवचनात् यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः सतिशिष्टो ऽपि विकरणस्वरो लसार्वधातुक
स्वरं न बाधत इति शास्त्रविप्रतिषेधान्नियमाच्छब्दपरविप्रतिषेधाः सिद्धं ऽथ वा शास्त्रपरविप्रतिषेधेन सर्वमिष्टं संगृहीतं भवतीति कलशब्द
परविप्रतिषेधो विज्ञास्यते यदि शब्दपरविप्रतिषेधो भवति काम्यादयश्चितः कर्त्तव्याः पुत्रकाम्यतिगोपायतिस्तनीयतेः शब्दपरविप्रतिषे
धो नाम संभवति यत्रोभयोर्युगपत्प्रसंगः न च काम्यादिषु युगपत्प्रसंग इति विभक्तिस्वरान्न ऽस्वरो बलीयान् विभक्तिस्वरान्नञ्स्वरो बलीयानि
ति वक्तव्यं॥ ॥

=पवयुगपत्प्रसंगाभावाच्छब्दपरविप्रतिषेधासंभवात् काम्या (पर२) दिषु चितकरणमवश्यं कर्त्तव्यमिति भावः।१=काम्यचश्चित्त्वस्यफलं तासु पुत्रकाम्यतीत्यत्र नस्तो ऽन्तर्भावः गोपायतीति।२=

त्येकलक्षणविहितयोरपि कार्ययोर्विप्रतिषेधे परशब्दविषयत्वात् परं कार्यं भवतीत्येषो ऽप्यर्थ आश्रीयते यदीति पुत्रकाम्यतीत्यत्र काम्यप्रत्ययस्याद्युदात्तत्वं प्राप्नोति न त्वत्र श
ब्दपरविप्रतिषेधोपपत्तिः एकत्वात्प्रत्ययस्येति भावः यत्रोभयोरिति गोपायतीत्यादौ तु प्रत्ययाद्युदात्तत्वस्य धातुस्वरस्य च युगपत्प्रसंगाभावः कृते प्रत्ययस्वरे आयाद्यन्तस्य धातु
त्वे सति धातुस्वरस्य प्रसंगात् तस्मादत्र सतिशिष्टस्यैव बलीयस्त्वमाश्रयणीयम् विभक्तिस्वरादिति सतिशिष्टत्वाद्विभक्तिस्वरे प्राप्ते वचनम्॥ ॥ ॥

=एकत्वादिति तथा चयत्र शब्दपरविप्रतिषेधो न संभवति तत्रैव शब्दपरविप्रतिषेधो ऽङ्गीकरणीयः सुपाधाम्याम इति...शब्दपरविप्रतिषेधो नामेति तथा चेष्टं गोपायतीत्यादौ...कृते प्रत्ययस्वरे धातुसंज्ञा...

राम०
७३

तिसृइति तिसृभ्योजसइतिविभक्तेरुदात्तत्वं अतिसृइति नसुभ्यामेतुल्यार्थैतिनञःप्रकृतिस्वरोभवति विभक्तिनिमित्तस्वरादिति विभक्तिर्निमित्तंयस्यतस्य यःस्वरस्तस्मादित्यर्थः अकरणिरिति आक्रोशेनञ्यनिरिस्यनिःगतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरोनञ्स्वरेणबाध्यते अव्ययीति जिदृक्षीतीनि प्रत्ययः अजात्यथेतिधातुनासहनिर्दिष्टोनञनएयागितिप्रत्ययस्वरंबाधित्वानञ्स्वरोभवति नञःसप्तमीनिर्दिष्टाभावादुपपदत्वाभावात्पृथग्वचनमा

=परत्वात्कृदुत्तरपदप्रकृतिस्वरेप्राप्तेवचनं=२=

विभक्तिस्वरस्यावकाशःतिसृस्तिष्ठंति नञ्स्वरस्यावकाशः अब्राह्मणःअवृषलः इहोभयंप्राप्नोति अतिसृःनञ्स्वरोभवति विभक्तिनिमित्तस्वराच्च नञ्स्वरोबलीयानितिवक्तव्यं विभक्तिनिमित्तस्वरस्यावकाशः चत्वारः॥ अनड्वाहः नञ्स्वरस्य सएव इहोभयंप्राप्नोति अचत्वारः अनड्वाहः यच्चोपपदंकृतिनञ्तस्यचस्वरोबलीयानितिवक्तव्यं अकरणिर्हतेवृषल सहनञानिर्दिष्टस्यच नञ्स्वरोबलीयानितिवक्तव्यं यस्यकर्षेविकरणान्तरूपंतस्यप्रयोगःस्यात् इहमाभूत् हलस्यकर्षइति अथकिमर्थमनुपानिर्देशः क्रियते नकर्षात्तइत्येवोच्येत कर्षात्तइतीयत्युच्यमाने यत्रैवाकारादनंतरोघञस्ति तत्रैवस्यात् धायःदापः इहनस्यात्पाकःपाठः

×अव्ययी·कर्षा·किमर्थंकर्षेविकृतस्यग्रहणं×१ नक्कचिदाकारादनंतरोघञस्ति इहापिदायोधायइतिपुकाव्यवधानं ॥ ॥

×क्रियते·नकर्षात्तइत्येवोच्येत·×२

एवं तत्राथयेतिनिपातनान्नञोधातुनासमासेलोपेचकृते प्रत्ययइतिसतिशिष्टःप्रत्ययस्वरःप्राप्नोतीति वचनं कर्षात्व यस्यकर्षेरिति विकरणान्तस्यानुकरणं कर्षेतिनिर्दिष्टमित्यर्थः हलस्यकर्षइति अत्राद्युदात्तत्वमेवभवति अथकिमर्थमिति आकारात्परोनक्कचिद्घञस्तीतिसामर्थ्यात्तद्वतोग्रहणं सिद्ध्यतीतिप्रश्नः पुकाव्यवधानमिति परत्वात् त्रिसत्वाच्चयुक्ते नव्यवधानानंतर्याभावः॥ ॥श्री॥ ॥७॥

भा०कै०६ एवमपीति घञाधातुराक्षिप्त ङान्त इसनेन विशेष्यत इति तदन्तविधौ विज्ञायमाने ङ्यान्तं तयोः संभवाद्द्विधा नं विशेष्येत इति मनुष्यैर्देशः सर्वे संग्रहार्थः क्रि
७४ यते अनुदात्त। अनुदात्तस्येति किमर्थमिति यत्रोदात्तलोप इसे वानुदात्ते लोपो लभ्यते न त्वयमत्रोदात्तो लुप्यत इति प्रश्नः प्रासंग्य इति प्रासज्यत इति प्रासं

एवमपि विहितविशेषणमार्कस्य ग्रहणं विज्ञायेत आकारद्यो विहित इति मनुपग्रहणे पुनः क्रियमाणे न दोषो भवति अनुदात्तस्यच्य
त्रोदात्तलोपः अनुदात्तस्येति किमर्थं प्रासंगवद्गति प्रासंग्यः उदात्तलोपे स्वरितोदात्तयोरभावादनुदात्तग्रहणमनर्थकं उदात्तलो
पे स्वरितोदात्तयोरभावादनुदात्तग्रहणमनर्थकं नहि कश्चिदुदात्तः उदात्ते स्वरिते वा लुप्यते सर्वोऽनुदात्त एव ननु चायमुदात्तः स्व
रिते लुप्यते प्रासंगवद्गति प्रासंग्य इति एषोऽपि निघाते कृतेऽनुदात्त एव लुप्यते इदमिह संप्रधार्यं निघातः क्रियतां लोप इति कि
मत्र कर्तव्यं परत्वाल्लोपः एवं तर्ह्ययमद्य निघातस्वरः सर्वस्वराणामपवादः न चापवादविषये उत्सर्गोऽभिनिविशते पूर्वं ह्यपवादा
अभिनिविशन्ते पश्चादुत्सर्गाः प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते न त्वेतावदत्र कदाचिदंतोदात्तस्याद्यादिस्वरो भवति॥
अपवादं निघातं प्रतीक्षते तत्र निघातः क्रियतां लोप इति यद्यपि परत्वाल्लोपः सोऽसावविद्यमानोदात्तः अनुदात्तो लुप्यते किंतु
ऽनरनुदात्तस्यान्त उदात्तो भवति आहोस्विदादिः॥ ॥

गः कर्मणि घञ्आद्याद्युदात्त स्वरेणान्तोदात्तत्वं न द्वहतीतियत्प्रत्ययः तित्स्वरित इति स्वरितः सोऽसाविति अल्लोपोदात्तयणश्चाकारे लुप्यत इत्यर्थः तदेवमनुदात्त
ग्रहणं प्रत्याख्याते किंपुनरिति यद्यंतग्रहणमनुवर्तते ततो नस्य भवितव्यं अथ नानुवर्तते तदा कमानुदात्तं घनाहादेर्भाव्यमिति पृष्टद्वय संभवः॥ ॥ एम० ७४

विंदाते इति विद विचारणे विद दैन्य इत्यनयो रूपे तास्यनुदात्तेदिति लसार्वधातुकस्यानुदात्तत्वं स्यमः प्रत्ययस्योदात्तत्वं स्यसोरल्लोपः तत्राकारस्योदात्तत्वमि
ष्यते। एकारस्तु प्राप्नोति नन्वागमाः अनुदात्ता भवंतीति स्यमो नुदात्तत्वं प्राप्नोति। एवं तर्हि तन्न ध्यपतितस्तद्ग्रहणेन गृह्यत इति धातुस्वरः परत्वादागमा
नुदात्तत्वं बाधते माहि धुक्षातामिति दुह प्रपूरणे लुङ् आत्मनेपदं च्लेः क्सः अनुपदेशादिति लसार्वधातुकानुदात्तत्वं क्सः प्रत्ययस्वरेणांतोदात्तः क्सस्या
ची सकारलोपः माङ् प्रयोगोऽडागमनिवृत्त्यर्थः अडिति हि सति परमाद्युदात्तं भवति हि प्राक् प्रयोगो हि चेति निघातप्रतिषेधार्थः धुक्षध्वमिति ध्वसो
ध्वमित्यध्वमादेशः क्सो रल्लोपश्चिल्लोप इति प्रक्रियाप्रयोगाधोजावनं। यदा तु ध्वमादेशः क्सोरल्लोपश्चांत्यलोपः तदा दोषाभावः इयानिति किमि

=आगमानुदात्तत्वस्य बाधस्तु स्तन्नस्मैपरेद्धिनिकृत्ते स्थापितत्वात्रानीर्थकमतः ४=

दंतं इति चेत्स्मन् क्सयुष्मदस्मद् इदम् किम् लोपे पुरुस्वरो न सिध्यति स्मम् विंदाते विंदाते। स्मम् क्समाहि धुक्षातां माहि धुक्षाथां
क्सयुष्मद्। अस्मद् युष्मभ्यं। अस्मभ्यं इदम् किम् लोपः। इयान् कियान्। अस्तु तर्ह्यादिः आदिरिति चेत् इंधीतद्वयमित्संतः आदि
रिति चेत् इंधीतद्वयमित्संतोदात्तत्वं विधेयं इंधीत। द्वयं। त्रयं आद्यैर्गसिद्धं अस्तु तर्ह्यादिरुदात्तो भवतीति ननु चोक्तमादिरिति चेत्
इंधीतद्वयमित्संत इति॥ ॥ ॥

दंभ्यां वो घु इति वतुपास्य च पित्वादनुदात्तः। वकारस्य घः घसेयारेशः इदं किमोरीश्की इति ईश्कीशप्रावादेशौ यस्येति ईकारलोपः। इंधीतेति इंधे र्लिङ् तास्यनुदात्तेदित्यनु
दात्तत्वं सीयुट् तस्यागमत्वादनुदात्तत्वं स्मम् स्मात् लोप इति न लोपः स्यसोरल्लोप इति सकारलोपे कृते ईकारस्योदात्तत्वप्रसंगः द्वयमिति द्वावयवावस्य संख्या
या अवयवे तयप् द्वित्रिभ्यां तयस्यायज्वेत्यजादेशः अनुदात्तस्छानिकत्वादनुदात्तः यस्येति चेतीकारलोपे कृते आदेरुदात्तत्वप्रसंगो तस्य चेष्यते त
दर्थं चित्त्वमपचः कर्त्तव्यं इहत्वं तत्र हरणानुवृत्तौ नकर्त्तव्यमिति मलोपन्यासः॥ ॥ ॥ ॥

=अनेन कथादिलोपे पेशंतरम् अस्त्येव गिरस्त्वि तं॥२॥ नन्वेवमपि स्मनः स्वरेण न भाव्यम् अपि नि धाता दो ॥ अथ पेति अस्य देवताः तस्य सार्वधातुकात्

मा॰ कौ॰ ६
७५

विदीधिविविरिम्य इति लसार्वधातुकानुदात्तत्वे प्रतिषिद्धे प्रत्ययस्वरेण तशब्द उदात्तः सीयुडागमस्तत्र अनुदात्तः अथवा नैविकरणस्वरेण लसार्वधातुकस्वरं बाधत इति
वृत्तमानुस्वरेणाप्यमनुदात्त इति न कश्चिद्दोषः इदमपीति इतन ग्रहणानुवृत्ताव पि प्रत्ययो लोपे दोषो नास्तीति भावः अपची चित्करणमेव ज्ञापकं अत इती हन संबध्यते
धे चित्त्वे नार्थः स्यात् धातोः किं धातोरिति यद्युतन ग्रहणमभिसंबध्यते तर्हि तस्योदात्तत्वे न भाव्यं अथन संबध्यते तदा कमानुल्लघ नादादेरिति प्रश्नः ॥ अनुदात्त तिङ् सि ङ्

×प्यथ लसार्वधातुकानुदात्तत्वं लिङि नेति वक्तव्यं ×१

विदीधिविविरिम्य लसार्वधातुकानुदात्तप्रतिषेधात्लिङि सिद्धं विदीधिविविदि लिङ् ग्रहणेन नार्थः विदीधिविविरिम्य स्त्वलसार्वधातुकानुदा ×अविशेषेण×
त्तत्वे नैसेव इदमपि सिद्धं भवति विद्यते विंशते अपचिकथं अपचि चित्करणात् अपचि चित्करणसामर्थ्यात् अन्तोदात्तत्वं भविष्यति धा
तोः किं धातोरन्त उदात्तो भवतीत्याहो स्विदादेरिति कथं तु विशेषः धातोरन्त इति चेदनुदात्ते च वग्रहणं धातोरन्त इति चेदनुदात्तेच वग्र
हणं कर्तव्यं अभ्यस्तानामादिरनुदात्ते चेति वक्तव्यमेव ग्रहणं कर्तव्यं वां तथ पिवति ॥ आद्युदात्तो भवतीति वक्तव्यं पिवति ॥ संख्यानि
लके कर्तव्यः किं प्रयोजनं चिकीर्षति जिहीर्षति नितीसाद्युदात्तत्वं यथा स्यात् अस्तु तर्ह्यादिः आदावूर्णुप्रत्ययधातुष्वन्तोदात्तत्वं आ
दावूर्णुप्रत्ययधातुष्वन्तोदात्तत्वं न सिध्यति ऊर्णोति प्रत्ययधातु गोपायति धूपायति ऋतीयते अन्तोदात्तवचनात्सिद्धं अस्तु तर्ह्यन्तोदा
त्तो भवतीति ननु चोक्तं धातोरन्त इति चेदनुदात्ते च वग्रहणं कर्तव्यमिति यत्तावदुच्यते अनुदात्तेच ग्रहणं कर्तव्यमिति ॥ ॥

इति ददाति इति स्थिते धातोरित्यन्तोदात्तत्वे प्राप्ते आद्युदात्तार्थे [redacted] मनुदात्ते चेति वक्तव्यं पिवतीति लघूपधगुणनिहस्वयोः दन्तः पिविरादे एम॰
शः ततश्चान्तोदात्तत्वबाधनार्थं आद्युदात्तत्वं वक्तव्यं संख्येति धातुस्वरबाधनाय ॥ ॥ श्री ॥ ॥ ॥ ॥ ७५

क्रियतेन्यासएवेति अनुदात्तेचेसेतदेववृत्तापकमिहांतग्रहणाधिकारस्य अर्थवद्ग्रहणइति अखुसन्नत्वादुणादीनामार्थकंमन्यते जुगुप्सतइति सनोर्थ्यानिर्देशात्स
मुदायस्यैवार्थवत्त्वंमन्यते अंततइति यस्यार्थांतरंननिर्दिश्यतेसमसामर्थ्येस्वार्थेभवति इहापीति व्युत्पत्तिपक्षाश्रयेणचोद्यं।पक्षांतराश्रयेणपरिहारः उ
णादयइति एतदनंतरमथवाधातोरितिवर्त्ततइतिग्रंथेनभाव्यं लेखकप्रमादान्नुस्थानांतरेन्यस्तः पाठक्रमाद्धार्थक्रमस्यबलीयस्त्वादत्रप्रदेशेसंबध्यते लिरिधा

क्रियतेन्यासएव अप्यस्तानामादिरनुदात्तेचेति वाग्रहणंकर्त्तव्यमिति पिवौनिपातनात् पिबा^वा^द्युदात्तनिपातनंक्रियते सनिपातनस्वरःप्र
कृतिस्वरस्यबाधकोभविष्यति संख्वनिल्कर्त्तव्यइति अवश्यंसनोविशेषणार्थोनकारःकर्त्तव्यः क्वविशेषणार्थेनार्थःसन्यङोरिति सपङो
रितीयसुच्यमानेहंसोवत्सः अत्रापिप्राप्नोति अर्थवद्ग्रहणेनार्थकस्यसेसेदंनभविष्यति इहापितर्हिनप्राप्नोति जुगुप्सतेमीमांसतइति
अर्थवानेषः नवैकस्मिंश्चिदर्थेआदिश्यते यद्यपिकश्चिदर्थोनादिश्यते अनिर्दिष्टार्थाःप्रत्ययाःस्वार्थेभवंतीसंततःस्वार्थेभविष्यति
कस्मात्सस्वार्थःप्रकृत्यर्थः इहापितर्हिप्राप्नोति।हंसोवत्सइति उणादयोव्युत्पन्नानिप्रातिपदिकानि सएषोऽनन्यार्थोनकारःकर्त्तव्यः [redacted]
[redacted] क्रियतेन्यासएव अथवाधातोरितिवर्त्तते धातोःसनाद्यंतस्यद्वेभवतः इति चितःचितःसप्रकृते॥ ॥ ॥

तोरनभ्यासस्यैसत्वोधातुग्रहणानुवर्त्तनात्सनंतस्यधातोर्द्विर्वचनविधानात्हंसोवत्सइत्यत्रद्वित्वाभावःसिद्धइतिस्वार्थएवसनोनकारःकर्त्तव्यःसचकृतएव चि
तःचितइतिवर्त्तते द्युरजादेःप्रत्ययस्यकृत्ःरिनजादेरप्रत्ययस्यचेहग्रहणं॥ ॥श्री॥ ॥श्री॥ ॥७॥

=पूर्वसूत्रेऽनुवृत्तस्यांत[redacted]पदस्येहापिसंबंधइत्याह।अंतइतीति।१=प्रत्ययप्रत्ययोरितिपरिभाषानुनेहप्रवर्त्ततेतस्यानुसारादित्याह।धुरजादेरिति।१=

भा०कै०६ ७६

बहुकजर्थमिति बहुजकचोरंतोदात्तत्वे प्राप्ते चितः सप्रकृतेरितिवचनं मतुब्लोप इति चिदव्ययवत्त्वात्समुदायस्यैवोच्यते लक्षणानुरोधाद्गौणोप्यर्थः कश्चिदाश्रीयते
एकचं चित्त्वमस्यैवार्थस्य लिंगं अन्यथैकाचादकचश्चित्त्वं न कुर्यात् अप्यके इति मुख्य एव शब्दार्थ एवमाश्रितो भवति नन्वेवं चितः सेति भाव्यमित्याह पूर्वसू
त्रनिर्देश इति पूर्वव्याकरणोपयमयाकार्यो निर्दिश्यते तेन चितः समुदायांतोदात्तत्वं प्रतिपद्यत इत्यर्थः कुडिनजादयो विप्रपरे सिद्धावाश्चित्त्वतउ

बहुकजर्थाचितः सप्रकृतेरितिवक्तव्यं किंप्रयोजनं बहुकजर्थबहुजर्थमकजर्थंच बहुजर्थं तावत् बहुमुक्तं बहुकृतं अकजर्थं सर्वकैः
विश्वकैः उच्चकैः नीचकैः सर्वके विश्वके तर्न्हि वक्तव्यं न वक्तव्यं मतुब्लोपोऽत्र द्रष्टव्यः तद्यथा पुष्पकाएषां ते पुष्पकाः कालकाएषां तेकाल
काः अथवाऽकारोमत्वर्थीयः तद्यथा तुंदो घाट इति। पूर्वसूत्रनिर्देशश्चायं चितइति तिसृभ्यः जस इति किमर्थं। तिसृकाति सृभ्योज
स्यग्रहणानर्थकममन्यत्राभावात् तिसृभ्योजस्यग्रहणानर्थकं किंकारणं। अन्यत्राभावात् नत्यन्य तिसृशब्दादंतोदात्तत्वं प्रयोजयति
अन्यदतोजसः किंकारणं बहुवचनविषयएव तिसृशब्दः तेनैकवचनद्विवचनेनस्तः शासिभवितव्यमुदात्तनयणो हल्पूर्वादिति अन्याः
सर्वाहलादयोविभक्तयः तत्रषट्त्रिचतुर्भ्यो हलादिः ऽत्सुपोन्तमसित्यनेनस्वरेणाभवितव्यं तत्रांतरेणाजसोग्रहणंजस एवभविष्यति। ननुचे
दानीमेवोदाहृतंतिसृकेति नित्यस्वरोऽत्रबाधको भविष्यति। नाप्राप्तेऽन्यस्वरेतिसृस्वरआरभ्यते॥ ॥ ॥

चतंते तिसृ अर्थगतं बहुत्वं शब्देऽरोप्य बहुवचनविनिर्देशः अंतोदात्तस्यत्रिशब्दस्य स्थानेतिसृशब्द आदेशः स्थानिवद्भावादंतोदात्तः ततः परस्यजसो नुदात्तत्वापवाद
उदात्तत्वंविधीयते। उदात्तयणोहल्पूर्वादित्यत्रासर्वनामस्थानग्रहणानुवृत्तेनाजस उदात्तत्वं न प्राप्नोतीतिवचनं तिसृकेति स्वार्थेकन्प्रत्ययः तिसृभावे संज्ञायांक राम० ७६
सुपसंख्यानमितिस्यादेशः नचाप्राप्त इतितिसृकेसत्यपि एपास्तहैकादेशस्यादिवद्भावात्सितस्वरः प्राप्नोतीतिभावः॥ ॥ ॥

=तिसृभ्यइतिविहितवि= =शेषणमिसाध्यम्‌४=

चितान्त

=स्वार्थिकानांप्राकृतलिंगात्तिकमादेकवचनंबोध्यं१=

ऽपष्येति पूर्वविज्ञातबाध्यविषयेप्रवृत्तस्याचरितार्थविधिं विप्रतिषेधात्परो विधिर्बाधते उपसमस्तार्थमिति समासेपिति स्यादित्यर्थः सुप्रवतीमतिस्वा वित्यत्रजातेरन्त
दहत्पञ्जातेर्धातुर्लोपइतिवक्तव्यमिति वचनात्प्राप्तमन्तोदात्तत्वं बाधित्वा विभक्तेरुदात्तत्वं स्यात् अत्र चोदात्तस्वरितयोर्यणइति स्वरितो भवति ऽतिस्वरइत्यत्र लिष्यत एवज

=अतेः परं स्वरं तं परस्पर् ... =

=अतितिस्वरः ... =

सयथैवानुदात्तौ सुप्पितावितिमेतं स्वरं बाधते एवं नित्स्वरमपि बाधेत नैष दोषः येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते ऽनुदात्तौ सुप्पितावित्येत
स्मिंस्तिस्वर आरभ्यते नित्स्वरे पुनः प्राप्ते वाप्राप्ते च ऽपवा मध्ये ऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवं तिस्वरः ऽनुदात्तौ सुप्पितावितिस्वरं बाधिष्यते नित्स्वरं न बाधिष्यते उपसमस्तार्थमेके जसो ग्रहणमिच्छन्ति ऽपतिति सौ ऽपतितिस्वः चतुरः शसि । शसि स्त्रियां प्रतिषेधो वक्तव्यः

=विहितविशेषणेनमा=

=नमिस्यादयम् ॥३॥=

चतस्रः पश्य चतुरः शसि स्त्रियामप्रतिषेध ऽाद्युदात्तनिपातनात् चतुरः शसि स्त्रियामप्रतिषेधः ऽनर्थकं प्रतिषेधोऽप्रतिषेधः । शसिस्वरः कस्मान्न भवति ऽाद्युदात्तनिपातनं करिष्यते स निपातनस्वरः शसिस्वरस्य बाधको भविष्यति एवमप्युपदेशिवद्भावो वक्तव्यः यथैवतर्हि निपातनस्वरः शसिस्वरं बाधते एवं विभक्तिस्वरमपि बाधेत चतसृणामिति विभक्तिस्वरभावश्च हलादिग्रहणात् । षट्त्रिचतुर्भ्यो हलादिरिति हलादिग्रहणं करोति ततो ज्ञापयत्याचार्यः न निपातनस्वरो विभक्तिस्वरं बाधते कथं कृत्वा ज्ञापकं ऽाद्युदात्तग्रहणमनर्थकं ऽाद्युदात्तनिपातने हि सति हलादिग्रहणमनर्थकं स्यात् न ह्यन्यद्धलादिग्रहणं प्रयोजयति अन्यदतश्चतसृशब्दात् ॥ ×निपातने हि हलादि× ॥

सुदात्तत्वमित्युदाहरणं तेन भाष्यकृतोपन्यस्तं चतुरः स्त्रियामिति स्थानिवद्भावात्प्राप्नोति ऽाद्युदात्तनिपातनमिति स्थानिवद्भावादाद्युदात्तत्वे सिद्धे पुनराद्यु
दात्तनिपातनमस्य स्वरस्य बाधकमित्यर्थः एवमपीति उपदेशिवद्भावास्तीति शिष्टेन विभक्तिस्वरेण निपातनस्वरो बाध्यते ॥ ॥ ॥

बहुवचनविषयत्वादिति विहितविशेषणास्त्र्ययण उत्तरपदार्थस्योपसर्जनत्वाद्बहुसमासेनभाव्यमितिभावः तत्रचतस्रशब्दादिति यदिचनिपातनस्वरेणवि
भक्तिस्वरोबाध्येततदाहलादिग्रहणमनर्थकं स्यात्। चतस्रः पश्येत्यत्रनिपातनस्वरेणैवबाधितत्वाद्विभक्तिस्वरस्याप्रसंगात् किंतन्त्रिर्दिष्टसर्वेनहलादिग्रह

षट्संज्ञास्तावन्नप्रयोजयंतिकिंकारणं बहुवचनविषयत्वात् तेनद्विवचनैकवचनेनस्तः जसिशसीचातोलुप्येते अन्याःस
र्वाहलादयोविभक्तयः त्रिशब्दस्यापिनप्रयोजयतिकिंकारणं बहुवचनविषयत्वात् तेनद्विवचनैकवचनेनस्तः असर्वनामस्थान
मितिवचनात्जसिनभविष्यति शसिभवितव्यमेकादेशउदात्तेनोदात्त इति। अन्याःसर्वाहलादिविभक्तयः तिसृशब्देपिनप्रयोज
यति किंकारणं बहुवचनविषयत्वात् नद्विवचनैकवचनेस्तः असर्वनामस्थानमितिवचनाज्जसिनभवितव्यं शसिभवितव्यं। उदात्त
यणोहल्पूर्वादिति अन्याःसर्वाहलादिविभक्तयः चतुःशब्दस्यापिनप्रयोजयति किंकारणं बहुवचनविषयत्वात् तेनद्विवचनैकवच
नेनस्तः। असर्वनामस्थानमितिवचनाज्जसिनभवितव्यं। शसिभवितव्यं। चतुरः शसीति। अन्याःसर्वाहलाद्ययोविभक्तयः तत्रचतस
शब्दादेकस्माच्छस् असर्वनामस्थानमजादिर्विभक्तिरस्ति। यदिचात्रनिपातनस्वरः स्यात्हलादिग्रहणमनर्थकं स्यात्॥ नैववापुनर
त्रशसिस्वरःप्राप्नोति किंकारणं यणादेशेकृतेशसःपूर्वउदात्तभावीनास्तीतिकृत्वा अवशिष्टस्यतर्हि प्राप्नोति॥ ॥

णेन तन्त्रिप्रमाणंविभक्तिस्वरस्यबलीयस्त्वंज्ञापयतीतिचतसृणामित्यत्रविभक्तिस्वरसिद्धिः नैववेति चतसृः पश्येत्यत्र ततश्चाद्युदात्तनिपातनमपिनकर्त्त राम०
व्यं यणादेशेकृत इति अचिरऋतः इत्यनेनस्वरात्पूर्वंपरत्वादितिभावः। अवशिष्टस्येति नकाराकारस्येत्यर्थः॥ ॥श्री॥ ॥श्री॥ ७७

ऋकारेणेति पूर्वविधौ रेफस्य स्थानिवद्भावात् सावेका साविति किमिति यदि एता स्त्रीयं स्वरूपं गृह्यते तदा प्राप्यस्यात् प्रथमैकवचनस्य ग्रहणेन भाव्यं ऋ प्रथमाप्रयोगि
के ततः सप्तमीबहुवचनस्य तद्द्विप्रयोगे स्वरूपं श्रूयते प्रथमैकवचनं तु विकृतरूपं प्रयोगे न स्वरूपमिति संशयानः पृच्छति यद्यमिति गोष्वृखिति सप्तमी
बहुवचन एकाच्चाद्गोभ्यां ग्व्यामि स्याद्वैविभक्तेः प्राप्न मुदात्तत्वं प्रतिषिध्यते प्रथमैकवचनग्रहणे तु मास्य भावात्प्रतिषेधोऽनर्थकः प्रथमैकवचने हि

ऋकारेणाप्यबहित तत्वान्न भविष्यति यणादेशे कृते नास्ति व्यवधानं स्थानिवद्भावाद्व्यवधानमेव प्रतिषिध्यते तत्र स्थानिवद्भावः स्वरवि
धिं प्रति न स्थानिवद्भवतीति नैषोस्ति प्रतिषेधः [redacted] उक्तमेतत् प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिव
दिति सावेकाचस्तृ साविति किमिदं प्रथमैकवचनस्य ग्रहणमाहोस्वित् सप्तमीबहुवचनस्य कुतः समानो निर्देशः सप्तमीबहुवचन संदेहः
स्य ग्रहणं कथं ज्ञायते यदयं न गोश्वन्साववर्णेति गोश्वनोः प्रतिषेधं शास्ति कथं कृत्वा ज्ञापकं यदि प्रथमैकवचनस्य ग्रहणं स्या
त् गोश्वनोः प्रतिषेधवचनमनर्थकं स्यात् न तु चार्थसिद्धिरेवैषा ऋ अनुगृहीताः स्मः येऽस्माभिः प्रथमैकवचनमाश्रित्य गोश्वनोः प्र
तिषेधो न वक्तव्यो भवति [redacted] ॥ श्री ॥ ॥

यदेकाच्छब्दरूपं गौरिति सौकारान्तं श्वेति साकारान्तं न च तस्मात्तृतीयादिर्विभक्तिः परा संभवतीति अप्राप्त्यभावात् किं प्रतिषेधेनेति भावः प्रकृतिग्रहणे हि विकृतेर्ग्रह
णं भवति स्थानिवद्भावान्न तु विकृतिग्रहणे प्रकृतेः ऋ अनुगृहीता इति प्रतिषेधमन्तरेणेष्टस्यार्थस्य सिद्धत्वात् ॥ ॥ श्री ॥ ॥

धा० कै० ६ त्विनेति प्रथमैकवचने स्त्रीति विकृतप्रयोगात् तीयादेः प्रकृतिरूपस्य श्रवणाद् द्विकृत्वा प्रकृतेरग्रहणादित्यर्थः सप्तमीबहुवचने तु त्स्विति प्रकृतिरूपस्य प्रयोगात् स्वरविधौ नलो

७८ पस्थानिवत्त्वात्तस्यैव चतुर्तीयादेः प्रयोगात् त्सि असंतोदात्तत्वं याभ्यामिति सप्तमीबहुवचने यात्स्विति यदेकाच् ततस्तत्तीयादिरिति सिध्यसंतोदात्तत्वं प्रथमैकवचने

यानितियद्रूपं न तस्मात्तृतीयाद्युदात्तत्वं न प्राप्नोतीत्यर्थः न च तन्मध्यपतितत्वात् तु मोभेदकत्वाभावो विशिष्टरूपग्राह्विषयत्वात् तन्मध्यपतितपरिभाषायास्तथा च नेद

दिदित्या० =यथासर्वादीनीत्यादि०८=

मवेत्सतिषेधोनवक्तव्यः दोषास्तु भवंति तत्रैको दोषः त्विनात्विन्नारूपं तोदात्तत्वं न प्राप्नोतीति त्विनौ न स्तः उक्तमेतत् एकाक्षरात्कृतो जातेः स

प्तम्यां च न तौ स्यतौ स्वतान्त्वतानि से वं भवितव्यं इह तर्हि याभ्यां याद्भिरिति न सिध्यति तस्मात्सप्तमीबहुवचनस्य ग्रहणं। सावेकाच

उदात्तत्वेत्वन्मदोः प्रतिषेधः सावेकाच उदात्तत्वे न्मदोः प्रतिषेधो वक्तव्यः त्वया। मया सिद्धं तु यस्मात्तृतीयादिस्तस्याभावात्सो सिद्धमेत

त्कथं यस्मादत्र तृतीयादिर्न तत्सावस्ति। यद्यपि तत्सौ नास्ति प्रकृतिस्तस्य सावस्ति प्रकृतेस्त्वनेकाच्त्वात् यद्यपि तस्य प्रकृतिरस्ति

९ सावनेकाच सा भवति॥ ॥

=इत्यर्थः इति० न च देवः शात्स्येत्यादेशो दोषभ्यामित्यत्र शेषं पूर्वमितिसप्तमीबहुवचने एकाचस्तेन तदर्थस्य स्थानिवद्भावेन सतादिनित्यादिः प्रत्यादीनां प्रकृतसंतत्वात् तत्सम्यास्थानिवद्भावेरकाच्त्वस्यापि देशमत्वावसतादन्विधौ न निषेधात्। ९=

मदसोरकोरितित्यामूतमेवास्यत्वापकं अन्मेत्वन्वादेशो शस्त्रुदात्तहं इति एभ्य एभिरिति सप्तमीबहुवचनरूपविसर्गादेशेकृते भवसे काच्प्रथमैकवचने त्वयमिति स्वेकाज्त्व

भवतीतिस्वराप्रसंगः उडिदमित्सत्रात्तोदात्ताधिकारादशादेशस्यानुदात्तत्वादनेन स्वरेण प्रयोजनं त्वन्मदोरिति सोयदृष्टं तस्मादेकाचः परात्तृतीयादिरुदात्तो भवतीति राम०

तज्ज्ञापकाश्रयेण प्रतिषेध उच्यते तृतीयादावेकाच्त्वमाश्रीयते न तु सावित्यर्थः प्रकृतेस्त्विति सोपदेकाच्त्वं तस्मात्परात्तृतीयादिरुदात्त इति सूत्रार्थे आश्रीयत इत्यर्थः॥ ७८

अंतोदा उत्तरपदग्रहणमिति अनिसमासइत्याधारसप्तमीविज्ञास्यते अनिसमासस्यांतोदात्तादेकाचः परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवतीति
सत्यार्थं आश्रयिष्यत इतिनार्थं उत्तरपदग्रहणेनेति भावः समासविशेषणमिति अनिससमास इति सत्सप्तमी विज्ञायेत ततश्च समासस्याश्रुतत्वात्तस्यैवैका
ज्ग्रहणमंतोदात्तत्वं च विशेषणं विज्ञायेत न तच्छ्रुतस्योत्तरपदस्येत्यर्थः उ दिवं पदादिष्विति पदन्नोमासि निसत्त्व निर्दिष्टाः पदादयो गृह्यंते एकाज्ग्रहणं

अंतोदात्ता उत्तरपदादन्यतरस्यामनिसमासे उत्तरपदग्रहणं किमर्थं यथा एकाज्ग्रहणमुत्तरपदविशेषणं विज्ञायेत एकाच
उत्तरपदादिति अथाक्रियमाणे उत्तरपदग्रहणे तस्य एकाज्ग्रहणं विशेषणं स्यात् समासविशेषणं अस्ति चेदानीं कश्चिदेकाच
समासः यदर्थमेकाज्ग्रहणं स्यात् अस्तीत्याह भुनः उक्तं स्योजोऽप्योजे इति उ दिवं पदादि [redacted] पदादिषु निशपर्यंतानिप्र
योजयंति अन्यानि पदादीनि उदात्तनिवृत्तिस्वरेणासिद्धानि उ थ्युपधाग्रहणं उ थ्युपधाग्रहणं कर्तव्यं अंसप्रतिषेधार्थ
एवम्प्रांचं त्वासमाभूदिति अक्षद्युवा अक्षद्युवे॥ ॥ ॥

=गीवायामकेन पिकस्य आसनी यादवकोपमाकेम्योदात्तत्वं भवेतत्स्य वर्णपर्यं पदिमाणामाग्रहणंस्यात् आह एकाज्ग्रहणमेवेति भाष्ये कोऽयं तस्य इत्यादि विशेषविषय इत्याह यदातितिति एवं च भाष्यकोणायमेवेति भावः तत्वेदानेनेति सावर्ण्यानंत्यमुद्ग्र =अन्यपदादीनां०=

चेहानुवर्तेत इति निशः परेऽनेकाचत्वान्न गृह्यंते यदात्वल्लोपे कृते एकाचो भवंति तदोदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं सिद्धं येष्वा द्युदात्तानां स्थाने विधी
यंते आदेशास्तेंतोदात्ता निपात्यंत इति भाष्यकारस्य नाद्धिज्ञायते उ थ्युपधाग्रहणमिति॥ उ पथ्युपधाग्रहणस्यतेनत्वस्य इत्यर्थः॥ ॥ ॥

भा०कौ० ६
७९

अष्टनोदीर्घादिति अष्टन आविभक्ताविति निमित्तादृत्तविधेर्व्यभिचाराभावाद्धि कृत्वेपिचात्तसहितस्वांतात्मरत्वात्षट्स्वरेणाभाव्यमिति प्रश्नः अष्टाविति अस्मादेवदीर्घग्रहणाद्वात्वे विकल्पितमितिभावः अष्टनोदीर्घग्रहणमिति न्यायसिद्धस्यैवार्थस्य दीर्घग्रहणं लिंगमात्वस्य बहिरंगत्वादंतरंगायां षट्संज्ञायां कर्त्तव्यायामसिद्धत्वान्नांतत्वादेव षट्संज्ञायाः [redacted] सिद्धत्वात् एतदेवेति दीर्घग्रहणेनान्यथानुपपत्त्यायमर्थो ज्ञाप्यते यातुष्टहन्महतोरिति यात्तवज्ञापादेषु सिद्धत्वान्नियमार्थमेतत् एवदृग्दिभ्योमा

=अकृतिसत्रवर्तितार्थस्यापस्विसादोबाधत्वर्थः।१=

अष्टनोदीर्घात् दीर्घादिति किमर्थं अष्टसु प्रक्रमेषु त्रास्तरणमादधीत दीर्घादिति शक्यमकर्त्तुं कस्मान्न भवति अष्टसु प्रक्रमेषु त्रास्तरणमादधीतेति षट्स्वरोऽत्र बाधको भविष्यति नाप्राप्ते षट्स्वरे अष्टनः स्वर आरभ्यमानेस्य यथैव दीर्घात् बाधते एवं ह्रस्वादपि बाधेत न दीर्घात् षट्स्वरः प्राप्नोति किं कारणं आत्वे कृते षट्संज्ञाऽभावात् अत उत्तरं पठति अष्टनो दीर्घग्रहणं षट्संज्ञापकमाकारांतस्यानुदर्थं अष्टनो दीर्घग्रहणं क्रियते ज्ञापकार्थं किं ज्ञाप्यं एतत् ज्ञापयत्याचार्यः भवत्यात्वे कृते षट्संज्ञेति किमेतस्य ज्ञापने प्रयोजनं आकारांतस्यानुदर्थं॥ आकारांतस्यानुट् सिद्धो भवति अष्टानामिति ननु च नित्यमात्वमेतदेव ज्ञापयति विभाषा आत्वमिति यदयं दीर्घग्रहणं करोति इतरथा हि अष्टन इत्येव ब्रूयात् शतुरनुमोनद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानं नद्यजाद्युदात्त

=अनर्थकइति॰अनेनैवनघुदात्तत्वे सिद्धे गोरादिपाठसामर्थ्यात्स्व (महत्) दादिषुनियमसिद्धेः।१=नयार्थइतिशेषः।नन्वनेपिकर्तव्यनांदर्थमिति॰अनुपसर्जनेति॰१=

मृद्विसेवमर्थं येतु गौरादिषु बृहत् इति पठंति तेषामनर्थको सौ पाठोनुपसर्जनाधिकाराद्धाति बृहस्पतिमहतीतिगौरादिषु नास्तीतिदीर्घविधोगित्वस्य॥ णः कृत्तेव्यस्तत्स्थानेनोदात्तत्वे नन्वत्रतदंतविध्यभावान्न प्राप्नोति। नैतदस्ति [redacted] तदंतेपिबृहन्महद्भ्यां परे नद्यजादी भवतः॥ ॥ ॥

=विशेष्याभावाभिधानात्।१=

=अनेनैव सिद्धत्वाद्गौरादिषु पाठः किमर्थः कर्तव्यइतिक्त्वयति॰१=

राम०
७९

उदात्तय उदात्तयणीति उदात्तयण इत्स पञ्चम्योदात्तहल इति वक्तव्यमित्यर्थः वाकपत्नीति तत्पुरुषोनभूवाक्दिग्दिविप्विनि पूर्वे पदप्रकृतिस्वर निषेधात्समासान्तोदात्तत्वं विभाषासपूर्वस्येति नकारादेशः हल्पूर्वग्रहणानर्थक्यमिति यणोरणापर इत्यनेनाणनणसमुदायस्यैवादेशविधानात् किमितावृत्तौ परत्वं न भवत्येवमन्यय इत्यादौ यणयणसमुदाय उदात्तस्य स्थाने विधीयते न यणो केवल इति स्वरेण न प्रवर्त्यत इत्यर्थः स्वरितत्वे चेति। उदात्तस्वरितोऽनुदात्तस्येत्य त्र समुदायादेशस्याभ्र

स्वरितयोर्यणः

=पत्यावैश्वर्य इत्यनेन नपातस्य ॥=

उदात्तयणो हल्पूर्वादिति किमर्थं अग्नये वायवे उदात्तयणि हल्ग्रहणं नकारान्तार्थं उदात्तयणि हल्ग्रहणं कर्तव्यं किं प्रयोजनं नकारान्तार्थं नकारान्तादपि यथा स्यात् वाक्पत्नी चित्पत्नी हल्पूर्वग्रहणानर्थकं च समुदायादेशत्वात् हल्पूर्वग्रहणं चानर्थकं किं कारणं समुदायादेशत्वात् समुदाययोरादेशः स्वरितत्वे चावचनात् स्वरितत्वे च हल्पूर्वग्रहणस्यावचनात् मन्यामहे हल्पूर्वग्रहणमनर्थकमिति यत्त्वावुच्यते उदात्त यणि हल्ग्रहणं नकारान्तार्थमिति क्रियते न्यास एव द्विनकारको निर्देशः उदात्तयणो हल्पूर्वान्नोऽङ् धात्वोरिति यदप्युच्यते हल्पूर्वग्रहणानर्थकं च समुदायादेशत्वादिति अयमस्ति केवल आदेशः ब्रूहितितवावरुतितवे इति॥०

=तित्वेऽहनिप्रसंगो...ङी नित्यगुणपरत्वे॥०=

यणादेवाग्नय इत्यादौ स्वरितत्वनिवृत्त्यर्थं हल्पूर्वग्रहणं न कृतमित्यर्थः द्विनकारक इति तत्रैकोनकारो लुप्तपञ्चमीको निर्दिष्टः तस्मादुदात्तग्रहणेन विशेषणाऽनुदात्तनकारादपि परस्मात् द्यादुदात्तत्वं भवति भाष्यकारेणाभक्त्यतिशायत्वात्तु कारं प्रतिनिर्दिश्यतो न खियं स्याद्गतिः ब्रूहितितवे इति वहूनिति तत्रोऽन्यस्या इति वरुत्री हिः बहोर्नञ्वदुत्तरपदभूम्नीत्यतिदेशाद्दन्तोदात्तत्वमत्र विभक्तेरुदात्तत्वनिवृत्तये हल्पूर्वग्रहणं कृतमुदात्तस्वरितयोर्यण इत्यनेनतु स्वरितत्वं भवति॥ ॥ ॥

नं०

ह्रस्वनुडोरेवानिति रयिरस्मात्सीतिमतुप् रयेर्मतौ बहुलमिति संप्रसारणं पूर्वैकादेश आद्गुणस्ततो ह्रस्वाभावान्मतुप्स्वरेण प्राप्नोतीति वचनं त्रिवतीरिति छंदसीर
इति वलं वा छंदसीति पूर्वसवर्णदीर्घः नाम मतौ ह्रस्वांतादिति मतुपि ह्रस्वांतं यद्दृष्टं तस्मात्स्वरेणान्यतरस्यां नुडागमो भवती सर्वः भूतपूर्वगतिरिति अकृते दीर्घे ह्र

ह्रस्वमतुबुदात्तत्वे रेवं ग्रहणं मतुबुदात्तत्वे रेवं ग्रहणं कर्तव्यं आ रेवानेतु नो विशः त्रिमतिषेधस्य दत्सः त्रिवतीर्याज्यानुवाक्या भवंति
नाम्न्यतरस्याम् इह कस्मान्न भवति किशोरीणाम् कुमारीणाम्। ह्रस्वादिति वर्त्तते इहापि तर्हि न प्राप्नोति अग्नीनां वायूनां किं कारणं
दीर्घत्वे कृते ह्रस्वाभावात् इदमिह संप्रधार्यं दीर्घत्वं क्रियतां स्वर इति किमत्र कर्तव्यं परत्वात् दीर्घत्वं एवं तर्हि नाम् स्वरे मतौ ह्रस्वग्रहणं
नाम् स्वरे मतौ ह्रस्वग्रहणं कर्तव्यं मतौ ह्रस्वांतादिति तत्तर्हि वक्तव्यं न वक्तव्यं आहायं ह्रस्वांतादिति न च नामि ह्रस्वांतोऽस्ति तत्र भूत
पूर्वगतिर्विज्ञास्यते ह्रस्वांतं भूतपूर्वमिति सांप्रतिकाभावे भूतपूर्वगतिर्विज्ञायते अयं चास्ति सांप्रतिकः तिसृणां चतसृणामिति नैतद
स्ति षट्त्रिचतुर्भ्यो हलादिः रिसन्नेनानुस्वरेणाभवितव्यं तस्मिंस्त्रिसेपात्रे इयं विभाषारभ्यते एवं तर्हि योगविभागः करिष्यते षट्त्रिचतु
र्भ्यो नामुदात्तो भवति ततो हलादिः हलादिश्च विभक्तिरुदात्ता भवति षट्त्रिचतुर्भ्य इति इदं तर्हि लेन नृणां नृपते जायसे शुचिः ननु
चात्रापि न चान्यतरस्यामिति स्वरेणात्र बाधको भविष्यति न सिध्यति किं कारणं रुल्यग्रहणं तत्रानुवर्त्तते किं पुनः कारणं रुल्यग्र
हणं तत्रानुवर्त्तते [redacted] इह माभूत् त्वा न्वै उदात्तयणो हल्पूर्वादिति स्वेषस्वरोऽत्र बाधको भविष्यति इदं तर्हि नरि॥ ॥

स्वांतात्स्वरो नाम भूदिति कृते दीर्घे स्वरः प्रवर्त्तते षट्त्रिचतुर्भ्यो नामिति विकल्पे प्राप्ते नित्यार्थो योगविभाग इति सांप्रतिकाभावाद्भूतपूर्वगतिराश्रीयते॥ ॥

नैकमुदाहरणमिति ह्रस्वग्रहणं मतुविति तत्र ह्रस्वग्रहणस्य स्वरितत्वमिहार्थं प्रतिज्ञातं तच्च सर्वे ह्रस्वसंग्रहार्थमिति विषयसंकोचो न युक्तो ऽन्यथा लाघवाय नच्चान्यतर
स्यामिसमानंतरं नामिति ब्रूयादित्सर्थः मतौ ह्रस्वादिति वर्त्तते इति मतुपग्रहणमिहानुवृत्तं सामर्थ्यात्सप्तम्यंतं संपद्यते ततो मतौ यद्ध्रस्वांतं दृष्टं तस्मात्परो नामुडा

=अथवेति मतौ ह्रस्वग्रहणमिति वार्त्तिकस्य कर्त्तव्यमिति नयोर्थः किंतु वर्त्तत इति शेषं द्रष्टव्यं ।२= =अन्यथेति नामिति सूत्रे च नच्चान्यतरस्यामित्यनुवर्त्तते ह्रस्वग्रहणं नुडर्थं स्यात् अन्यथा दीर्घनृशब्दे दिस्यादिति नामर्थं न नुडेते तथा वः ।२=

नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति यद्येतावत्प्रयोजनं स्यात् नामित्येव ब्रूयात् तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते ह्रस्वांतं यद्भूतपूर्वमिति
ति अथवा नैवं विज्ञायते नामस्वरे मतौ ह्रस्वग्रहणं क्रियते किमिति कथं नर्हि नामस्वरे मतौ ह्रस्वादिति वर्त्तत इति नगोभ्यो न साविति किमिदं प्रथमै
कवचनस्य ग्रहणमाहोस्वित्सप्तमीबहुवचनस्य कुतः संदेहः समानो निर्देशः पुरस्तादेष निर्णयः सप्तमीबहुवचनस्य ग्रहणमिति
इहापि तर्हि प्राप्नोति यदि सप्तमीबहुवचनस्य ग्रहणं ताभ्यां ब्राह्मणाभ्यां याभ्यां ब्राह्मणाभ्यामत्र न प्राप्नोति विधिरप्यत्र न सिध्य
ति किं कारणं न ह्येतद्भवति यत्सौ रूपं इदं तर्हि तेभ्यो ब्राह्मणेभ्यो येभ्यो ब्राह्मणेभ्यः विधिश्च सिद्धो भवति प्रतिषेधस्तु न प्राप्नोति अस्ति
पुनः सप्तमीबहुवचनस्य ग्रहणे किंचिदिष्टं संगृहीतं भवति आहोस्वित्दोषांतमेव अस्तीत्याह इहत्याभ्यो ब्राह्मणीभ्यस्ताभ्यो ब्राह्मणीभ्य
इति विधिश्च सिद्धो भवति प्रतिषेधश्च अस्तु तर्हि प्रथमैकवचनस्य ग्रहणं यदि प्रथमैकवचनस्य ग्रहणं तेनेतिस्वरः पुंसि न सिध्यति
१ न चाव र्ण्यं पुंस्येव त्रियां पुंसि नपुंसके च॥ ॥

नाम भवतीत्सर्थः संपद्यते नगोभ्य इहापीति एकप्रकरणोपादानादिति भावः ताभ्यामिति सप्तमीबहुवचने ते त्विसवर्णांत त्वाभावात्प्रतिषेधो न प्राप्नोति विधिरप्य
त्रेति। नेष्विति सप्तमीबहुवचने यदेकारांतं रूपं न तस्माद्व्यपगतस्तीयादिः ताभ्य इति नात्विति सप्तमीबहुवचने वर्णांतत्वात्॥ ॥ ॥

भा०कै०६
८१

तेनेति सउतिप्रथमैकवचनेपदवर्णांतेनन तस्मात्परं तनीयैकवचनं किंतर्हि रूपांतरयुक्तात् तयेति सेतिप्रथमैकवचने यदवर्णांतं नन तस्मात्परात्तनीयानपुंसके चतदि
तिसाववर्णांतमेवनभवतीतितेनब्राह्मणकुलेनेति प्रतिषेधप्रसंगः सप्तमीबहुवचनस्यापीति तेष्विति पुंनपुंसकयोस्तावदवर्णांतं नभवति नास्विति स्त्रियां
यद्यप्यवर्णांतं तथापि तयेत्यत्र रूपांतरयुक्तात्परात्तनीयेति प्रतिषेधो न प्राप्नोति तस्मादिति प्रथमैकवचनस्यलिङ्ग्रहणमितिनि र्णयस्तेनरक्षणा निसा
सावपि मतुप उदात्तत्वप्रतिषेधो भवति सप्तमीबहुवचनेत्ववर्णांतात्तु स्मादयो नभवंतीति मतुप उदात्तत्वनिषेधो नस्यात् तेनेतियउपन्यस्तंमाप्रसक्तत्व

तेनब्राह्मणेनतयाब्राह्मण्या तेनकुंडेनेति सप्तमीबहुवचनस्यापिग्रहणे एषदोषः तस्मादुभाभ्यामपि प्रतिषेधेयत्न दोषश्चग्रहणं कर्त्तव्यमिति
नगोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्य इत्यत्र दोषश्चेति तित्स्वरितंतित्प्रत्ययग्रहणंतिति प्रत्ययग्रहणं कर्त्तव्यं इहमाभूत् कृतरुद्राणोः किरतीगि
रतीतत्तर्हिवक्तव्यं नवक्तव्यं नेषतकारः कस्तर्हि इकारः यदि इकार आंतर्यतो दीर्घः प्राप्नोति भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं नभविष्य
ति यदि भाव्यमानेन सवर्णानां ग्रहणं नेत्युच्यते छर्दसोर्दे दुदौमः छामूभ्यामिसत्वनप्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्यु
"कारेणभाव्यमानेन सवर्णानां ग्रहणमिति॥ ॥ ॥

=प्रत्यायकत्वेनेति· सत्योपात्तएवेसर्पः·उपदेशेनह्रकारेणतद्विधानादितिभावः॥तस्मात्ततिमिति·परोर्थोपस्थित्यर्थे·उपधविनिर्मुक्तायाएवनायमानेतादितिभावः॥२= =किंतमिति·नादेशंदात्तसीसत्वपदाहनागवानतः॥गुणेननायंतनवतमुपसुक्तंततः·सुमं·१=

मो
थंस्त्राः एकारांतं यदेकाचतस्मात्तत्र परेणनदा नचाङुणत्वतेमाप्रिनिषेधा [redacted] उभयाश्रये विधावंतादिवत्त्वस्य चिंतंतस्मादिदं बुधैः तित्स्वरितं किरतीति
तिताप्रसापितः संज्ञाधर्मेणसंज्ञीकथ्यते इत्यस्तितिद्यपरे शत्रादेशस्ययथा चोपरि तिप्रत्ययस्य [redacted] इसंज्ञाहिप्रसापकएवव्यवस्थितस्य
प्रवृत्तेते लोपविधानद्वारेणचतस्मात्सत्वं प्रसाप्येप्रतिपाद्यते तथाचायमर्थः जंताद्धातोर्यः प्रत्ययो भवति सच तित्कार्यं लभत इति अनेकप्रयोजन एम०
दृष्टेनाचाप्यनुबंधानां तकारस्तत्कालत्वग्रहणार्थश्चस्यात् स्वरितार्थश्च। प्रत्ययाप्रत्ययोः प्रत्ययेसंप्रत्ययइतिपरिभाषा भाष्यकारवार्त्तिककाराभ्यांनकृ ८१
"चिदाश्रिता ॥

=तितिरि·दित्यादिनामप्रत्ययकेनेत्यर्थः॥प्रत्ययिनः·प्रकारादिः·संज्ञापादसंज्ञायां·प्रमेत्येनप्रत्ययसकारसंबंधिहादिनामप्रत्ययकविष्ठेनसंज्ञी·निरूक्तसंज्ञाप्रमेयप्रवर्तयान्प्रसाध्यस्तस्यर्थः॥अथवासंज्ञायेनप्रत्यायकःप्रदिसादिःतत्रित्कोपर्ममतित्वादिकस्यार्थे·सोहिरूदेनचप्रत्याप्यप्रकारादिः॥२=

एवमप्यर्थमेवेति । उकारार्थमित्यर्थः । कस्तर्हि दकार इति । इत्संज्ञायां च कृतायां वावसान इति चर्त्वस्य पूर्वत्रासिद्धमित्यसिद्धत्वात्तित्त्वाभावात्स्वरितत्वाभावः दकारोऽपीति
नन्वेवं सति तपरस्तत्कालस्येत्यत्र पंचमीसमासस्याश्रयणादूदोरवित्यत्रोकारस्य दपरत्वाद्भिन्नकालग्रहणप्रसंगः एवं तर्हि यकारस्य स्थाने जश्त्वं कृत्वा निर्देशः
ऊदोरविति करिष्यते जश्त्वस्य पूर्वत्रासिद्धमित्यसिद्धत्वाद्दपरत्वाभावः अन्यत्रापि भाष्ये यदुक्तं नैष तकारः कस्तर्हि दकार इति तस्यापि यस्य जश्त्वेन यो दकारः

यमत्र

यद्ययं दिव उदिति उकारं तपरं करोति एवमप्यर्थमेव तर्हि प्रत्ययग्रहणं कर्तव्यं मा भूदिति नैष तकारः कस्तर्हि दकारः ॥ यदि दकारो न ज्ञा
पकं भवति एवं तर्हि तपरस्तत्कालस्येति दकारोऽपि चर्त्वभूतो निर्दिश्यते यद्येवं चर्त्वस्यासिद्धत्वाशिद्धशि चेत्युत्वं प्राप्नोति सोऽत्रोनिर्दे
शः अथवा असंहितया निर्देशः करिष्यते अणुदित्सवर्णस्य चाप्रत्ययः तपरस्तत्कालस्येति । तास्यनु । अनुदुपदेशादिति कथमि
दं विज्ञायते अकारो य उपदेश इति आहोस्विदकारांतं यदुपदेश इति किं चातः यदि विज्ञायते अकारो य उपदेश इति हतो हथ इत्य
त्रापि प्राप्नोति अथ विज्ञायते अकारांतं यदुपदेश इति न दोषो भवति ननु चाकारांतं यदुपदेश इत्यपि विज्ञायमाने अत्रापि प्रा

=मनुदुपदेशेऽप्येवं कृपितास्य सर्वाक्षमनुदात्तस्यानुदेशाकरणादायुःभक्तः । अनुदात्तोपदेशेनांतनीयकालादवयवानामनुदेशान्वेवामनुदेशाकरणत्वमित्यपरः पक्षः ।९

९ प्नोति ॥ ॥

सविज्ञेयः । तास्यनुदात्ते । कथमिति यदा उपदेशोऽकारेण विशेष्यते तदा तदंतविधिः सज्ञावा दकारांत उपदेश इत्यर्थः संपद्यते यदा तूपदेशेनाकारो विशेष्यते निपातनाच्च
उद्धरति क्रियामिति । अयमर्थः । उच्छब्देन हरतेस्सबंधादेक उद्धृतशब्दयोस्समासस्तत्र चोच्छब्दस्य पूर्वपदत्वात् भवति गतिस्वरः पश्चादभिशब्दस्य समासे । भेगे तिस्वरं बाधित्वा निघातेन पाश्चात्यं तत्र कृदुत्तरपदप्रकृतिस्वरेण उदएव गतिस्वरो भविष्यतीत्यर्थो नंतरग्रहणेन अथवोद्धरति क्रियामित्यादिना भेगे तित्वं प्रतिपाद्यते । एवं तर्हीति पूर्वविप्रतिषेधमनपेक्ष्याव्यवहितगन्निवृत्त्यर्थमनंतरग्रहणं क्रियते यदि च कृद्ग्रहणपरिभाषा न स्यात् ततः क्तांत उत्तरपदे गतेः स्वरो विधीयमानो व्यवहितस्यन

= कर्मणि समासग्रहणास्वरसिद्धिर्न आह अपेक्षेति । २ = अनपेक्ष्येति । ततश्चयगतिर्गतावितिस्यप्रतिनिर्घातपरिसमानेरधिकतस्याप्यादावितस्यतत्रसंबंधानंतरग्रहणस्यप्रहनेरभावासरविप्रतिषेधोनास्यनस्तमनपेक्ष्यव्यवहितगतिनिवृत्त्य

उद्धरति क्रियां विशिनष्टि उदा विशिष्टाम् अभिर्विशिनष्टि तत्र गतिरनंतर इति च प्राप्नोति गतिर्गताविति च गतिरनंतर इत्यस्यावकाशः प्रकृतं प्रहृतं गतिर्गतावित्यस्यावकाशः अभ्युद्धरति उपसमादधाति इह उभयं प्राप्नोति अभ्युद्धृतं उपसंहृतं उपसमाहितं गतिर्गतावित्येतद्भवति विप्रतिषेधेन एवं तर्हि सिद्धे सति यदनंतरग्रहणं करोति तज्ज्ञापयत्याचार्यः भवत्येषा कृद्ग्रहणे गतिकारकपूर्वस्यापीति किमेतस्य ज्ञापने प्रयोजनं प्रतते न कुलं स्थितं ततएतत् उदके विशीर्णं तएतत् सगतिके न सन न कुलेन च समासः सिद्धो भवति तादौ च

=तिङंतु नित्यस्यैवाभावादिति भावः । १ = १ निति कृत्यतौ कृद्ग्रहणं किमर्थं ॥ परिभाषा २ ॥ ॥

प्राप्नोतीति किं तत्रिरस्यर्थेनानंतरग्रहणेन ततः कृतमेतां परिभाषां ज्ञापयति परिभाषा ज्ञापनार्थमेव च परविप्रतिषेधोन्यापेक्ष्यते ननु च कृद्ग्रहणे गतिपूर्वस्यापि ग्रहणं ज्ञाप्यतां कारकपूर्वस्य कथं ज्ञाप्यते उच्यते पूर्वाचार्यैस्ताव देषा परिभाषा पठिता इह त्वनंतरग्रहणेन सैवाभ्यनुज्ञायते तादौ गतेः स्वरविधानात् क्रियायोगे गतिसंज्ञाविधानात् कारादिः कृत्स्वेव संभवति नांम्य इति मत्वाह । कृद्ग्रहणं किमर्थमिति ॥ ॥ ॥ ॥

भा० कै० ६ यथेति निर्तीत्यनेन प्रसंस यग्रहणपरिभाषयात दंतस्योपसंख्यानाज्जस्यैव तकारादित्वं विशेषणं स्यात् कृ ङ्ग्रहणेन तु श्रुतस्य तादित्वं विशेषणं विज्ञायते। तादौ निर्तीति यथो
९८ न प्रत्ययस्य ग्रहणं स्यात् प्रत्ययादेः सयोगपूर्वादित्यत्र विशेषणं विशेष्यभावे कामचारात् संयोगपूर्वग्रहणेन उकारो विशेष्यते न तु प्रत्ययस्तथेहापि तादिग्रहणेन निर्विशेष्यते न तु दंतं कृ उ

=अतादिस्यनेन पर्युदासत्र्यस्य प्रत्ययस्यैव ग्रहणमिति भावः। १=

यथा तकारादिग्रहणं कृद्विशेषणं विज्ञायेत तकारादौ निति कृतीति अथा क्रियमाणे कृ ङ्ग्रहणे तकारादिग्रहणं कस्य विशेषणं स्यात्। उत्तरप
द विशेषणं तत्र को दोषः इहैव स्यात् प्रतरिता प्रतरितुं इह न स्यात् प्रकर्त्तोपकर्त्तुं॥ तादौ निति कृद्ग्रहणं न र्थकं तादौ निति कृद्ग्रहणमनर्थ
कं क्रियमाणेपि वै कृ ङ्ग्रहणे निर्दिष्टं कंपि विज्ञातं तु तकारादावुत्तरपदे निति कृतीति अक्रियमाणेपि चेष्टं निघस्तकारादिस्तदं न उत्तरपदे इ
ति यावता क्रियमाणो चा[redacted] निर्दिष्टं विज्ञायते अक्रियमाणो चेष्टं अक्रियमाणा एवेष्टं विज्ञास्यामः कृ उपदेशे वा ता
द्यर्थमिदं र्थं कृ उपदेशे तर्हि ताद्यर्थमिदं र्थेन कृ ङ्ग्रहणं कर्त्तव्यं कृ उपदेशे यस्तकारादिरिति एवं यथा विज्ञायेत किं प्रयोजनं इहापि
प्रसिद्धं भवति। प्रलपिता। प्रलपितुं अनिर्गतः। अनिर्गतप्रकृतिस्वरत्वेय एणादेशे प्रकृतिस्वरभावप्रसंगः अनिर्गतप्रकृतिस्वरत्वेय
९ एणादेशे प्रकृतिस्वरभावं प्राप्नोति॥ प्रस उ॰ प्रसव्यौ। प्रसव्युः॥ ॥ ॥

पदेशे वेति। वाशब्दस्तल्यार्थे कृतामुपदेशः शास्त्रं तत्र यस्तादिरिति प्रसयार्थं कृ ङ्ग्रहणमित्यर्थः। अनिर्गतो। [redacted] अनिर्गतेति प्रतीचेत्यादावर्थवदनि एम०
गंतग्रहणमिति प्रसदिः सत्र यणादेशे कृते निर्गतत्वात्प्रकृतिस्वरप्रसंगः॥ ॥श्री॥ ॥ ॥ ९८

अनिर्गंतवचनमिति प्रतीचइत्यादिषु चुस्वरेणाभाव्यमिति अनवकाशमनिर्गतग्रहणं मन्यते। यत्तर्हि न्यधोरिति न्यधोरेवकृते यणादेशे प्रकृतिस्वरो नान्यस्येति नियम आश्रीयते यत्त्न हीति अधीचे त्यादावविसर्गः यत्तर्हि नेरेवेति। निशब्दस्यैकाच्त्वान्नीचे त्यादौ चुस्वरस्य प्रकृतिस्वरस्य च विशेषो नास्ति। एषहि यणादिष्टार्थ इति ननु

=अधिकारसूत्रानेकोपि विशेषोत आह॥ किमर्थस्येति॥=

अनिर्गंतवचनमिदानीं किमर्थं स्यात्। अनिर्गंतवचनं किमर्थमिति चेद्यणादिष्टार्थं अयणादेशार्थमेतत्स्यात् यदा यणादेशो न कदा च यणादेशो न।
यदा शाकल्यं उक्तं वा किमुक्तं। समासे शाकल्यं न भवतीति। यत्तर्ह्यचने रकारो लुप्यते। प्रतीचः प्रतीचा। चुस्वरस्तत्र बाधको भविष्यति। अयमेवेष्यते
तोंयत्र वृक्ष्यतिस्थेतत् चोरनिर्गतावग्रसयइति यत्तर्हि न्यधोः प्रकृतिस्वरे शास्ति। एषहि यणादिष्टार्थमारंभः एतदप्ययणादिष्टार्थमेव यदा यणादेशो न
कदा च यणादेशो न यदा शाकल्यं उक्तं वा किमुक्तं समासे शाकल्यं न भवतीति यत्तर्ह्यचनेरकारो लुप्यते। [redacted] चुस्वरस्तत्र बाधको भविष्य
ति। अयमेवेष्यते वृक्ष्यतिस्थेतत् चोरनिर्गतोंचतावग्रसयइति यत्तर्हि नेरेवप्रकृतिस्वरं शास्ति एषहि यणादिष्टार्थ आरंभः एतदप्ययणादिष्टार्थमेव।
कथं अकृते यणादेशे पूर्वपदप्रकृतिस्वरत्वे कृते उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्येष स्वरः सिद्धो भवति। न्यङ्। तस्मात्सूच्यते अनिर्गतप्रकृति
स्वरत्वे यणादेशे प्रकृतिस्वराभावप्रसंग इति चोरनिर्गतोंचतावग्रसये चुस्वरादनिर्गतोंचतावग्रसयइत्येतद्भवति विप्रतिषेधेन॥ =सुप्युक्ति पूर्वपक्ष॥ इत्यर्थः॥

=नियमेणेनांतरंगाद्पि पूर्वं स्वर प्रवृत्ति शिक्षा मात्रेन ज्ञाप्यत इति तात्पर्य॥= अन्नेति न प्रवृत्तिस्य पूर्वपदत्वे नानादित्याद्यः पूर्वत्ता भावादिति भावः॥= =अभाविनस्तु यणं बाधित्वा प्राप्तः स्वरो निर्गते ति प्रतिषेधेन तस्तकुत्वादयकाणि

नेर्यणादेशे कृते अनकृत्वात् कस्य स्वरः एवं मन्यते यत्र यण भविष्यति तस्मिन् विषये तरंगमपि यणं बाधित्वा पूर्वं नेः स्वरो भवति एवं प्रसङ्गादिषु निर्गत इति प्रतिषेधो भवि
ष्यति। पंञ्चा यणादेशः एतदपि वचनमाम पर्यायकृतत्वं तांगे यणादेशे निशब्दस्वरो भवति। यणि कृते स्वरभाजो भावात्प्रसङ्गादिषु तु यणादेशं एवांतरंगत्वात्प्रा
प्नोति। तस्मादिति। न च यणादेशस्य स्थानिवद्भावोस्ति पूर्वे परप्रकृतिस्वरविधानादर्पूर्वविधित्वात्॥ ॥

भा०कै०६
९८

यदि तावदिति सर्वापवादत्वं चुस्वरस्य निवर्त्तयति लक्षणगणनायां द्वयोरपि चतुर्थत्वमित्यर्थः अव्ययस्वर इति नञ्सुभ्यां षेतु स्यात्पूर्वेतिप्रकृतिस्वरः इह चगति

=प्रतिषेधप्रवृत्तिः तथा चोदनिर्गतौ चतावप्रत्यये अनिनवि प्रतिषेधोपन्यासो ऽपि विशिष्टविरुद्धगतौ चतावप्रत्ययस्तु स्वविषये वाः संबंधी चुस्वरेणाप्रवर्त्तत इत्यभिप्रायेणेति भावः ।४= =इह तु कि अनिर्गतेसच नेन पूर्वपदप्रकृतिस्वरापवादः कृत्स्वरापवादात्तम

चुस्वरस्यावकाशः दधीचः पश्य दधीचा दधीचे । अनिर्गतो ऽचतावप्रत्यय इत्यस्यावकाशः पराङ्. पराञ्चौ पराञ्चः इहोभयं प्राप्नोति । प्रवाचः । प्रवा
इर चा । प्रवाचे इति अनिर्गतो ऽचतावप्रत्यय इत्येतद्भवति विप्रतिषेधेन । न वा चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथा हि सर्वापवादप्रसं
गः । न वा एतद्विप्रतिषेधेनापि सिध्यति । कथं तर्हि सिध्यति चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधात् । चुस्वरः पूर्वपदप्रकृतिस्वरभाविनः प्रति
षेध्यः इतरथा हि सर्वापवादश्चुस्वरः अक्रियमाणे हि प्रतिषेधे सर्वापवादो ऽयं चुस्वरः । कथं । प्रत्ययस्वरस्यापवादो ऽनुदात्तौ सुप्पितौ विसन्नुदात्तौ सु
प्पितौ वित्स्वरस्योदात्तनिवृत्तिस्वरः । उदात्तनिवृत्तिस्वरस्य चुस्वरः । सर्वथैवोदात्तनिवृत्तिस्वरं बाधते एवमनिर्गतस्वरमपि बाधेत । यदि तावत्स
र्व्यान्तः सामर्थ्यमपि चतुर्थः समासान्तोदात्तत्वस्यापवादो ऽव्ययस्वरः अव्ययस्वरस्य कृत्स्वरः कृत्स्वरस्याप्यमुभयोस्तुल्ययोर्युक्तो विप्रतिषेधः
सति शिष्टस्तर्हि चुस्वरः कथं चाविसुच्यते यत्रास्यैतद्रूपं भवति क्वचास्यैतद्रूपं भवति यजादावसर्वनामस्थाने ऽभिनिर्वृत्ते अकारलोपे च कृते तेन लोपेनकारः ५
स्मात्तु उच्यते न वा चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथा हि सर्वापवाद इति । विभक्तीषत्स्वरात्कृत्स्वरः विभक्तिस्वरात्तु ईषत्स्वरा
त्कृत्स्वरो भवति विप्रतिषेधेन । विभक्तिस्वरस्यावकाशः अक्षशौण्डः स्त्रीशौण्डः कृत्स्वरस्यावकाशः इध्मप्रव्रश्चनः पलाशशातनः इहोभयं प्रा
प्नोति । पूर्वान्ने स्फोटकः अपराह्ने स्फोटकः कृत्स्वरो भवति विप्रतिषेधेन ईषत्स्वरस्यावकाशः । ईषत्कडारः ईषत्पिङ्गलः । कृत्स्वरस्य स एव । इहोभयं
प्राप्नोति । ईषद्भेदः । कृत्स्वरो भवति विप्रतिषेधेन । चित्स्वरादाशीःस्वरो भवति विप्रतिषेधेन । चित्स्वरस्यावकाशः । चलनः । चोपनः । हारिस्वरस्या एम०
वकाशः ॥ ॥ श्री ९८

ग्रहणमनुवर्त्तते । सति शिष्ट इति ततः सर्वापवाद एव चुस्वरः ॥ ॥श्री॥ ॥ ॥ ॥ ॥ ॥१

ह्रस्वादिरिति पूर्वविप्रतिषेधोऽत्र विवक्षितः अक्ष हृत इति। अनुदाहरणमेतदित्याहुः अत्र हि तृतीयाकर्मणि समासे नञ्ह्रस्वापवादः पूर्वपदप्रकृतिस्वरत्वं प्राप्नोतीति तत्परत्वा देव हारिस्वरो बाधते। नञ्ह्रस्व इति परोऽपीत्यर्थः। अनो भावकर्मवचन इत्यनेनानो दात्तत्वं विधीयते कर्मवाची हरणशब्दो गाडवहरणमित्युदाहरणं। किंपुनस्तत्स्व

=तस्मात्सप्तमीसमासः। अक्षविषये हृतोऽर्थः सर्वथा देयद्यूताचारः इत्यत्रापि हारिस्विवं संभवात् ॥   मिति॰ह्र॰

याज्ञिकाश्वः वैयाकरणहस्ती इहोभयं प्राप्नोति पितृगवः मातृगवः हारिस्वरो भवति विप्रतिषेधेन ह्रस्वाच्च हारिस्वरो विप्रतिषेधेन। ह्र स्वस्यावकाशः इध्मव्रश्चनः। पलाशशातनः हारिस्वरस्य स एवा इहोभयं प्राप्नोति। अक्ष हृतः वारवहार्यः। हारिस्वरो भवति विप्रतिषेधो ज्ञापकः ह्रस्व   धेन॰नवाहरणप्रतिषेत्र

ण बाधकत्वस्य न वा योऽविप्रतिषेधेन किं कारणं हरणप्रतिषेधो ज्ञापकः ह्रस्वराबाधकत्वस्य पदयमहरण इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचा र्यः नञ्ह्रस्वरो हारिस्वरं बाधत इति। नैतदस्ति ज्ञापकं अनो भावकर्मवचन इत्येतस्मिन्प्राप्ते ततएतदुच्यते। यद्येवं साधीयो ज्ञापकं। ह्रस्वर स्यापवादो नो भावकर्मवचन इति बाधकं किलायं बाधते किंपुनस्तन्न बाधिष्यते युक्तस्वरश्च ह्रस्व [redacted] णाद्भवति विप्रतिषेधेन यु क्तस्वरस्यावकाशः गोवल्लवः। अश्ववल्लवः ह्रस्वरस्य स एव इहोभयं प्राप्नोति गोसंख्यः पशुसंख्यः अश्वसंख्यः युक्तस्वरो भवति वि

१प्रतिषेधेन ॥   ॥   ॥   ॥

रमित्यर्थः तस्माद्धरण इति प्रतिषेधो येन केनचिल्लक्षणेन प्राप्तस्य स्वरस्य हारिस्वरो बाधक इति ज्ञापयतीत्यर्थः युक्तस्वरश्चेति। पूर्वपदाद्युदात्तत्वं अत्रापि पूर्व विप्रतिषेधो विवक्षितः गोसंख्य इति नन्वत्र याथादिस्वरः प्राप्नोति नञ्ह्रस्वरः एवं तर्हि मूलप्राप्तिमाश्रित्योक्तमित्यदोषः॥   ॥   ॥

भा०कै०६ उपमानं उपमानमिति योगविभागकरणसामर्थ्याच्छिष्टप्रयोगाच्चोपमानमेव नियम्यत इति प्रश्नः। इतरः सत्यपि योगविभाग इष्टाव्यवस्था न लभ्यते लक्षणा
९९ नुसरणे च प्रतिपत्तिगौरवप्रसंग इत्याह। शब्दार्थप्रकृतावेवेति अथ शब्दार्थग्रहणमिति प्रकृतिग्रहणादेव विशिष्टार्थप्रकृतिर्ग्रहीष्यत इति प्रश्नः। इतरस्तु

उपमानं उपमानमिति किमर्थम्। शब्दार्थप्रकृतावेवेतीयत्युच्यमाने पूर्वेणातिप्रसक्तमिति कृत्वा नियमोऽयं विज्ञायेत तत्र को दोषः इह न स्यात्। पुष्पहारी। फलहारी। उपमानग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ शब्दार्थग्रहणं किमर्थम्। उपमानं प्रकृतावेवेतीयत्युच्यमाने इहापि प्रसज्येत। वृकवञ्ची वृकप्रेक्षी। शब्दार्थग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ प्रकृतिग्रहणं किमर्थम्। शब्दार्थप्रकृतिरेव योनिस्तत्र यथा स्यात् इह मा भूत्। कोकिलाभिव्याहारी गर्दभोच्चारी। अथैवकारः किमर्थः नियमार्थः। नैतदस्ति प्रयोजनं। सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोऽवधारणार्थस्तर्हि यथैवं विज्ञायेत उपमानं शब्दार्थप्रकृतावेवेति। मैवं विज्ञायि उपमानमेव शब्दार्थप्रकृताविति। शब्दार्थप्रकृतौ ह्युपमानं चानुपमानं चाप्युपादानमिष्यते। साध्वध्यायी। विलम्बिताध्यायी॥ दीर्घकाजेर्दीर्घान्तस्यादिरूढान्तो भवतीत्येतस्मात् अत्सात्पूर्वं वदृच ह्रस्वे न द्भवति विप्रतिषेधेन। जेर्दीर्घान्तस्यादिरूढान्तो भवतीत्यस्यावकाशः॥०

दुर्त्तोनेविशेष इति मत्वाह। उपमानमिति। वृकवञ्चतीति कर्तर्युपमान इति णिनिः कृत्स्वर एव चात्र भवति। शब्दार्थप्रकृतिरेव योनिरस्येति। उपसर्गे संबन्धमन्तरेणै राम०
व योधातुः शब्दे वर्त्तते स इह गृह्यते यस्य तूपसर्गेण शब्दार्थत्वं द्योत्यते तस्य ग्रहणं न भवतीत्यर्थः॥ ॥ श्री॥ ॥ ॥ ९९
सं०

नभूत।दिवोदासायेति दिवस्पदास इति। अलुक्। सर्वगुणत्वं गुणानां तरस्याभावः तत्र गुणकात्स्न्यं भवति यथा सर्वे शुक्ल इति। शुक्ले न गुणेन सर्वावयवानां व्यापनात्। पर
मशुक्ल इति आश्रयव्याप्त्या शुक्लः स्यपारम्यमिति गुणकात्स्न्यमस्ति सर्वे सौवर्ण इति विकारे विषयमत्र कात्स्न्यं न गुणविषयं अथ कात्स्न्यग्रहणमिति सर्वे शब्दः

कुरीजः। शमीजः अंसात्पूर्वं वृद्धिश्च इत्यस्यावकाशः उपसर्जामंदुरजः। इहोभयं प्राप्नोति। आमलकीजः वल्मीजः अंसात्पूर्वं वृद्धि
चाइत्येतद्भवति विप्रतिषेधेन नभूत आद्युदात्तप्रकरणे दिवोदासादीनां छंदस्युपसंख्यानं कर्तव्यं। दिवोदासाय गायत। वध्र
श्वाय दाशुषे अंतः सर्वगुणकात्स्न्ये। सर्वग्रहणं किमर्थं गुणकात्स्न्ये इतीयत्युच्यमाने इहापि प्रसज्येत परमशुक्लः परमकृष्ण
इति। सर्वग्रहणे पुनः क्रियमाणे न दोषो भवति अथ गुणग्रहणं किमर्थं सर्वे कात्स्न्ये इतीयत्युच्यमान इहापि प्रसज्येत। सर्वे सौवर्णः सर्वे राज
त इति। गुणग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ कात्स्न्यग्रहणं किमर्थं सर्वे गुण इतीयत्युच्यमाने इहापि प्रसज्येत। सर्वेषां श्वेततः
सर्वे श्वेत इति। कथं चात्र समासः षष्ठी सुबंतेन समस्यत इति। गुणेन नेति प्रतिषेधः प्राप्नोति एवं तर्हि गुणात्तरेण समासो वक्तव्यः तर
१ लोपश्च। सर्वेषां श्वेततरः सर्वश्वेतः॥ ॥ ॥

कात्स्न्ये एव वचनेन त इति प्रश्नः। सर्वेषां श्वेत इति सर्वे शब्दो गुणिकात्स्न्यवचनेनेन गुणकात्स्न्ये सर्वेषां श्वेतो गुण इत्यर्थः। गुणान्तरेणेति गुणसरोयस्तरप्रत
ईतेनेत्यर्थः। सर्वेषामिति गुणसंबंधे षष्ठी पदस्य शौक्ल्यमिति यथा श्वेततर इति। गुणवाचिन एवाश्रितगुणान्तरप्रकर्षनिमित्तास्तरपः सर्वेषां पदानां
१ द्रव्यान्तराधारश्वेतगुणापेक्षया सातिशयः श्वेतो गुण इत्यर्थः॥ ॥

भा०कौ०६ उत्तर वृद्धाविरेव वृद्धिमदुत्तरपदमिति परिग्रहे सिद्धे उत्तरपदग्रहणं तदधिकारविहितवृद्धिपरिग्रहार्थं । उत्तराः सूदर इति प्रकृत्यादिवशाद् ... प्रतिपत्तिः कु
१०० णं । कुण्डशब्दोऽस्ति भाजनविशेषवाची अस्ति समुदायवाची इत्यर्थः । तत्र वनशब्देन भाजनविशेषवाची निवर्त्यते वनशब्दस्तु समुदाय

×उत्तरपदवृद्धि×२

उत्तरपदवृद्धौ [redacted] अयुक्तोऽयं निर्देशः न ह्युत्तरपदं नाम वृद्धिरस्ति कथं तर्हि निर्देशः कर्तव्यः वृद्धिमत्युत्तरपदे इति । सत्यं हि तथा निर्देशः कर्त्तव्यो न कर्त्तव्यः नैवं विज्ञायते उत्तरपदवृद्धिः उत्तरपदवृद्धाविति कथं तर्हि उत्तरपदस्य वृद्धिरस्मिन्सोऽयमुत्तरपदवृद्धिः उत्तरपदवृद्धाविति बहुव्रीहौ बहुव्रीहौ विश्वं संज्ञायां ततो दान्ता स्तन्ता यां मित्राजिनयोरन्तः बहुव्रीहौ विश्वं संज्ञायां ततो दान्ता स्तन्ता या मित्राजिनयोरन्तः इत्येतद्भवति विप्रतिषेधेन । बहुव्रीहौ विश्वं संज्ञायामित्यस्यावकाशः । विश्वदेवः विश्वयशाः । मित्राजिनयोरन्त इत्यस्यावकाशः । कुलमित्रं कुलाजिनं । इहोभयं प्राप्नोति विश्वमित्रः । विश्वाजिनः । मित्राजिनयोरन्त इत्येतद्भवति विप्रतिषेधेन । अतो दान्तप्रकरणे म स्वस्थादीनां छंदस्युपसंख्यानं कर्तव्यं । प्रवृद्धधेयः सुवर्या उपतस्थे । उदराश्वेषुषु । क्षेपे । उदरादिभ्यो नञ्सुभ्यां उदराश्वेषुषु क्षेपे परत्वेन तस्मान्नञ्सुभ्यामित्येतद्भवति विप्रतिषेधेन । उदराश्वेषुषु क्षेप इत्यस्यावकाशः । कुंडोदरो घटोदरः । नञ्सुभ्यामित्यस्यावकाशः । अयवः । अतिलः । अमाषः । सुयवः । सुतिलः । सुमाषः । इहोभयं प्राप्नोति । अनुदरः । सूदरः । नञ्सुभ्यामित्येतद्भवति विप्रतिषेधेन । [redacted]
॥ [redacted] ॥ ॥

वाच्यप्यस्ति अप्रवणमिति जलपयोयोप्यस्ति तत्र यथा तडाकादयो विशिष्टाधारजलवाचिन एवं कुंडशब्दोऽपि ॥ ॥श्री॥ ॥०॥ ॥ एम० १००

॥श्री॥ ॥०॥ ॥०॥

यथा नीलं कुंडमिति तत्र वनग्रहणेप्युपादीयमाने नास्त्यतिप्रसंगनिवृत्तिरित्याह कुंडाद्युदात्तत्वं इति तच्छब्देन पूर्वपदार्थपरामर्शः वनसमुदायवाचीति वनमेव समुदायो वनसमुदायो वनं वा उच्यते । समुदायवाचीव न शब्दो वा श्रयणीयो न तु एकवाचीत्यर्थः अन्ये त्वाहुः वनानां समुदायो वनसमुदाय इति ।

= नीलस्य नागविशेषस्य कुंडं तडाक मित्यर्थः =

सौमनसी अलोमोषसी सौमनसो ऽ पि सौमनसी अलोमोषसी इत्येतस्मात् कपि पूर्वमित्येतद् भवति विप्रतिषेधेन सौमनसी अलोमोषसी इत्यस्यावकाशः सुशर्मा सुकर्मा अधिनाबंधः हेम सुशर्मोतिः सुप्रतिष्ठानः सुश्रोताः सुपयाः सुवर्चाः कपि पूर्वमित्यस्यावकाशः अयवकः अतिलकः । इहोभयं प्राप्नोति । सुशर्मकः सुश्रोतस्कः कपि पूर्वमित्येतद् भवति विप्रतिषेधेन कूलतीर । पर्यादिभ्यः कूलादीनां आद्युदात्तत्वं पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं भवति विप्रतिषेधेन परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु इत्यस्यावकाशः परित्रिगर्त्तं परिसौवीरं । कूलादीनामाद्युदात्तत्वस्यावकाशः अनुकूलं । अतिकूलं इहोभयं प्राप्नोति परिकूलं कूलादीनामाद्युदात्तत्वं भवति विप्रतिषेधेन चेलखेटकटुक अपकर्मधारयेराज्यं चेलराज्यादिभ्यः अव्ययचेलराज्यादिस्वरात् अव्ययस्वरो भवति विप्रतिषेधेन चेलराज्यादिस्वरस्यावकाशः भार्याचेलं पितृचेलं ब्राह्मणराज्यं अव्ययस्वरस्यावकाशः निः कौशांबिर्वाराणसिः । इहोभयं प्राप्नोति कुचेलं कुराज्यं अव्ययस्वरो भवति । विप्रतिषेधेन सतर्हि पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः इष्टवाची परशब्दः विप्रतिषेधे परं परिहृतं भवति कुंडं वनं कुंडाद्युदात्तत्वेन समुदायग्रहणं कुंडाद्युदात्तत्वेन समुदायैकत्वे वनं वन समुदायवाची चेत्स कुंडशब्दो भवतीति वक्तव्यं इहमाभूत मत्कुरं [redacted] ॥ ॥ इति श्रीमद्भगवत्पतंजलिविरचितमहाभाष्ये षष्ठ. द्वितीये प्रथमान्हिकम् ॥ ॥ ॥

ग्रहणं । वि: ३

नेन शरवणसमुदायः शरकुंडशब्देनोच्यते मत्कुरमिति माजनविशेषवाची विशिष्टसंस्थानाधार जलवाची यत्र कुंडशब्दः इत्युपाध्याय जैय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे षष्ठ. द्वितीये प्रथमान्हिकम् ॥ ॥ ॥

भा० कै० ६
१०१

गतिका परमकारमिति विचार्यं किंचिदत्रास्ति तस्योपन्यासः यथा संप्रदानेद्रयः शब्दाः नकारकरूपतां प्रतिपादयंति तथा कारकशब्दोपि न उक्तस्य शब्दै
रभिधाने तु सधर्मो नाभिधीयते विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति एवं च तद्विशेषणमपि परमशब्दः कारकवाची न भवतीति अस्युदाहरणं ए
तदपीति नत्वकारकस्य कारकशब्दे नाभिधानं तत स्तद्विशेषणस्यापि कारकत्वम स्त्येव यथा घटं करोति भीष्ममिसादौ देवदत्तस्येति शेषविवक्षायां षष्ठी

=असंदिग्धे देवदत्तस्य कारकमित्युदाहरणे मति किमिती दनुपपद्यते तत्राह विचार्यमिति ...= विशेष्यस्यैव कारकत्वाभावे विशेषणस्य तु ... भावइत्याह एवं चेति ...=

परमं कारकं

गतिकारकोपपदात्कृत् गतिकारकोपपदादिति किमर्थं इह माभूत् परमकारकं गतिकारकोपपदादित्युच्यमाने प्यत्र प्राप्नोति एतद
पि हि कारकं इदं तर्हि देवदत्तस्य कारकं देवदत्तकारकं इदं चाप्युदाहरणं परमं कारकं परमकारकमिति ननु चोक्तं गतिकारकोपपदादित्यु
च्यमाने प्यत्र प्राप्नोति एतदपि हि कारकमिति नैतत्कारकं कारकविशेषणमेतत् यावद्रूपात्र लक्षं कारकं शोभनं कारकमिति तावदे
वैतत्परमं कारकमिति अथ पत्कृद्ग्रहणं किमर्थं इह माभूत् निः कौशाम्बिः निर्वाराणसिरिति गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्य
मन्यस्योत्तरपदस्याभावात् गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणमनर्थकं ॥ ॥ ॥श्री॥ ॥

=पाक क्रियया ... पामपि पाचकादिष्वव ... क्रिया योग्यता विशेष्टि ... दिवि ...

काभ्यां
तृजकाभ्यां कर्तरि कर्तरि चेति कारकषष्ठ्याः समासप्रतिषेधादिह षष्ठीसमासो भवत्येव नैतत्कारकमिति करं ताहि क्रियायोग्यता विशिष्टद्रव्यवाचिनो न तद्भूतां कारकतां प्र
तिपादयंति परममित्येतच्च न करोति क्रियाविशेषणं यतः कर्मकारकमेतत्स्यादपि तु द्रव्यविशेषणं तथा च समानाधिकरणसमास उपपद्यते अथ यत्कृद्ग्रहणमि
ति यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो नान्यं प्रतीति प्रश्नः निष्कौशाम्बिरिति क्रमणक्रियापेक्षमस्ति निसो गतित्वमिति भावः ॥ ॥ गम०
१०१

रुका॰

अन्यस्योत्तरपदस्याभावादिति गतिकारकोपपदानां कृद्भिः संबंधात् क्रियावाचिकृदंतमेवोत्तरपदमाश्रित्यमुपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्य
ते इति तेनापि कृदंतमेवाश्रित्यं कृत्प्रकृतौवेति वाशब्दस्तदर्थे धातुप्रत्ययसमुदायपरिग्रहार्थः कृद्ग्रहणमन्यथा धातावेवोत्तरपदे स्वरः स्यादित्यर्थः प्रतीरि

=क्रियायोगे गतिरित्यादि क्रियापदस्तत्राद्य कारकं तस्मिन्निति भावः।२=

अन्यस्योत्तरपदस्याभावात् नह्यन्यत् गत्यादिभ्य उत्तरपदमस्ति अन्यदतः कृतः किं कारणं धातोर्हि द्वये प्रत्यया विधीयंते तिङः कृतश्च तत्र
कृता सह समासो भवति तिङा च न भवति तदंतरेण कृद्ग्रहणं कृत एव भविष्यति ननु चेदानीमेवोदाहृतं निष्कौशांबिः निर्वाराणसिरिति य
त्क्रियायुक्तास्तं प्रतिगत्युपसर्गसंज्ञे भवतः नच निसः कौशांबीशब्दं प्रति क्रियायोगः कृत्प्रकृतौ वा गतित्वादधिकार्थे कृद्ग्रहणं कृत्प्रकृ
तौ न र्हि गतित्वादधिकार्थं कृद्ग्रहणं कर्तव्यं कृत्प्रकृतिर्हीनुः धातुं च प्रति क्रियायोगः तत्र यत्क्रियायुक्तास्तं प्रतीति इहैव स्यात् प्रणीर
त्नीरिति इह न स्यात् प्रणायकः उन्नायकः एतदपि नास्ति प्रयोजनं यत्क्रियायुक्ता इति नैवं विज्ञायते यस्य क्रियायत्क्रियायुक्तास्ते
प्रतिगत्युपसर्गसंज्ञे भवत इति कथं तर्हि या क्रिया यत्क्रियायुक्तास्तं प्रतिगत्युपसर्गसंज्ञे भवत इति ॥ ॥ ॥

=समासस्वरेणांतोदात्तत्वसिद्धेराह अन्यस्येति।१=अर्थं प्रतीति अर्थनिमित्तिकागत्यादिसंज्ञेत्यर्थः। केवलावाचकत्वेऽपि शाब्दे... साधनसंस्कारापाल्व क्रियाया अंगत्वं केवलापाद्य नकिंचिदप्रयत्नसाध्यमादिति भावः।२=

ति प्रत्ययस्वरापवादोऽयं कृत्स्वरः यस्य क्रियेति अन्वयव्यतिरेकाभ्यां यस्य वाच्या क्रियेत्यर्थः धातोरेव क्रियावाच्यत्वेति तमेव प्रतिगत्युपसर्गसंज्ञा प्रसंगः या क्रियेति।
क्रियालक्षणमर्थं प्रतिगत्युपसर्गसंज्ञे भवतः केवलाच्छ क्रियाया व्यवहारानंगत्वाद् स्वतन्त्रासंस्पृष्टक्रियावाचिकृदंतपरिग्रहः सिद्ध इत्यर्थः ॥ ॥

या॰

=म [redacted] उभ्रु धनानामित्यस उ इतिपक्षेनञ् अंतास्तुपिप्रगादेनसमासेनतआनिर्मितिद्धिखतारस्यवेदैलेवेद मिद्धिरतआह भामंतेनेतिःनञ्वंतारसंनत्स्वार्थिकत्वेनभिन्नमदस्पायेक्षसमासार्थमेवांतरंगत्वादाभिनतःसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वमप्रसंगःमितकृद्गहणेनसखाविःप्रसजेतीतिभावः॥ २=
अव्ययपूर्वपदप्रकृतिस्वरवाधित्वा

भा॰ कै॰ ६ नकश्चित्केवल इति केवलक्रियावाचित्वात केवल इत्युक्तमिनरस्तु शब्द केवल्यमनेनोक्तमिति मत्वाचोदयति ननुचायमिति एषोपीति तस्मात्कारकसहिता
१०२ याएवक्रियायाः सर्वत्र प्रतिपादनात्प्रणी प्रणायकादीनांनकश्चिद्भेदः प्रभवनमिति भावेल्युड्विधानात्कारकासंस्पृष्टैव क्रिया भिधीयते प्रपचजित
[redacted]रामिति प्रशवृस्यामंते नसमासः गतिकारकोपपदानांकृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरितिनन्तु कृद्भिरेव समास इति तेननतद्धितांतेनापि सु

=केवलतमर्थवत्पदस्य विशेषणमित्याह केवलेति स्वं न आत्म्यस्य स्वार्थस्ये सद्यतन्नाऽऽर्थसंसर्गः॥ १= × सुबुत्पत्तेरिति समस्यत्वयमर्थोयदागत्यादीनां कृद्भिः सह समासो भवति तदा प्राक् × १

नकश्चिच्छब्दोऽस्ति केवलोयस्तस्यार्थस्य वाचकः स्यात केवलस्तस्यार्थस्य वाचको नास्तीति कृत्वाकृदधिकस्य भविष्यति ननुचायं
तस्यैवार्थस्य वाचकः प्रणीकृन्नीरिति एषोऽपिहिकर्त्रे विशिष्टस्यैव अयंतर्हितस्येवार्थस्य वाचकः प्रभवनमिति तस्मात कृद्ग्रहणं कृ
त्रैवं यदि कृद्ग्रहणं क्रियते आमंतेस्वरेण प्राप्नोति प्रपचतितरां [illegible] मजल्पतितमां आस्तिपुनः कृद्ग्रहणे क्रियाप्रधानमाख्या
ततस्यातिशयेतरवुत्पद्यते। तरवंतात्स्वार्थे आम्। तत्रयक्रियायुक्ता इतिभवत्येव संघाते प्रतिक्रियायोगः नचकश्चित्केवलः
शब्दोऽस्तियस्तस्यार्थस्य वाचकः स्यात केवलस्तस्यार्थस्य वाचको नास्तीति कृत्वाधिकस्य भविष्यति। ननुचायंतस्यार्थस्य वाचकः
१ प्रभवनमिति। एषोपि द्रव्यविशिष्टस्य वाचकः॥ " "

=अनंतरमितिशेषः॥ १= संख्याकालेति ततश्चामंतं प्रतिप्रधानस्य गमितात्वरासिद्धिरिति सर्वः॥ १=

वुत्पत्तेःसमासः प्रवर्त्ततेनन्वत्र सपि कृद्ग्रहणे तरवरोनभविष्यति संख्याकालसाधनोपग्रहविशिष्टायाः क्रियाया अभिधानान्न केवलाया इत्याह अस्तिपुनरिति द्र राम॰
व्यविशिष्टस्येति धातुः साध्यरूपतां प्रतिपादयति प्रत्ययस्तु द्रव्यधर्मलिंगसंख्यायुक्तमर्थमिति भावः॥ ॥श्री॥ ॥ ॥ १०२

[redacted] द्रव्यवदिति प्रसिद्धघटादिद्रव्यापेक्षो वतिर्निर्दिश्यते यथा घटादिद्रव्यं घटादिभिः शब्दैर्लिङ्गसंख्याकर्मादिशक्तियुक्तमभिधीयते तथा पाकादिभिः शब्दैः पाकादिको भावः क्रियावदपीति। तेनैभोक्तुं पाक इत्यादौ क्रियोपपदाश्रयः प्रत्ययस्तद्वदेवमव्याप्तिप्रसंगात् तत्संख्यातेक्तं तद्ग्रहणं अन्तः उभयं प्रकृतमिति समासस्येत्यपि प्रकृतमुत्तरपदादिरित्यत उत्तरपदग्रहणमपि तत्रान्यतरदिति अन्तोदा

कथं कृदभिहितो भावो द्रव्यवद्भवतीति क्रियावदपीति अन्तः किं समासस्यान्तउदात्तो भवति आहोस्विदुत्तरपदस्य कुतः संदेहः उभयं प्रकृतं तत्रान्यतरच्छक्यं विशेषयितुं कस्मात्तु विशेषः अन्तोदात्तत्वं समासस्येति चेत्कप्युपसंख्यानं अन्तोदात्तत्वं समासस्येति चेत् कप्युपसंख्यानं कर्तव्यं इदमेतन्नमध्यः सप्रथमपूरणाकेः क्रियागणाने कपि चेति वक्तव्यं। इहापि यथा स्यात् इदं प्रथमकाः। अस्तु तर्ह्युत्तरपदस्य उत्तरपदान्तोदात्तत्वेनत्वस्तु भ्यां समासांतोदात्तत्वं वक्तव्यं अन्तचोवहृत्वः अपर आह उत्तरपदांतोदात्तत्वेन त्वस्तु भ्यां समासांतोदात्तत्वं उत्तरपदांतोदात्तत्वे नत्वस्तु भ्यां समासांतोदात्तत्वं वक्तव्यं॥ ॥ ॥ ॥

त्तविधानेन न विशेषे वक्तव्यापयितुमित्यर्थः अथवा समासे नोत्तरपदमुत्तरपदेन वा सह समर्थः इदं प्रथमकारति। मत्राह्याकारस्यान्तोदात्तत्वमिष्यते कपस्तु समासांतत्वात् प्राप्नोतीति कपि चेति वक्तव्यं तेन कपि परतः पूर्वस्योदात्तत्वं सिध्यति अन्नचरति अकारः समासस्याव[redacted]
यवो नोत्तरपदस्येति तत्स्योदात्तत्वं न प्राप्नोति अपर आहेति प्रकारांतरसद्भावात् सर्वस्मादेदः॥ [redacted] ॥ ॥श्री ॥

भा०कै०६ अजकइति। अत्र कप उदात्तत्वमिष्यते नच उत्तरपदस्य कार्यित्वे न सिध्यति। समासे तु कार्यभाक् सिध्यति कपिपूर्वमित्यस्यापवाद इति अजक शब्देनञः परस्य
१०३ कपिपूर्वस्य एकाच्त्वादन्त्यात्पूर्वमुदात्तभावी नास्तीति नञ्सुभ्यामित्यनेन स्वरेण भाव्यं सच स्वरः कपो न सिध्यति नन्वेवं तत्पूर्वोपधोदात्तभाव्यस्ति अयवक इत्या
दौ तत्र कपिपूर्वमित्येतत् बाध्यताम् अजकादौ तु कथं बाध्यते। नह्यपवादः प्रवर्तमान एवोत्सर्गं बाधते नैष दोषः यथा हलादिः शेष इत्यस्याभ्यासजातेराश्रयणा

अजकः अश्वकः कपिपूर्वमित्यस्यापवादः ह्रस्वान्तेन्त्यात्पूर्वमिति तत्र ह्रस्वान्तेन्त्यात्पूर्वमुदात्तभावी नास्तीति कृत्वोत्सर्गेणान्तोदात्तत्वं प्राप्नोति नवा
कपिपूर्ववचनं ज्ञापकमुत्तरपदान्तोदात्तत्वस्य नवा एष दोषः किं कारणं यदयं कपिपूर्वमित्याह तज्ज्ञापयत्याचार्यः उत्तरपदस्यान्तोदात्तत्वं न भव
ती ति एवमपि कुत एतत् समासस्यान्त उदात्तो भवतीति। प्रकरणाच्च समासान्तोदात्तत्वं प्रकृतं समासग्रहणमनुवर्तते क्व प्रकृतं चौ समासस्ये
ति। ननु चोक्तमन्तोदात्तत्वं समासस्येति चेत् कपि उपसंख्यानमिति। नैष दोषः उत्तरपदग्रहणमपि प्रकृतमनुवर्तते क्व प्रकृतं उत्तरपदा
१ दिरिति॥ ॥श्री॥ ॥ ॥

दादिर्नुरित्याह वक्ष्यमाणे हेतौ निवृत्तिर्भवति एवं ह्रस्वान्तेन्त्यात्पूर्वमित्यत्रापि ह्रस्वजातेराश्रयणात् अक्कौ एरिडम्यायां सर्वत्र ह्रस्वान्ते कपिपूर्वमित्यस्याप्रवृत्तिरथवा
ह्रस्वान्ते [redacted] सा दिसे देवदत्तकं कपिपूर्वमिसतः पूर्वग्रहणमनुवर्त्यते तत्र पूर्वग्रहणं नियमार्थं ह्रस्वान्तेसादेव पूर्वमुदात्तं भवति न राम०
तु कपिपूर्वमिति एवं पक्षद्वये दोषमभिधाय लिङ्गेन समासस्य कार्यित्वं प्रतिपादयितुमाह नवेति अकुमारीक इत्यादौ कपिपूर्वस्य उदात्तार्थं कपिपूर्वमित्युच्यते। [redacted] १०३
१ [redacted] यदि च नञ्सुभ्यामित्यनेनोत्तरपदस्यान्तोदात्तत्वं स्यात् तत एतेनैव सिद्धत्वात् कपिपूर्वमिति न कर्तव्यं स्यात्॥

दंत
नञ्सुभ्यामिति नञ्सुभ्यांय उत्तरपदंतस्य समासस्येत्यर्थः कारकात् संज्ञायामनाचितादीनामिति विहितमन्तोदात्तत्वमनेन नियम्यते तेन देवपालित इत्यादौ न भवति
तृतीयाकर्मणीत्यनेन तु पूर्वपदप्रकृतिस्वरो भवति अनाहत इति देवदत्तशब्दः शंखविशेषस्य संज्ञा न चाशीरभावादन्तोदात्तत्वाभावः सिद्धं त्विति तंत्रेण सूत्रद्वय

=संज्ञायामनाचितादीनामिति तृतीयाकर्मणीत्यस्यापवादः।१= तत्राशीर्विषयनियमादनाशिषि संज्ञायामिति [redacted] प्राप्नोति न ततः प्रतिषेध आरभ्यते।१= शंखेति। न हि तत्र देवाः एनं देयासुरित्यर्थप्रतीतिरिति भावः।१=

तत्रैवमभिसंबंधः क्रियते नञ्सुभ्यां समासस्यान्तउदात्तो भवतीति इदमेतत्तम्यः प्रथमप्रकरणयोः क्रियाग्रहणे उत्तरपदस्येति कारकाद्
कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधः वक्तव्यः अनाहतो नदति देवदत्तः सिद्धं तूभयनियमात् सिद्धमेतत् कथं उभयनियमात् उभयतो
नियमः क्रियते कारकाद्दत्तश्रुतयोरेवाशिषि आशिष्येव कारकाद्दत्तश्रुतयोरिति संज्ञायां त्वषिप्रतिषेधो मित्रे त्वषिप्रतिषेधोपि
न वक्तव्यः विश्वामित्रऋषिः वहोरेव उत्तरपदभूम्नि किमर्थं वहोर्नञ्वदतिदेशः क्रियते नञ्सुभ्यां इत्येवोच्येत नैवं श
क्यमुत्तरपदभूम्नीति वक्ष्यति तद्वहोरेव यथा स्यात् नञ्सुभ्यां माभूदिति नैतदस्ति प्रयोजनं एकयोगेपि हि सति यस्योत्तरपदभूमास्ति तस्य
भविष्यति कस्य चास्ति वहोरेव इदं तर्हि प्रयोजनं गुणादयोऽवयवा इति वक्ष्यति तद्वहोरेव यथा स्यात् नञ्सुभ्यां माभूदिति एतदपि ना
१स्ति प्रयोजनं॥ ॥ श्री

=आचार्येणपठितमितिशेषः।१=

सोच्चारणादेकं सूत्रं आशिष्येवेति भिन्नक्रमत्वादेवकारस्येति भावः संज्ञायाम् विश्वामित्र इति मित्रे चर्षाविति दीर्घः परत्वादनेनान्तोदात्तत्वं प्राप्तं मतिविद्य
ते ततो वहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वं भवति वहो ॥ ॥ ॥

यस्य गुणादय इति यस्य विशेष्यास्य सर्वे: ननु चागुणाः स्थगुणा इत्यादौ नञ्सुभ्यामुत्तरे गुणादयः सन्त्येव एवं तर्हि उत्तरपदभूमग्रहणात् पूर्वपदस्य विशेषणात् बहुव्रीहेरेव
परे सांगगुणादीनां प्रतिषेधो भविष्यति यस्मादुत्तरपदं भूम्नि वर्त्तमानस्येति हि भाष्यकाराभिप्रायः उपसर्गात् नित्यं यदेकरूपं तदिह ध्रुवं गृह्यते। निर्गतं ललाटमस्य
स्य निर्ललाट इति ललाटस्य निःसं निर्गमनाद्ध्रुवत्वमिह तु भवसंतोदात्तत्वमुदाहुः क्रोशतीति न हि वाहो निस्यमूर्ध्वे दिग्वस्थानं प्रमुख इति यस्य निसं

=नञोजरेत्यनेनोत्तरपदाद्युदात्तत्वं·२॰

एकयोगेऽपि हि सति यस्य गुणादयोऽवयवाः सन्तीति तस्य भविष्यन्ति कस्य च सन्ति बहुव्रीहेरेव अत उत्तरं पठति बहोर्नञ्वत् उत्तरपदाद्युदात्तार्थं बहोर्नञ्वदति
देशः क्रियते उत्तरपदस्याद्युदात्तार्थं उत्तरपदस्याद्युदात्तत्वं यथा स्यात्। विदेशस्थमपि यन्नञः कार्यं तदपि बहोर्यथा स्यात् नञो जरमरमित्रमृताः अ
जरः अमरः बहुजरः बहुमित्रः बहुमृतः उपसर्गात् मुखस्यान्तोदात्तत्वात् उपसर्गात्स्वांगं ध्रुवं मुखस्यान्तोदात्तत्वात् उपसर्गात्स्वांगं ध्रुवं भवति वि
प्रतिषेधेन मुखस्यान्तोदात्तत्वस्यावकाशः गौरमुखः श्लक्ष्णमुखः उपसर्गात्स्वांगं ध्रुवमित्यस्यावकाशः अस्थिकं प्रोदरः इहोभयं प्राप्नोति प्रमुखः
उपसर्गात्स्वांगं ध्रुवमित्येतद्भवति विप्रतिषेधेन। कः पुनरत्र विशेषः तेन वा सति अनेन वा सापवादः सविधिः अयं पुनर्निरपवादकः। अव्यया
त्तस्य प्रतिषेधोऽपवादः अभेर्मुखं अपाच्च किमर्थमिदमुच्यते न उपसर्गात्स्वांगं ध्रुवमित्येव सिद्धं अभेर्मुखमपाच्च ध्रुवार्थं अध्रुवार्थो
यमारंभः अबहुव्रीह्यर्थो वा। अथवा बहुव्रीहेरिति वर्त्तते अबहुव्रीह्यर्थो यमारंभः स्फिगपूतग्रहणं किमर्थं न उपसर्गात्स्वांगं ध्रुवमित्येव सिद्धं। स्फिग
पूतग्रहणं च किमध्रुवार्थमबहुव्रीह्यर्थमेव वा ॥×स्फिगपूत× ॥ ॥

=विधिविप्रतिषेधरूपस्याप्यनेन विप्रतिषेधोऽभाष्यतात्पर्यविषय इत्यभिप्रायः।२॰

प्रगतं मुखं यस्य प्रमुखः अत्राहुः मुखं स्वांगमिति प्राप्तिर्नाव्ययदिक्शब्देति प्रतिषिद्धा ततो विप्रतिषेधानुपपत्तिः उच्यते। नाव्ययदिक्शब्देति प्रतिषेधो बाधको
स्तु यो पसर्गादिति तत्र परत्वात्प्रतिषेधं बाधित्वैतदन्तोदात्तत्वं बाधकं वर्त्तते॥ ॥५॥ ॥ ॥

प्र॰

अतेरतिकारक इति कारकमतिक्रान्त इति समासः अति शब्दे इति विषये क्रान्तार्थे वृत्तिरिति क्रमेरप्रयोग एवात्र लोपः स्वरं गम्यमानत्वात् वा तुल्लोपः यदा पूर्वपदप्रकृ
तिस्वरः तदा शोभनः कारक इत्यतिका[redacted]रक शब्दस्यार्थः द्वित्रिपूर्वपदप्रकृतिस्वरापवादो योगः किमिदमिति ननु चाकारान्तनिर्देशो मूर्द्धेति भाष्यमि
ति द्वैतानुपपत्तिः उच्यते न पाद्वाश्रयं द्वैतं किं तु कार्यिभेदाश्रयं पदास्समासस्यान्तोदात्तत्वविधीयते निःसस्वसमासान्त इति पक्षस्तदाकारान्तग्रहणमेव सामर्थ्या

अतेरकृत्पदे अतेर्धातुलोपे अतेर्धातुलोप इति वक्तव्यं अकृत्पदे इति ह्युच्यमाने इह च प्रसज्येत शोभनो गार्ग्यो ऽतिगार्ग्य इति इह
च न स्यात् अतिकारकः अतिपदाशब्दी द्वित्रिभ्यां पाद्दन्मूर्द्धसु किमिदं द्वित्रिभ्यां मूर्द्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानं द्वित्रिभ्यां मू
र्द्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानं कर्तव्यं द्विमूर्द्धा त्रिमूर्द्धा अस्तु तर्हि नकारान्तग्रहणं नकारान्ते ऽकारान्तस्य नकारान्ते
सस्यकारान्तस्योपसंख्यानं कर्त्तव्यं द्विमूर्द्धः उदात्तलोपात् सिद्धं अस्तु तर्हि नकारान्तग्रहणमेतोदात्तत्वे कृते लोपः ॥ उदात्तनिवृत्तिस्व
रेणासिद्धं ॥ एवं आह हेत्विन्नकारान्तग्रहणे कश्चात्र विशेषः । द्वित्रि

न भवति यदा तूत्तरपदस्यान्तोदात्तत्वं इति पक्षस्तदा कृतेपि समासान्ते न सोत्तरपदे ऽपन्नत्वे भावान्नकारान्तस्य स्वरविधिरिति पक्षो ऽवतिष्ठते नकारान्तस्योपसंख्यानमि
ति समासस्वरे तत्कार्यिणि सस्वसमासान्तस्तदा नकारान्तस्य साधुत्वं स्वरश्चोपसंख्येय इत्यर्थः द्विमूर्द्ध इति परो ऽत्र पदस्य कार्यित्वं तदा कृते समासान्ते उत्तरपदस्यान्तोदा
त्तत्वं विधीयमानं प्रत्ययस्य न प्राप्नोति उदात्तलोपादिति उत्तरपदस्यान्तोदात्तत्वे सति शेषनिघाते न प्रत्ययो ऽनुदात्त स्तत्रानुदात्तस्य च यत्रोदात्तलोप स्योदात्त
त्वं सिद्धमित्यर्थः ॥ इति प्रसङ्गः ॥

भा० कै० ६ परत्वाल्लोप इति ततस्थोदात्तत्वलोपो न भवतीत्यर्थः एवं तर्हि इदमिहेति यदा कृते समासे समासांतः क्रियत इति पक्षस्तदेयं संप्रधारणा यदा तु समासात्पूर्वो उत्तरपदात्स

१०५ मासांतः क्रियत इति पक्षस्तदा संप्रधारणैवात्र नास्ति युक्तं पुनरिति नन्तु कृतेपि समासांते नकारांत एव मूर्द्धशब्द उत्तरपदं संभवतीति किमत्रायुक्तं एवं मन्यते यथापा

=ननु कृतेपीति निसेपि समासांते उत्तरपदस्य कार्यित्वान्नस्मान्तत्वान्मूर्द्धस्थितिनिर्देशत्वयपन्नस्मर्थः ।१=

=भवत्येवेति परत्वाल्लोपो भवत्येवेनावतापि अंतोदात्तत्वस्य अनित्यत्वमिति भावः तदेवोपपादयति यस्येति ५=

इदमिह संप्रधार्यं अंतोदात्तत्वं क्रियतां लोप इति किमत्र कर्त्तव्यं परत्वाल्लोपः एवं तर्हि इदमिह संप्रधार्यं अंतोदात्तत्वं क्रियतां समासां

त इति किमत्र कर्त्तव्यं परत्वादंतोदात्तत्वं नित्यः समासांतः कृतेप्यंतोदात्तत्वे प्राप्नोत्यकृतेपि प्राप्नोति अंतोदात्तत्वमपि नित्यं कृतेपि

समासांते प्राप्नोत्यकृतेपि प्राप्नोति अनित्यमंतोदात्तत्वं न हि कृते समासांते प्राप्नोति [redacted] परत्वाल्लोपेन भवितव्यं भवत्येव लोपः यस्य च लक्षणांतरेण निमित्तं विहन्यते न तदनित्यं न च समासांत एवांतोदा

त्तत्वस्य निमित्तं विहंति अपवर्गं लक्षणांतरं लोपः प्रतीक्ष्यः उभयोर्नित्ययोः परत्वादंतोदात्तत्वमंतोदात्तत्वे कृते समासांतः टिलोपः

टिलोपे कृते उदात्तनिवृत्तिस्वरेण सिद्धं युक्तं पुनरिदं विचारयितुं नन्वनेनासंदिग्धेन नकारांतग्रहणेन भवितव्यं यावता मूर्द्ध

स्विति सुच्यते यद्यकारांतग्रहणं स्यात्मूर्द्धस्विति ब्रूयात् ॥

=एवं तर्हि कृतमंतग ।१= =हेत्वंतरमाह=

=एवं च नकारांतमस्यैव कार्यित्वं स्थितमिति मूर्द्धस्विति भावः ।१=

हृदिति समासांतनिर्देशः एवं मूर्द्धस्विति समासांतनिर्देश एव न्याय्यः एवं ह्यसंदिग्धं समासस्य कार्यित्वं विज्ञायते न च कृतं तस्मादुत्तरपदस्यैव कार्यि[redacted]त्वेन भा ॥ राम० १०५

॥ व्यं ॥ ॥ श्री ॥ ॥

सैषासमासांतार्थेति यदिनित्यः समासांतः स्यात्तदा कार्यविशेषसंदेहव्यावृत्तयेप्रक्रमाभेदाय वासमासांतएवोच्चार्येत तदनुच्चारणाच्चसमासांतस्यानित्यत्वंज्ञाप्यते तत्रयदा
समासांतोनाश्रितस्तदासमासस्योत्तरपदस्य वाकार्यित्वेविशेषाभावोयदातुसमासांतः क्रियतेतदासमासस्यकार्यित्वे सिद्धेसमासांतोदात्तत्वंयदाप्युत्तरपदस्यकार्यि

=सैषेति॰ समासांतस्यानित्यत्वज्ञापनार्थेसर्पिः॥ तदेवमाचष्ट॰ एवंतर्हीत्यादिः॰ ~

सैषासमासांतार्थोविचारणा एवंतर्हिज्ञापयत्याचार्योविभाषासमासांतोभवतीति प्रादिभ्यश्छंदसिबहुलं छंदसत्वमिदमुच्यते
प्रादिभ्यःपरांतस्यपूर्वोतस्याविदृश्यते पूर्वोदयस्यदृश्यते व्यत्ययोबहुलंस्मृतः छंतोदात्तप्रकरणेत्रिचक्रादीनांछंदसि छं
तोदात्तप्रकरणेत्रिचक्रादीनांछंदस्युपसंख्यानंकर्तव्यं त्रिचक्रेणत्रिवंधुरेणत्रिवृतारथेन॥ ॥इतिश्रीमद्भगवत्पतं
जलिविरचितेव्याकरणमहाभाष्येषष्ठस्याध्यायस्यद्वितीयेपादेद्वितीयमाह्निकं॥ पादश्चद्वितीयःसमाप्तः॥~ ॥

=तस्येति॰ अयंभावः॰ विग्रहवाक्यएवसमासांतप्रवृत्तावंतस्यतत्सन्नियोगशिष्टपुदात्तहेतेरेकवाक्यतापत्तौशेषनिघातेपूर्वपदस्योदात्तस्यदिनयोगितानावेनपूर्वपदस्यप्रकृतिस्वराभावेर्थवशात्पूर्वंस [redacted] त्समासांतविधावाद्युदात्तश्चेत्स्यात्संबंधतापकं

त्वंतदापरत्वादंतोदात्तत्वेकृतेसमासांतः तत्रटिलोपइतिउदात्तनिवृत्तिस्वरेणपिसिद्धं ननुप्रत्ययस्वरेणसमासांतस्य भाव्यं। नैतदस्तिबहुव्रीहिस्वरेणतस्य वाधनात्
न बहुव्रीहिस्वरस्याप्यनेन।प्रादिः॰ व्यत्ययोबहुलंस्मृतइति बहुलग्रहणलभ्यःस्वरव्यत्ययइत्यर्थः॰ त्रिचक्रेणेत्यादौबहुव्रीहिस्वरेप्राप्तेंतोदात्तत्वंविधीयते॥ ॥
॥इत्युपाध्यायजैय्यटपुत्रकैय्यटकृतेभाष्यप्रदीपेषष्ठस्याध्यायस्यद्वितीयमाह्निकं॥ पादःसमाप्तः॥ ॥

द्वितीयपादे॰

भा० कौ० ६ १०६

अलुगुत्तरपदे आकुतोयमिति अन्येष्वधिकारेषु यात्यानाद्वधिनिर्णयो ऽत्र तु सामर्थ्यादितिप्रतिपादयितुं चोद्यप्रतिसमाधानोपन्यासः प्रागानङः इति उत्तरपदे ऽ

नंतरान्तस्य ऋकारांतस्यानङा भाव्यं अलु किंच सतिविभक्त्या व्यवधानाद् ऋकारांतयोः पूर्वपदोत्तरपदयोरानंतर्येन स्यादिति सामर्थ्यात् आगानङो लुगधिकारः अथवा

कार्यांतरं प्रकृतस्य विधेर्निवर्त्तकमित्यलुगधिकारः प्रागानङः प्रागंगाधिकारादिति प्रत्ययेपरतो ऽगं भवति न तूत्तरपद इति सामर्थ्यादवधिपरिछेदः । कानीति स

मास एव लुक् प्राप्तः प्रतिषिध्यत इति सामर्थ्यात् समासाधिकारादुत्तरपदं लभ्यते कार्यांतरविधावपि वर्नसमास इत्यतः समासग्रहणानुवृत्त्योत्तरपदलाभ इति

=आनङा दि० २=

=वर्नसमास इत्यतः।१=अन्यत्र तु सामर्थ्याभावे विभ्रधिकारेऽलेवनकामसलाभः कार्यांतरे दि० १=

अलुगुत्तरपदे आकुतोयमधिकारः अलुगधिकारः प्रागानङः उत्तरपदाधिकारः प्रागंगाधिकारात् कानि पुनरुत्तरपदाधिकारस्य प्रयोजनानि उत्तरपदाधिकारस्य प्रयोजनं स्तोकादिभ्यो ऽलुगानङि को ह्रस्वनलोपाः । पंचम्याः स्तोकादिभ्यः स्तोकान्मुक्तः अल्पान्मुक्तः अलुग्भवति उत्तरपद इति किमर्थं । निष्क्रांतः स्तोकान्निःस्तोकः आनङि को ह्रस्वनलोपाः प्रयोजनं । आन

ऋ उ० होतापोतारौ उत्तरपद इति किमर्थं होतापोतृभ्यां ॥ ॥

प्रयोगः निस्तोक इति यद्यप्यत्र स्तोकांतिके तिप्रतिपदोक्तसमासाश्रयणाद्लुङ् भवतीति शक्यते वक्तुं तथाप्यन्यार्थोऽवश्यं वक्तव्य उत्तरपदाधिकार इति लक्षणप्रतिप

दोक्तपरिभाषानाश्रिता होतापोतृभ्यामिति पोतृशब्दस्यानङ् न भवति होतापोतारावित्यत्र तु परत्वाद्गुणेनानङ् बाध्यत इत्युदाहरणांतरोपन्यासः अथ विभक्त्य

पेक्षत्वाद्गुणो बहिरंग आनङ् तु तदनपेक्षत्वादंतरंग इति तथा सति होतापोतारावित्युदाहरणं भवति॥ ॥ श्री॥ ॥७॥ राम० १०६

ग्रामणिकुलमिति षष्ठीसमासः ग्रामणीरिति समासाधिकारे प्युत्तरपदस्य ह्रस्वप्रसंगः परमनेति यथा नतरामिति प्रतिषेधस्य प्रकर्षः एवं पारम्यमपीति भावः नै
षोऽस्ति प्रयोग इति प्रयुक्तानामिदमन्वाख्यानं प्रवृत्तमिति भावः ननतरां गमनमिति। गमनस्यायुक्ततरत्वस्य प्रतिपादनाय प्रतिषेधप्रकर्षोऽयमस्तरपः प्रयोगः

=प्रकृतिद्योत्यार्थप्रकर्षे तरप्। गमने आरोपितत्वं च प्रकृतिद्योत्यं। फलं तु गमने ऽयुक्ततरत्वमतीतिः।१=

इको ह्रस्वोऽङ्यो गालवस्य प्रयोजनं ग्रामणिकुलं सेनानिकुलं उत्तरपद इति किमर्थं ग्रामणीः। सेनानीः नलोपः
प्रयोजनं नलोपो नञः अब्राह्मणः अवृषलः उत्तरपद इति किमर्थं परमन नैषोऽस्ति प्रयोगः इदं तर्हि नतरां
गमनं एकवच्च। एकवच्चालुग्भवतीति वक्तव्यं किं प्रयोजनं स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति विगृह्य स्तोका
न्मुक्त इत्येव यथा स्यात् एकवद्वचनमनर्थकं एकवद्भावस्यानर्थक्यं द्विबह्वोरलुक्त्वात् न भवति द्विबहुषु
समासः द्विवचनबहुवचनान्तानामसमासः किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते उक्तं वा किमुक्तं॥

अत्र तु समासस्याननुवृत्त्यापि नलोपः शक्यते प्राक्कर्तुं एकवच्चेति अस्यार्थो निर्देशोऽयं तेन द्वावर्थौ बहवश्चैकवत्समासे भवन्तीति स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति समासे कृ
ते स्तोकान्मुक्त इत्येव भवति द्विबह्वोरिति भावप्रत्ययमन्तरेणापि द्वित्वविषये द्विबहुशब्दौ द्वित्वबहुत्वयोर्वर्तेते यथा द्व्येकयोरिति॥ ॥ ॥

अनभिधानादिति समासस्त्व उपसर्जनार्थस्य द्वित्वबहुत्वानवगमादभेदैकत्वसंख्यायाएवोपसर्जनाद्विशेषपरित्यागात् संख्यासामान्यमभेदैकत्वसंख्योच्यते यथा सं
नमसे रूपमात्रमवधार्यतेनतु शुक्लकृष्णादिर्विशेषः एवं राजपुरुष इत्ययं संख्यावानर्थोऽन्नत्वकयार्थवदसंख्या इत्येतावानस्य प्रत्ययो भवति नतु संख्याविशेषप्रतिपत्तिः
अन्ये तु सर्वसंख्याविशेषाणामविभागो भेदैकत्वसंख्येत्याहुः । यथौषधिरसाः सन्नैवमधुन्यविभागेनावस्थिताएवमुपसर्जनार्थे संख्याविशेषाः कश्चित्तु वक्तावपि सं
ख्याविशेषावगमो यथा नावकीनइत्यादावादेशप्रयोगादेकत्वप्रतीतिः मासजातः शौर्पिकइत्यादौ प्रातिपदिकस्य विशिष्टार्थाभिधायित्वादेकत्वावगमः कुरङ्गोर

=विशेषादिरिक्तसामान्याभावादाहुः अन्ये तिवति ॥= ओष्ठ्येति नवकमनकादेकवचनमिति विहितात् शौर्पिकादौ अनियतसंख्यत्वेपरिच्छेदासंभवेनपरिच्छेदबोधकप्रयोगप्रामाण्येनैकत्वविशिष्टस्यैवोपसर्जनार्थस्यप्रतीतिरितिबोध्यं ॥=

अनभिधानादिति तच्चावश्यमनभिधानमाश्रयितव्यं एकवद्वचने हि गोर्चर इति प्रसंगः एकवद्वचने हि गोषुचर इति प्रसंगः
स्यात् गोषुचरः वर्षास्वप्सुजे वर्षास्वप्सुजे इति प्रसंगो भवति वर्षासुजः अपो योनियन्मतिषु चोपसंख्यानं । अपो यो
नियन्मतिषु चोपसंख्यानं कर्तव्यं जे चरे च योनि अप्सुयोनिः योनियत् । अप्सव्यः यतमति । अप्सुमतिः मतिजे अप्
सुजः जो चरे । अप्सुचरो गह्वरेष्ठा ॥ ॥ ॥

=प्रकरणेति यत्रप्रकरणादिनएकत्वावसायस्तत्रैवैकत्वसंख्यावच्छिन्नार्थाभिधायिनः प्रत्ययोभवतीत्यर्थः ॥= =अपोयोनीति मतुविति पाठः अप्सुमन्ताविमुदाहरणमिति निकाय्यः हरिदत्तमतिरिति पाठमाह ॥ युक्तं चैतत् एकवच्चेत्यस्यातिप्रसंगआजनात्रैव

दातिवनशः प्रविशतीत्यादौ प्रकरणादिवशादेकत्वावसायः स्तोकाभ्यां मुक्त इत्यादावपि तत्र्येत्तु भिविधानाद्वित्वबहुत्वावगमात्समासोऽस्तु नैतदस्ति प्रयुक्तानामन्वाख्यानम्
नचस्तोकाभ्यां मुक्त इति समासो लोके प्रयुज्यते तन्निबन्धनस्यैकत्वस्य प्रयोगस्याभावात् स्तोकाभ्यां मुक्त इत्यादावपादाने पञ्चमी न तु करणे च स्तोकाल्पेत्यनेन धर्ममात्रवाचित्वे
द्वित्वबहुत्वयोर्लेभत्वादित्याहुः गोचर इति गोशब्दो बहुवचनान्त एवापशब्दो दकएवाचक्स्तत्रैकवद्भावेसति गविचर इति प्राप्नोति । वर्षासुज इति वर्षाश
ब्दो बहुवचनान्त एव नतु विशेषवाचीनतु कृतु प्रचयापेक्षमत्र बहुत्वं । अप्सव्य इति । अप्सु साधुः तत्र साधुरिति यत् ॥ श्री ॥

पंचम्याः। अन्यार्थे इति। वृत्तिविषये च द्वितीयार्थे पंचमी वक्तव्येत्यर्थः। युक्त एवेति। आहूयमानां गोशंसने शंसिर्वेनेन इत्युपात्तविषयमेतदपादानं न यथा वृत्ताहकाद्विषो

ननेविद्युदिति निस्सरणां गोविद्योतने द्युतिर्वेनेन इति वल्लाहकोपादानं। आज्ञायि। अन्यार्थे इति। आत्मा पंचमोऽस्येत्यन्यार्थे आत्मना पंचम इत्यादि समयुज्यत इत्यर्थः। अ

=येन्द्रागविशेषमेव इत्यर्थः।२ =यद्येतस्य व्याख्यानमाह तेनादि।३= [redacted] विकृतास इति काविकल्पप्रयोगस्य वार्त्तिकं उपादानं। यद्युविवरणे विकृद्धि भावे कि...

पंचम्याः पंचमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानं। पंचमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानं कर्त्तव्यं। [redacted] ब्राह्मणाच्छंसी। अन्यार्थे च। अन्यार्थे चैषा पंचमी द्रष्टव्या। ब्राह्मणानि शंसतीति ब्राह्मणाच्छंसी। अथवा युक्त एवात्र पंचम्यर्थः। ब्राह्मणेभ्यो गृहीत्वाऽहृत्याहृत्य शंसतीति ब्राह्मणाच्छंसी। ओजः। तृतीयाया ओजस उपसंख्यानं। तृतीयाया ओजस उपसंख्यानं कर्त्तव्यं। ओजसा कृतं। पुंसानुजो जनुषांधो विकृताक्ष इति च। पुंसानुजो जनुषांधो विकृताक्ष इति चोपसंख्यानं कर्त्तव्यं। पुंसानुजः। जनुषांधः। विकृताक्षः। आज्ञायिनि च। आत्मनश्च पूरणे। आत्मनश्च पूरणे उपसंख्यानं कर्त्तव्यं॥ [redacted] आत्मनापंचमः॥ आत्मनादशमः। अन्यार्थे च। अन्यार्थे चैषा तृतीया द्रष्टव्या। आत्मा पंचमोऽस्य आत्मनापंचमः। आत्मनादशमः। अथ युक्त एवात्र तृतीयार्थः॥ ॥ ॥

=ननु पूर्वणार्थ... तृतीयासमास... यतुर्थी ... अथवचने इति।४= पुंसा हेतुना नुजः पश्चाज्जातः ... जनुषांधो ... नांधः।५=

उच्चवेति वक्तव्यं तेनात्मपंचम इत्यपि भवति। आत्मना कृतमिति। वृत्तिविषये प्रतीयमाना करोतिक्रिया कारकत्वनिमित्तं भवतीति हेतौ वा तृतीयाकाप्यो। अथवा दध्यो

दनादौ उपसेकादिवत् करोतिक्रियायामन्तर्भावात् करोतेरप्रयोगः। आत्मनापंचम इत्युक्ते आत्मनास्य कृतं पंचमत्वमिति संप्रत्ययात्॥ श्री ॥

आत्मा चतुर्थो स्येति। एकस्मैव वस्तुनो बुद्धिप्रकल्पितभेदस्य वर्तिपदार्थत्वमन्यपदार्थत्वं च न विरुध्यते। वैयाख्याकरणो भवेति। आरात् गयनादिम्प इत्यत्र। अत्र प क्षे आख्या शब्दः संज्ञापर्यायः। आत्मनेभाष परस्मैभाष शब्दौ च नकेषु चिद्व्याकरणेषु संज्ञात्वेन विनियुक्ताविति अलुकोऽप्रसंगः। अथ हीति। आख्या प्रतिपादनं व्यवहार इत्यर्थः [redacted]। आत्मनेपदिनश्च धातवो वैयाकरणौ [redacted]त्मनेभाष शब्देन व्यवह्रियंते परस्मैपदि

=अन्यभारद्वाजः स्मातः१=

आत्मनाकृतं तस्य तत्येनासौ पंचमः॥ कथं जनार्दनस्त्वात्मचतुर्थ एवेति। बहुव्रीहिरयं। आत्मा चतुर्थो स्येति। वैयाकरणाख्यायां परस्य च। आत्मनेभाष [redacted] परस्मैभाषयोः रूपसंख्या। नंकर्तव्यं। आत्मनेभाषां। परस्मैभाषां। तत्कथं कर्तव्यं। यद्विव्याकरणो भवावैयाकरणी वैयाकरणी आख्या वैयाकरणाख्या वैयाकरणाख्यायामिति। अथ हि वैयाकरणाँ वैयाकरणाख्यायामिति नार्थ उपसंख्यानेन। यद्यपि व्या नाभाख्यायां२ करणो भवा वैयाकरणी वैयाकरणी आख्या वैयाकरणाख्यायामि। एवमपि नार्थ उपसंख्यानेन। वचनाद्भविष्यति। अस्ति वचने प्रयोजनं। आत्मनेपदं परस्मैपदमिति। निपातनादेतत्सिद्धं। किं निपातनं। अनुदात्तङित आत्मनेपदं। शेषात्कर्तरि परस्मैपदमिति। हलदंतात्। हृद्युभ्यां डेः रूपसंख्यानं। हृद्युभ्यां डेः रूपसंख्यानं कर्तव्यं। हृदिस्पृक्। दिविस्पृक्। अन्यार्थे चैषा सप्तमी द्रष्टव्या। हृदयं स्पृशतीति हृदिस्पृक्॥ ॥

=असंज्ञातात्पासेवचनं१=

नः परस्मैभाष शब्देनैत्यलुक् सिद्धः। यद्यपीति। आत्मनेपद परस्मैपदशब्दयोर्निपातनादेवालुकः सिद्धत्वादाख्या शब्देन संव्यवहारमात्रमुच्यत इत्यर्थः। हलदंतात्। हृदयं स्पृशतीति। स्पर्शन क्रियायां हृदयस्य कर्मत्वं न त्वधिकरणत्वमिति वृत्तिविषये द्वितीयार्थे सप्तमी वक्तव्येत्यर्थः। पद्दन्नोमास हृन्निशि निजुष्टसो हृदयस्य हृदादेशः ॥ रा०म० १०८

१ दिविस्पृगित्येतन्नुभाषायामपि भवति॥ ॥श्री॥

=हृदयनिषद्धसंयोगाघनुक्तव्यापारत्वानितिप्रतीतिः१=

लुकोऽवादेश इति। ननु चावादेशं प्रत्यन्तरङ्गो लुक् बहिरङ्ग इति कुतो विप्रतिषेधः। अपि चान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्यवादेशेन न भाव्यं। एवं तर्ह्यन्तरङ्गाभावम
नपेक्ष्य विप्रतिषेध उच्यते। कृते चावादेशे अलुक्काभाव इति लुकः प्रवृत्तिः संदिग्धेति बाधकत्वमपि लुकः संदिग्धमिति विप्रतिषेधोपपत्तिः। अन्ये त्वाहुः। किं व्यक्तिपक्षा
श्रये। एतद्विषयत्वलक्षणस्याचरितार्थत्वात् भाविहलन्तत्वाश्रयेणालुका लुको बाधनादवादेशो लक्ष्यज्ञातिपक्षे सांप्रतिक हलन्तेषु सावकाशोऽलुगत्रानुपजा

=अपिचेत्यालुक्रेशोधपरिहरति। कृतेचेति। २= एतद्विषयेति। कृतावादेशगोशब्दविषयत्वेत्यर्थः। १= ×बहिरङ्ग×

द्विवृत्त्या प्रतीति द्विवस्त्वकू। हलदन्ताधिकारे गोरूपसंख्यानं। हलदन्ताधिकारे गोरूपसंख्यानं कर्त्तव्यं। गविष्ठिरः। न कर्त्तव्यं। लुकोऽवादेशो विप्रति
षेधेन। लुक् क्रियतामवादेश इति। अवादेशो भविष्यति विप्रतिषेधेन। अवादेशे कृते हलदन्तादित्येव सिद्धं। लुकोऽवादेशो विप्रतिषेधेनेति चेत् भू
मिपाशेऽतिप्रसंगः। लुकोऽवादेशो विप्रतिषेधेनेति चेत् भूमिपाशेऽतिप्रसंगो भवति। भूम्यां पाशो भूमिपाशः। अकोतर इति वा। तत्संध्यक्षरार्थं।
एवं तर्हि अविशेषेण सप्तम्या अलुकमुक्त्वा अकोऽतर इति वक्ष्यामि। तन्नियमार्थं भविष्यति। अकोऽतर एव भवति। नान्यत इति। तत्संध्यक्षरार्थं।
तेन संध्यक्षराणां सिद्धं भवति। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं। हलदन्ताधिकारे गोरूपसंख्यानमिति। नैष दोषः। नि
पातनात् सिद्धं। किं निपातनं। गविष्ठिरशब्दो बिदादिषु पठ्यते।। ।। ।।

=विरोधपरसर्थः तत्रविरोधेप्रसक्ते व्यक्तिपक्षाश्रयणेनपरत्वादवादेशप्रसक्तयः। १=

तन्निमित्तो नालं लुकं बाधितुमिति लुक् प्रवर्तते तामित्येवंविधो विप्रतिषेधः। जातौ पदार्थे दृषदि माषकादिषु सांप्रतिक हलन्तेष्वलुक् सावकाशो माविहलन्तत्वाश्रय
णो न शक्नोति लुकं बाधितुमन्तरङ्गाणां च विधीनां बाधको लुगिति मन्यमान आह। लुकइति। अत्रापि यणादेशे हलन्तत्वादलुक्प्रसंगः। अक इति। सप्तम्याः सं
ज्ञायामिति कृत्वा कोतर इति नियमार्थं कर्त्तव्यमित्यर्थः। तत्संध्यक्षरार्थमिति। संध्यक्षरान्तेभ्योऽलुगर्थमित्यर्थः।। ।। ।।

भा०कै०६ १०६ असङ्कुदिति नात्र विषयमेव निपातनमपि तु सर्वोर्थमिति दर्शयति। गवियुधि भ्यां स्थिरः। इससनेन समासे गविशब्दात्सरस्य सकारस्य षत्वं विदधत गविष्ठिरशब्दे समर्थ्या अलुकमप्यनुजानाति। कारः स्वामिग्राह्यो भागः। यदि संज्ञायामिति। संज्ञाग्रहणानुवृत्तेर्हेतोः टोपः कारे नियतद्रव्यो [redacted] नियतपरिमाणस्तस्य ग्रहणे न भावयस्तु सांप्रतिकः कारः केनचिद्देवोत्पादितस्तस्य ग्रहणाभावस्तत्र पूर्वेणानित्यलुकि प्राप्ते विभाषेयं संपद्यते अथ संज्ञाग्रहणं नानुवर्त्तते तदेवं विप्रतिषेधात् संज्ञायां नित्ये नालुकाभावान्तरासांप्रतिककारा भिधायिन्य प्राप्तो विभाषालुग्विधीयत इति पक्षो वतिष्ठते तस्मिंश्च पक्षे कारनाम्नीति नामशब्दो व्यपदेशमा

=ननु केनैव सिद्धत्वात्किं निपातनेनात्र कथनेनैतस्मात्कार्य्ये क्रियते संदेहनिराकरणेन द्वढीकरणायेत्याह·नास्तीति·८=नमिमिष्येति·संज्ञाग्रहणानुवृत्तावपि यामशस्यासंज्ञापर्यायत्वात्तत्रैव प्राप्तेः कथमप्राप्तविभाषालोपपत्तिरितिशं

असङ्कुत्त्वल्वपि निपातनं क्रियते। गवियुधि भ्यां स्थिरः इति। कारनाम्नि च प्राचां हलादौ। किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते कथं च प्राप्ते कथं चाप्राप्ते। यदि संज्ञायामिति वर्त्तते ततः प्राप्ते। अथ निवृत्तं ततोऽप्राप्ते कश्चात्र विशेषः कारनाम्नि वा वचनार्थं चेदजादावतिप्रसंगः कारनाम्नि वा वचनार्थं चेदजादावतिप्रसंगो भवति। इहापि प्राप्नोति। अविकटे उरणोऽस्यात्मजः अविकटोरणः॥ ॥ ॥

=इदानीं संज्ञायां नित्ये प्राप्ते कारनाम्नि विकल्पार्थत्वात्प्रत्याविसप्ते=

=देशविशेषवणपर्वे विसानर्थ्यादिकल्पोपपत्तिमाहाथवेति·१=ननु प्राचामित्याचार्यनिर्देशो देशविशेषणेऽप्यक्तं जंतन्निषिध्यतआहयदीति=ननु प्राचामित्यस्य देशविशेषणत्वान्नित्य एवायं विधिरिति विचारोपसंगत

त्राभिधायी। अविकटोरण इति। अवीनां संघातो विकटः संघाते कटच्। उरणो मेषः कारविशेषस्य रूढिरियमिति पूर्वेणालुक् प्राप्नोतीत्यर्थः। प्राचामिति चेत्तदुभयथा व्याख्यायते। प्राचामाचार्याणां मतेन हलादावुत्तरपदे कारनाम्न्यलुक् भवति नान्येषामिति विकल्पः संपद्यते व्यवस्थितविभाषा विज्ञायते तेन प्राग्देशे कारनाम्नि हलादौ नित्यमलुक् भवति। देशान्तरे तु कारनाम्नि लुगेव यूथपशुरिति। अथवा प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे अलुक् न तु देशान्तरे यूथपशुः इत्यादाविति सामर्थ्यात् देशभेदेन लुगलुकोर्व्यवस्थानादिकल्पः संपद्यते यूथपश्वादयउदक्देशे कारः। हलेति पदादिकादयः प्राग्देशे अविकटोरणादयः प्राग्देशेकेति ॥ ॥ राम० १०९

[redacted]

नन्वप्राप्ते संज्ञायामिति नानुवर्त्तत इत्याह

एतदेवेति। समासमंतरेणालुक्प्रसंगाभावाद्लुक्विधानादत्र समासोनुमीयत इत्यर्थः। अस्मिंस्थाने अविकटोरणः सांप्रतिककारइत्सम्युगमंयथे वस्तूयेथा णाद्यः अत्र हलादिग्रहणादजादिन्निवृत्त्यर्थादजादावपि समासानुमानं। यद्यपीति। यथा परमेकारके परमकारक इत्यत्र पूर्वपदप्रकृतिस्वरेण न भवतिलाभ

=अस्मिन्निति अस्यां स्थितौ एवमंगीकारे सांप्रतिकानामेवोदाहरणतांगीकारादर्शितियावत्। =नन्वेवमविकटोरणे संज्ञालाभार्थं लुगनुकाष्ठोवेवस्तभा

=सांप्रतिककारे स्वरूपेणणादवसंज्ञालाभार्थं णप्राप्ते विधानार्थतादस्य। =

अस्त्वनतद्यप्राप्ते। अप्राप्ते समासविधानं। यद्यप्राप्ते समासो विधेयः प्राप्ते पुनः सति संज्ञायामिति वसमासः सि द्धः। नैषदोषः। एतदेव ज्ञापयति भवस्तत्र समास इति। यदयं कारनाम्रिसप्तम्या अलुकं शास्ति। यद्यपि तावत् ज्ञापका त्समासः स्यात्स्वरस्तु न सिध्यति। यद्धि तत्सप्तमी पूर्वपदं प्रकृतिस्वरं भवतीति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्त स्यैसेवं ततो। नैवात्रानेन स्वरेण भवितव्यं किंतु सप्तमी हारिणौ धर्म्ये हरण इत्यनेनात्र स्वरेण भवितव्यं। किंच भोंस ज्ञा अपि वै ग्राह्ये क्रियंते नलोकः संज्ञा सु प्रमाणं॥ ॥ श्री ॥

=संज्ञाग्रहणानुवृत्तो संज्ञायामिति समासे स्वरूपेणाण दिषु संज्ञात्वंशास्त्र समधिगम्यं नदन नुवृत्तौ=

=सप्तमीहारिणौ विसत्रतुल्लक्षणप्रतिपदोक्तपरिभाषाया अप्रामाण्यान्नप्रवर्तत इत्याशयः। २=

णि कृत्वात्सप्तमीसमासस्य एवं स्तूपे शाणणादावपि पूर्वपदप्रकृतिस्वराप्राप्तिः। इतरो यद्यपि संज्ञायामिति प्रतिपदोक्तः सप्तमीसमासो विधीयते तथापि स्वरांतरे णैवात्र भाव्यमित्याह। नैवात्रेति। पूर्वपदाद्युदात्तत्वेन भाव्यमित्यर्थः। एवं स्थिते निर्णीतुमाह। [redacted] किंच लाभो इति। अयमर्थः। संज्ञाग्रहणानुवृत्तौ स्तूपे शाणाद

ऽयोः रूढाः तन्निवृत्तौ नरूढाः इत्येतन्निक्रियते एकस्य रूढित्वविरोधात्॥ ॥

तारूढि

लोके चेति। टाप्‌ वल्प्‌ पे शाशादयस्ते चिरंतनाः सांप्रतिकाम्भवंत्वित्यर्थः। संज्ञाग्रहणानुवृत्त्यैव सिद्धे पर्यो नामग्रहणं विस्पष्टार्थं एवं हि स्फुटा प्राप्ते विभाषा भवत्यन्यथा
संज्ञाग्रहणानुवृत्तिः संदिह्येत कार नाम्नि प्राचामिति प्राचामेव कारनाम्नीति नियमाउदीचां कारे ऽविकरणोः लुङ्‌ निवर्त्यते प्राचामपि कारे ऽविकटोरणे हलादि

=नामसंज्ञयोरनयोः पर्यायत्वादिति भावः१= =इत्यनुपलक्षणं पृथक्प्राप्तादुदीचां कारनाम्न्येवेति बोध्यं२=

[redacted] लोके च कारनाम संज्ञा। ननु चोक्तं कारनाम्नि वा वचनार्थं चेदजादित्वप्रसंग इति। नैष दोषः। यो
गविभागात्सिद्धं। योगविभागः करिष्यते। कारनाम्नि च प्राचां। ततो हलादौ च कारनाम्नि सप्तम्या अलुग्भवति। इदमिदानीं किमर्थं ×हलादौ×
नियमार्थं। हलादावेव कारनाम्नि सप्तम्या अलुग्भवति नान्यत्र। ह्ममाभूत्‌। अविकटे उरणो दातव्यः अविकटोरणः। मध्या दु
रौ। गुरावंतात्‌ चेति वक्तव्यं। अंते गुरुः। वंधे च। स्वांगग्रहणमनुवर्त्तते उताहो न। किंचातः यद्यनुवर्त्तते सिद्धं हस्ते बंधः हस्तबंधः
चक्रे बंधः चक्रबंध इति न सिद्ध्यति। अथ निवृत्तं सिद्धं चक्रे बंधः चक्रबंधः हस्ते बंधः हस्तबंध इति न सिद्ध्यति। किं कारणं ने
१ न सिद्ध्यति षष्ठीति प्रतिषेधः प्राप्नोति। नैष दोषः॥ ॥ ॥

विसत्ने न द्वितीयेन नियमेनालुग्निवृत्तिः वंधे च। नेन्‌ सिद्धेति निषेधस्यास्य च विकल्पस्य विषयविभागज्ञानायोपन्यस्यति। स्वांगग्रहणमिति। स्वांगग्रहणेऽनुवर्त्तमा
नेस्वांगादुत्तरस्याः सप्तम्याः अलुको विकल्पः अन्यस्मात्तु तत्र निषेध इति विषयविभागसिद्धिः। अथ निवृत्तमिति। न हि विकल्पनिषेधयोर्विषयविभागाविज्ञानाद्यथे
१ष्ट सिद्ध्यभावः॥ ॥ ॥

सर्वत्रेति। चकारं वं धनमित्यादौ सर्वत्रव ध्नाति धात्वोर्वा उत्तरपदे लुक्प्रतिषेधः। अत्र च तु समस्तेनैवं बध्यते घञन्त उपात्तो न तु मात्रनिर्देश इत्यर्थः। तत्पुरुषे। बहुलवचनादिति।
अकृत्स्नत्वाद् लुगिति विज्ञेयं यायोऽप्यत्राप्तिः संगतं गाकं दन्तवाच्य क्रिया निमित्तं समग्रमीग्ध्यते इह तु क्रियान्तरनिमित्तापरमेकारके निधेहीति बहिरङ्गेति न प्रत्यन्ते। अकृत्स्न
त्वादिति। अकृत्स्नकारित्वादित्यर्थः। नहि बहुलग्रहणमात्राल्लुगलुकोर्विषयविभागनिश्चयः इतरत्त्वपि शेषेऽलमकृत्स्नत्वं मन्यमान आह। यथाकृत्स्नमिति। कृत्स्नं चे

=अज्ञापकत्वमित्यर्थः।१=

सर्वत्रैवोत्तरपदाधिकारे तत्पुरुषे कृति बहुलमिति प्राप्नोति नेन सिद्धबध्नातिष्विति प्रतिषेध उच्यते तस्मिन्नित्यप्राप्ते इयं विभाषा आरभ्यते। एवमपि
न ज्ञायते कस्मिन्विषये विभाषा कस्मिन्विषये प्रतिषेध इति। घञन्ते तस्येदं बंधशब्दस्य ग्रहणं प्रतिषेधे घुच धातुग्रहणं। तेन घञन्ते विभाषा अन्यत्र
प्रतिषेधः। तत्पुरुषे। तत्पुरुषे कृति बहुलमकर्मधारये तत्पुरुषे कृति बहुलमित्यत्राकर्मधारय इति वक्तव्यं। इह माभूत्। परमे कारके परमका
रक इति। तत्तर्हि वक्तव्यं न वक्तव्यं। बहुलवचनादत्र भविष्यति। अथ किमर्थं लुगलुगनुक्रमणं क्रियते न तत्पुरुषे कृति बहुलमित्येव सिद्धं।
लुगलुगनुक्रमणं बहुलवचनस्याकृत्स्नत्वात्। लुगलुगनुक्रमणं क्रियते अकृत्स्नं बहुलवचनमिति। यथा कृत्स्नं यदनेन कृतमकृतं तत्।
एवं तर्हि न ब्रूमः अकृत्स्नमिति। कृत्स्नं च कारकं च साधकं च निर्वर्तकं च यदनेन कृतं सुकृतं तत्॥ ॥ ॥

ति। एतावत्युक्ते अवयवसाकल्यमपि काम्यं गम्यत इत्याह कारकं चेति। कृत्स्नकारित्वात् [redacted] त्स्नमित्यर्थः। कारकमपि प्रारब्धस्य
नागमनात्वतिबंधसद्भावात् अकृत्स्नं स्यादित्याह साधकं चेति। साधकमपि कदाचिदसामर्थ्यादकृत्स्नं स्यादित्याह। निर्वर्तकं चेति। सर्वदा सर्वकार्यनिष्पादयतीत्यर्थः॥
१ उदाहरणभूयस्त्वादिति। भूयांस्तूदाहरणप्रपंचेन ज्ञायंत इत्यर्थः॥ ॥ ॥

=अनेकपर्यायोपादानोपयोगमाह। एतावतीति। यथाकृत्स्नोऽयं पटः इत्युक्ते सर्वावयवपूर्णो न तु केनचिदवयवेनन्यून इति गम्यते न तु कार्यविषयं साकल्यं [redacted] एवमत्रापि पवगन्तं साकल्यं प्रतीयेत तन्निरासार्थमित्यर्थः।२=अंतरागमने हेतुः प्रति
=साधकमित्यस्य आरब्धकार्यं निष्पन्निपर्यन्तं साधयतीत्यर्थः। कदाचित्सामर्थ्यादिति। यथा शरदा ब्रीह्यादीनां पुष्पफलादिरूपकार्यनिष्पादकत्वं।२=

भा०कै०६ लक्षणमिति। सामान्यलक्षणं बहुलग्रहणादियुक्तं विषयविभागस्याप्रतिपादकत्वान्न तथाकारकं प्रपंचोपादानं तत्प्रसंगाच्चाकारक इति मध्यमावस्थाश्रीयत इत्यर्थः। अवश्यं
१११ खल्विति। प्रातिशाख्यसद्भावेपि सर्ववेदसाधारणेनानेन शास्त्रेणैतत्प्रतिपादनं क्रियते तच्च प्रतिपदपाठस्याशक्यत्वाद्बहुलादिग्रहणेन कर्त्तव्यमित्यर्थः। सर्ववेदपारिषदमिति। अ
ध्येतृसंघः परिषत्तत्र भवं पारिषदं सर्वेषां वेदानां पारिषदमिति षष्ठीसमासः। नैक इति। वेदेषु वैचित्र्येण व्यवहाराज्जदंगे व्याकरणेपि तथैव बहुलादिशब्दैर्न व्यवहारः। तेनै

किमर्थं तर्हि लुगलुगनुक्रमणं क्रियते। उदाहरणभूयस्त्वात्। तेभ्यः खल्वपि विधयः सुपरिगृहीता भवंति। येषां लक्षणं प्रपंचश्च। केवलं लक्षणं
प्रपंचो वा न तथाकारकं भवति। अवश्यं खल्वप्यस्माभिरिदं वक्तव्यं बहुलमन्यतरस्यामुभयथैकेषामिति। सर्ववेदपारिषदं हीदं शास्त्रं तत्र नै
कः पंथाः शक्य आस्थातुं॥ षष्ठ्या आक्रोशे॥ षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदंडहरेषूपसंख्यानं षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो
युक्तिदंडहरेषूपसंख्यानं कर्त्तव्यं। वाचोयुक्तिः दिशोदंडः पश्यतोहरः॥ आमुष्यायणामुष्यपुत्रिका॥ आमुष्यायणामुष्यपुत्रिके
षूपसंख्यानं कर्त्तव्यं। आमुष्यायणः। आमुष्यपुत्रिका। आमुष्यकुलिकेति वक्तव्यं। आमुष्यकुलिका। देवानांप्रिय इति च। उपसंख्यानं
कर्त्तव्यं। देवानांप्रियः। शेपपुच्छलांगूलेषु शुनः संज्ञायामुपसंख्यानं। शेपपुच्छलांगूलेषु शुनः संज्ञायामुपसंख्यानं कर्त्तव्यं। शुनःशेपः
८॥ शुनःपुच्छः। शुनोलांगूलः। दिवश्च दासे उपसंख्यानं कर्त्तव्यं। दिवोदासाय गायत॥ ॥

तन्नचोदनीयं वाग्रहणमेव क्रियतां व्यवस्थितविभाषा वाश्रीयतां किं बहुलग्रहणेनेति। षष्ठ्या आक्रोशे पश्यतोहर इति। षष्ठी चानादर इति षष्ठी पश्यंतमनादृत्य राम०
हरतीत्यर्थः। शुनःशेप इति। अविविशेषसंज्ञेयमकारांतोप्यस्ति शेपशब्दो न केवलं सकारांतः शुनःशेपोस्येति बहुव्रीहिः॥ ॥श्री॥ ॥ १११

ऋतो तत्पूर्वपदोत्तरपदग्रहणमिति। अन्यनिवृत्तिपरत्वादस्य व्यतिकरेपि कार्यप्रवृत्तिः। आनङ् द्वंद्वमिति। कार्यार्थः अनुवृत्त्यर्थो वा वर्णानामुपदेश इति मत्वाप्र

=तत्पूर्वपदोत्तरपदग्रहणे होतुःपुत्र [illegible] तेन वितथ [illegible] ॥१॥

ऋतो विद्यायोनि। विद्यायोनिसंबंधेभ्यस्तत्पूर्वपदोत्तरपदग्रहणं। विद्यायोनिसंबंधेभ्यस्तत्पूर्वपदोत्तरपदग्रहणं कर्त्तव्यं। विद्यासंबंधेभ्यो विद्यासंबंधेषु यथा स्यात्। योनिसंबंधेभ्यो योनिसंबंधेषु यथा स्यात्। व्यतिकरो माभूत्। अपि पूर्वे व्यतिकरे न भवितव्यं। वाढं भवितव्यं। होतुःपुत्रः पितुरंतेवासी। आन। कार्यनकारः श्रूयते न क्वचिच्छ्रूयते लोपोऽस्य भवति नलोपः प्रातिपदिकांतस्येति। यदि न क्वचिच्छ्रूयते किमर्थमुच्चार्यते रपरत्वं माभूदिति। क्रियमाणेपि वै नकारे रपरत्वं प्राप्नोति। किं कारणं। नलोपे कृते एषोऽपि हि उःस्थाने अण् शिष्यते। नैष दोषः। उःस्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते न चायं उःस्थाने अण् शिष्यते किं तर्हि अण् चानेकं पुनरिदं विज्ञायते ऋकारांतानां एव यो द्वंद्व इति आहोस्विद् द्वंद्वे ऋकारांतस्येति। कश्चात्र विशेषः। ऋकारांतानां द्वंद्वे पुत्र उपसंख्यानं कर्त्तव्यं। पिता पुत्रौ। कार्यी चानिर्दिष्टः। कार्यी चानिर्दिष्टो भवति। ऋकारांतानां द्वंद्वे न ज्ञायते कस्यानङ् भवितव्यमिति। अस्तु तर्हि द्वंद्वे ऋकारांतस्येति। अविशेषेण पितृपितामहादिष्वतिप्रसंगः। अविशेषेण पितृपितामहादिष्वतिप्रसंगो भवति। पितृपितामहाविति। अस्तु तर्हि ऋकारांतानां यो द्वंद्व इति। ननु चोक्तं ऋकारांतानां द्वंद्वे पुत्र उपसंख्यानमिति॥ ॥ ॥

अनः॥ क्रियमाणेपीति। उःस्थाने यः कृतो अण् रपर इति तज्ज्ञार्थं मन्यते इतरः स्थानग्रहणाद्यावत्स्थानेन [illegible] नैष दोष इति॥ ॥श्री॥ ॥श्री॥

 [redacted] पुत्रे पीति। अनाक्रोशेपि भ्रातुः पुत्रादावित्यभिप्रायः॥ संबंधमिति। आक्रोशग्रहणे न संबंधात् संबंध्यं तेरण पुत्रशब्दो न संबध्यते तन्निवृत्तौ तु संबध्य

 =प्रबालन्यपितीतिन्नेचोभयोरपि चादितार्थमासवत्वेनतस्मादिपुत्रवत्स्मेसेवमकात्मकं स्मादितिवाक्यं उत्तरपदस्याधिकारे एनाश्रमस्थितेन सामानाधिकरण्यानुनेधात्वनम्यारुवमकात्मकार्यमित्सायापात्र् ८=

नैष दोषः। पुत्रग्रहणमपि प्रकृतमनुवर्त्तते। क्व प्रकृतं। पुत्रेऽन्यतरस्यामिति। यदि तदनुवर्त्तते विभाषा स्वसृपत्योः पुत्रे चेति पुत्रेपि विभाषा

प्राप्नोति नैष दोषः। संबंधमनुवर्त्तिष्यते। षष्ठ्या आक्रोशे पुत्रेऽन्यतरस्यां। षष्ठ्या आक्रोशे कृतो विद्यायोनिसंबंधेभ्यः पुत्रेऽन्यतरस्यां

षष्ठ्या आक्रोशे विभाषा स्वसृपत्योः पुत्रे। अन्यतरस्यां षष्ठ्या आक्रोशे। आनङृतो द्वंद्वे पुत्रग्रहणमनुवर्त्तते षष्ठ्या आक्रोश इति

निवृत्तं। परत्पुच्यते कार्यी चानिर्दिष्ट इति। कार्यी चनिर्दिष्टः। कथं। उत्तरपद इति वर्त्तते। द्विश्चायं क्रियते। सोऽन्तरेणापि कार्यि निर्देशं

ऋकारस्यैव भविष्यति। पुत्रे तर्हि कार्यी अनिर्दिष्टः। पुत्रे चकार्यी निर्दिष्टः। कथं। ऋकारग्रहणमपि प्रकृतमनुवर्त्तते। क्व प्रकृतं।

निर्दिष्टषष्ठी२ ऋतो विद्यायोनिसंबंधेभ्य इति। न दैपंचमी निर्दिष्टेन चेहार्थः पुत्र इत्येषा सप्तमी ऋत इति पंचम्यां षष्ठी प्रकल्पयिष्यति। तस्मिन्निति निर्दि

ष्टे पूर्वस्येति। देवता देवताद्वंद्वे उभयत्रवायोः प्रतिषेधः। देवताद्वंद्वे उभयत्रवायोः प्रतिषेधो वक्तव्यः। अग्निवायू। वाय्वग्नी। ब्रह्मप्रजा

पत्यादीनां च। ब्रह्मप्रजापत्यादीनां च प्रतिषेधो वक्तव्यः। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कंदविशाखौ। एतर्हि वक्तव्यः द्वंद्व इति

ऽवर्त्तमाने पुनर्द्वंद्वग्रहणस्यैतत्प्रयोजनं लोकवेदयोर्यो द्वंद्वः तत्र यथा स्यात्॥ ॥

वक्तव्यः॥न२

तइत्यर्थः। देवता उभयत्रेति। पूर्वपदत्वे उत्तरपदत्वे चेत्यर्थः॥ ॥ श्री॥ ॥श्री॥ ॥ श्री॥ ॥

लोकवेदयोः॥ इति। साहचर्येण यो लोकवेदयोः प्रसिद्धो द्वन्द्वसमासस्तद्वाच्यौ न त्वानडित्यर्थः। सह निर्वापः सहदानं। मातरापूर्वोत्तरपदयोरिति। सत्र प्यंतमेतत्तत्र मातरपितराविति पत्र पूर्वे
परस्यारशब्दो॰ तादेशो निपात्यते उत्तरपदस्य तु त्वं लोपः। सर्वनामस्थानयोरिति गुणोरपरत्वं च। पितरामातरेत्यत्र पूर्वपदस्याराशब्दो तस्य निपातनं समासानुपरस्य प्रथमाद्विवचन

कस्मात्लोकवेदयोर्द्वन्द्वः। वेदे ये सह निर्वापनिर्दिष्टाः न चैते वेदे सह निर्वापनिर्दिष्टाः। इद्वृद्धौ। इद्वृद्धौ विष्णोः प्रतिषेधः।
इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः। आग्नावैष्णवं चरुं निर्वपेत्। मातरपितरावुदीचां। पितरामातरा च छन्दसि। किं
निपात्यते। पूर्वोत्तरपदयोररेकारस्याराशौ। मातरपितरौ भोजय। मातरपितरावानय। आ मा गन्तां पितरा
मातरा चा मा सोमो अमृतत्वाय गम्यात्॥ ॥इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये
९ षष्ठाध्यायस्य तृतीये पादे प्रथमाह्निकम्॥ ॥

पं॰ ७ स्यस्तु लुगित्याकारः पूर्ववत् गुणरपरत्वे॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठाध्यायस्य तृतीये पादे प्रथमाह्निकम्॥ ॥श्री॥
(९ ॥श्री॥ ॥श्री॥ ॥ ॥७॥

भा०कै०६ ११३

बा०

स्त्रियाः पुंवत्। कथमिति। भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते तल्लक्षणे स भाषितपुंस्क इति प्रवृत्तिनिमित्तस्यान्यपदार्थस्याश्रयणे तद्योगाच्च शब्दस्यापि भाषितपुंस्कत्व
विज्ञाने समानायामाकृतावित्यर्थो लभ्यते। प्रत्यासत्तेश्च यस्य शब्दस्य पुंवद्भावो विधीयते तेनैव पुमान् भाषित इति गृह्यते। भाषितपुंस्कग्रहणसामर्थ्याच्च शब्दान्तरेणा
सर्वस्यार्थस्य भाषितपुंस्कत्वादन्तेनार्थे शब्देनापीति व्यवच्छेद्याभावादनर्थकं भाषितपुंस्कग्रहणं स्यात्। यदा तु भाषितः पुमान् येन शब्देन स भाषितपुंस्क इति
शब्दोऽन्यपदार्थ आश्रीयते तदा समानायामाकृतावित्यस्य विशेषस्य नास्ति लाभः। गर्भिभार्य इति। स्त्रिया वर्तमानस्य गर्भिण्या नवयवभूतगर्भसंबन्धः प्रवृ श६०

=तन्नेवं चरटाभार्य इत्यादौ हंसभार्य इत्यादिगाशब्दान्तरेण पुंसोऽभिधानेऽपि स्यादत आह॥ प्रत्यासत्तेश्चेति॥२॥ =अर्थशब्देनापीति॥ अर्थशब्दः सामान्यशब्दोऽपि यदा स्ववृत्तादिवितक्रमसामान्यावर्तन्ते वर्तन्ते तदा समानं प्रवृत्तिनिमित्तमित्याशयः॥२॥=

स्त्रियाः भाषितपुंस्कादिति कथमिदं विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमाहोस्वित् क्वचिद्यद्भाषितपुंस्कमिति। किं चातः यदि
विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमिति। गर्भिभार्यः प्रसूतभार्यः अत्र न प्राप्नोति। अथ विज्ञायते क्वचिद्यद्भाषितपुंस्कमि
ति द्रोणीभार्यः कुटीभार्यः पात्रीभार्यः। अत्रापि प्राप्नोति। अस्तु तर्हि समानायामाकृतौ यद्भाषितपुंस्कमिति। कथं तर्हि गर्भिभार्यः
१ प्रसूतभार्यः प्रजातभार्य इति॥ ॥ ॥

=अर्थभेदेऽप्याह भेद इति नये आर्थ॰ तन्नेदे पिशाद्धे को द्वितीयं॰ तत्वेलादेक्ते देवेदं रजतमिति प्रत्यभिज्ञानवदित्यर्थः॥२॥=

=ज्वालासु सैवेयं ज्वालेति प्रत्यभिज्ञानवदित्यर्थः॥२॥=

त्तिनिमित्तं गर्भी व्रीहिरित्यादौ तु पुंसि वर्तमानस्यावयवभूतगर्भसंबन्धः इति समानाकृतित्वाभावः। प्रसूतप्रजातशब्दौ स्त्रियां वर्तमानौ गर्भविमोचनं प्रवृत्तिनि
मित्तमाश्रयतः पुंसि तु गर्भाधानमिति समानाकृतित्वाभावः। द्रोणीभार्य इति। द्रोणशब्दः परिमाणवृत्तिर्भाषितपुंस्कः स एव च सोऽदृष्टनिबंधनप्रत्यभिज्ञानवशा
त्तत्त्वनिबंधनप्रत्यभिज्ञानवशाच्च अभेदेनावसीयमानो गवादिष्विव जातिरिति नास्ति समानाकृतित्वमेवं कुटशब्दोऽघटे भाषितपुंस्को गेहे स्त्रीलिंगः पात्रशब्दोऽपु एम० ११३
१ चादित्वात् भाषितपुंस्को भाजनविशेषे स्त्रीलिंगः॥ ॥ ॥

कर्तृभ्यो ऽत्रयत्न इति। गर्भिणीशब्दस्य गर्भसंबंधः प्रवृत्तिनिमित्तं पुंसि स्त्रियां च समानम् अंतरभेदस्तु विवक्षितः प्रसूतप्रजातशब्दयोरपत्यापत्यवत्संबंधः समानं
प्रवृत्तिनिमित्तमस्तीति दोषाभावः। एष्य गोति। एष्य कृत्प्रतिषेधः प्रतिषेधांतराद्वैलक्षण्यं पस्तूचयतीत्यर्थः। अपवादानायमिति। स सामेवानुवृत्तौ पर्युदासः स्यात् श्री

=णाभाव इति। इत्युपलक्षणं। गर्भिणीपुंवद्भावः प्रसूतं अश्वेति मांधातः पितावि राजविशेषे प्रसिद्धता प्रपवशात्म्यानवयवत्वतगर्भसंबंधो गर्भविमोचनं च प्रवृत्तिनिमित्तम् प्रस्तेति सिद्धांताभावस्याविवक्षां विनापुन्नयनात् एतेन शब्दार्थसंबंधस्य

कर्तृभ्यो ऽत्रयत्नः। अथ किमर्थं सूत्रः एष कृत्प्रतिषेध उच्यते न यत्रैवान्यः प्रतिषेधः तत्रैवायमप्युच्येत तं न कोपधाया इत्युक्ता
ततउ३. सूत्रे सेवोच्येत तत्रायमप्यर्थः द्विः प्रतिषेधो न वक्तव्यो भवति। नैवं शक्यं। पठिष्यति ह्याचार्यः पुंवत्कर्मधारये प्रतिषेधार्थमि
ति। स पुंवद्भावो यथेह भवति कारिकावृंदारिका कारकवृंदारिका एवमिहापि स्यात्। ब्रह्मबंधूवृंदारिका ब्रह्मबंधूवृंदारिकेति॥ अथ एष
कृत्प्रतिषेधे विषयस्मादेवस प्रतिषिद्धार्थः आरंभः कस्मादेवाच न भवति। एष कृत्प्रतिषेध वचनसामर्थ्यात्॥ अपवादः सूत्रे. तितत्रा
नुवर्तिष्यते॥ अपवादानायं प्रसज्यप्रतिषेधः किं तर्हि पर्युदासो ऽयं पदस्य ३.३ इति॥ स च प्रतिषेधार्थे आरंभः॥ ॥

=पूर्वस्मिन्पक्षे ऽनुवृत्तिः प्रसज्यप्रतिषेधस्तु अनुवृत्तिः पर्युदासस्येति। तेनास्मिन्पक्षे ब्रह्मबंधूवृंदारिकेत्यत्र न दोषः।१२=

यत्तेन प्रसज्यप्रतिषेध इति पूर्वस्मात्पक्षादस्य पक्षस्य भेदं भाष्यकारेणात्रानूद्य महाराष्ट्रेवान्तरत्रानुवृत्तिर्दर्शिता न त्वप्ररणी प्रियादिषु इत्यस्य ते न महानवमी महाद्वादशी
(१ त्वाद्विपि पुंवत्भावो भवति॥ ॥ ॥

किंपुनरिति। यदा स्त्रीग्रहणं स्वर्यते तदा स्त्रीति तेनाधिकारगतिर्भवतीति स्त्र्यधिकारविहितटाबादिग्रहणं भवति तेन भाषितपुंस्कादनन्तरस्मान्नूङः स्त्रीप्रत्ययस्य पुंवद्भवतीति समानाधिकरणार्थः संपद्यते। यदा तु स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं भवति यदा तु स्त्रीत्वयुक्तं वस्तु स्त्रीशब्देनोच्यते तदार्थग्रहणं भवति तत्रा

किं पुनरिदं पुंवद्भावे स्त्रीप्रत्ययग्रहणं उत स्त्रीशब्दस्य ग्रहणं आहोस्वित् स्त्र्यर्थस्य ग्रहणं। कश्चात्र विशेषः। पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणं चेत् तत्र पुंवद्रित्युत्तरपदे तत्प्रतिषेधविज्ञानं॥ पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणं चेत्तत्र पुंवद्रित्युत्तरपदे तत्प्रतिषेधोऽयं विज्ञायेत। कस्य स्त्रीप्रत्ययस्य किमुच्यते स्त्रीप्रत्ययस्य प्रतिषेध इति न पुनरन्यदपि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरणउत्तरपदे भाषितपुंस्कस्यातिदिश्येत॥ [redacted]। अनारंभात्तु सिद्धं। न किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यातिदिश्येत। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः स्त्रीप्रत्ययप्रतिषेधात्॥ ॥ श्री॥

र्थग्रहणे स्त्रीशब्दोऽमुख्यः। अर्थस्य तूत्तरपदेन पौर्वापर्यानुपपत्तिः शब्दग्रहणे तु स्त्रीशब्दो गौणः उत्तरपदेन तु शब्दस्य पौर्वापर्योपपत्तिः॥ ॥ श्री ॥ राम०
११४

१ ॥श्री॥ ॥श्री॥ ॥७॥

कथं पुनरिति। पुंवदित्यनेनेन प्रतिषेधेन प्रत्याप्यत इति मत्वा प्रश्नः। वृत्तिनिर्देशोयमिति। उपमानोपमेयभावविषयो वृत्तिस्तत्रोपमाने सत्ताँ वा प्रसिद्धोपमेये प्रतिपाद्यत इति यथासंभवं वा कार्यशेषपरिकल्पनेकामचार इत्यर्थः। पुंसि च स्त्रीप्रत्ययस्याभावात् स्त्रियामभावो ऽतिदिश्यते इति न भवतीति वा कार्यशेषः कल्प्यते ऽस्मिन्पक्षे यद्वक्तव्यं तदाह। प्रातिपदिकस्य चेति चशब्दो वक्ष्यमाणापेक्षः। एनीभार्येति। एतशब्दाद्वर्णादनुदात्तात्तोपधात्तो नः इति ङीप्नकारस्य चनकारस्तत्रैकदे

कथं पुंवदित्यनेन स्त्रीप्रत्ययस्य प्रतिषेधः शक्यो विज्ञातुं। वृत्तिनिर्देशोयं। [redacted]। कामचारश्च वृत्तिनिर्देशे वा कार्यशेषं समर्थयितुं। तद्यथा उशीनरवन्मद्रेषु यवाः संतिन संतीति। मातृवदस्याः कलाः संतिन संतीति। एवमिहापि पुंवन्न भवति इत्येवं वा कार्यशेषं समर्थयिष्यामहे यथा पुंसः स्त्रीप्रत्ययो न भवति एवं समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यापि न भवतीति। प्रातिपदिकस्य च प्रत्यापत्तिः। प्रातिपदिकस्य च प्रत्यापत्तिर्वक्तव्या। एनीभार्या ऽस्य स एतभार्यः। श्येनीभार्या ऽस्य स श्येतभार्यः। पुंवद्भावेन किं क्रियते स्त्रीप्रत्ययस्य निवृत्तिः। स्त्र्यर्थो ऽनिवृत्तः। स्त्रीत्वं। तस्यानिवृत्तत्वात् केनन शब्देन श्रूयते। स्त्रियामित्युच्यमानः प्राप्नोति। स्थानिवत्प्रसंगश्च। स्थानिवद्भावश्च प्राप्नोति। पट्वीभार्या ऽस्य स पटुभार्यः। पुंवद्भावेन किं क्रियते स्त्रीप्रत्ययस्य निवृत्तिः। तस्य स्थानिवद्भावाद्यणादेशः प्राप्नोति। किमर्थमिदमुभयमुच्यते॥ ॥ ॥

=नवनकारस्य स्थानिकार्यमिति। तस्यकारस्य नुस्वभावेनैव निवृत्तिः। तस्यमाषितपुंस्कात्तरलाभावादिलायमात् १=

शक्तिवल्लक्तमनन्यवदितिभाषितपुंस्कादेनशब्दात्परईकार इति तन्निवृत्तावर्थस्यानिवृत्तत्वान्नकारश्रवणप्रसंगः। ननु च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारस्यापि निवृत्तिर्भविष्यति। एवं तर्हि स्थानिवद्भावात्पुनर्नकारस्यानुवृत्तिं मन्यते उत्तरपदनिमित्तत्वाच्च स्त्रीप्रत्ययनिवृत्तेः स्थानिवद्भावः॥ ॥ ॥

भा०कै०६
११५

स्थानिवद्भावोऽपि चोदितः स्यादिति। ननु च प्रातिपदिकस्य प्रत्यापत्तिरिति परिहारः स्थानिवत्प्रसंगश्चेत्तिचोद्यं तत्रैवं वक्तव्यं स्थानिवद्भावोऽपि परिहृतः स्यादिति। नैष दोषः। अयं हि भाष्यार्थोऽयथादोषसद्भावात् प्रत्यापत्तिवचनेन परिहारस्तया स्थानिवद्भावोऽपि चोदितः परिहृतश्च भवति। पुरस्तादिदमिति। यद्यपि पश्चात्स्थितं तथापि पाठक्रमो बलवानिति पूर्वं दृष्टमित्युच्यते पूर्वं चोद्यदर्शनं पश्चात्समाधानमिति न्यायात् तत्स्थितमिति। पुरस्तादपि दृष्टं पश्चात्स्थितमित्यर्थः प्र

क्रमादर्थः१

=पठितमित्यत्र पुरस्तादितिना नुवंजनीयमिति भाव:१=

न प्रातिपदिकस्य प्रत्यापत्तिरित्येव स्थानिवद्भावोऽपि चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं स्थानिवत्प्रसंगश्चेत्तित्तस्थितं। ततउत्तरकालमिदं दृष्टं प्रातिपदिकस्य प्रत्यापत्तिरिति। तदपि पठितं। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयंति। वतंड्यादिषु पुंवद्वचनं। वतंड्यादिषु पुंवद्भावो वक्तव्यः। के पुनर्वतंड्यादयः। लुगलुगस्त्रीविषयद्विस्त्रीप्रत्ययाः। लुक्। गार्ग्योवृंदारिकाः गर्गवृंदारिकाः पुंवद्भावेन किं क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः। अर्थो निवृत्तः स्त्रीत्वं तस्य निवृत्तत्वात् के न शब्दो न श्रूयते। अस्त्रियामिति हि लुगुच्यते। लुक्। अलुक्। वतंडीवृंदारिकावातंडवृंदारिका। पुंवद्भावेन किं क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः अर्थो निवृत्तं स्त्रीत्वं तस्य निवृत्तत्वात्
१ लुक् स्त्रियां वतंडाच्चेति यकारस्य लुक् प्राप्नोति॥ ॥ ॥

=तत्र प्रयत्नापि स्थानिवद्भावस्ते तेषां अन्यतरस्य च स्थानिवत्त्वचोदनानपुक्तेत्याशंक्य विशेषमाह न चेति। नचेत भाष्ये स्थानिवद्भावकृतेन तकारस्य वर्णप्रसंगः किं तर्हि अर्थस्य निवृत्तत्वात् वसक्तियोगशिष्टपरिभाषया कृतं किं च ततो प्राप्तायां स्थानिवत्त्वं न कमर्ज-

त्प्रत्यापत्तिवचनमेव व्याप्तम् उपगम्य तां स्थानिवत्प्रसंगश्चेत्सेतत्तु परिसज्यमानमिसा शंक्याह। न चेदानीमिति। सूत्रव्याख्यानार्थत्वाद्वाक्यानां विस्पष्टार्थमुभयोरुपादानमित्यर्थः तत्रैत भाष्ये यद्यपि स्थानिवद्भावाश्रयो दोषस्तथापि सन्नियोगशिष्टत्वात् संभावितनिवृत्तेनकारस्य स्थानिवद्भावाश्रयं पुनः प्रसंगं नेन लोकारेणकारस्य निमित्तेइ-
कारनकारयोः सहविधानाद्यणादेशस्य तु निमित्तमीकार इत्येतावता भेदे नैतद्भाष्यं पट्वभार्ययोः पृथगुपन्यासः। लुगलुगिति। लगकौ यथायोगमिष्यमाणौ न सिध्यत इति
२ पुंवत्त्वलक्षणार्थानि दृश्यंते कर्तव्य इत्यर्थः॥ ॥

एम०
११५

=स्थानिवद्भावेप्रतिषिद्धेऽपिः प्रातिपदिकग्रहणस्यापरिग्रहवचनेनेतिभावः। यद्यपि लुकई कारनिमित्तताभावेऽपि प्रत्ययलक्षणेनकिर्विष्णु मध्यमात्पुंवद्भावेन निवृत्तेस्त्रीप्रत्ययेस्यानिवद्भावेनतन्निमित्तविकारनिवृत्तिः प्राप्तापत्तिक्रियते तथापि वैयाकरणमार्यदोषयोगेनिवृत्तिः स्यात्। एतदर्थं

[illegible]

यदि पुनरिति। लुक्स्त्रियामित्यनेन चेदीकारे परतो लुग्विधीयते तदेकारे पुंवद्भावेन निवर्त्तिते यकारनिवृत्तौ कर्त्तव्यायां स्थानिवत्प्रसंगश्चेति स्थानिवद्भावे प्रतिषिद्धे वातं
ड्यवृन्दारिकेति सिध्यतीति भावः। स्त्री ई इति। स्त्रियां य ईकारस्तस्मिन्परत इत्यर्थः। एकादेशस्य पूर्वान्तवद्भावात् स्त्रियाइति इयङादेशः। ईकारविधाविति। शार्ङ्गरवा
दिगणे वर्तते इशब्दः क्रतयत्र लुक्प्रवर्तते ततः स्थानिवत्त्वे लुकीकारेनास्य प्रसक्तेचैल्लुको प्रसंगइतीतरेतराश्रयदोषप्रसंगः। अन्तरंगत्वाच्चेति। उत्तरपदमनपेक्ष्य लु
कार०

=पंक्तौ ०२= =इत्यपि ०२=दोषांतरमाह अंतरंगत्वाच्चेति ०२= [redacted]

यदि पुनरयमीकार एव लुग्उच्येत। तदीकारग्रहणं कर्त्तव्यं न कर्त्तव्यं क्रियते न्यास एव प्रश्लिष्टनिर्देशोऽयं स्त्री ई स्त्री स्त्रियामिति। ईकारविधाव =एतदुक्तमिति ०१=
स्य २ प्रत्ययकस्य पाठः क्रियतेवर्तते इति। शार्ङ्गरवादौ वैसप्रत्ययकस्य पाठः करिष्यते।। सवैसप्रत्ययकस्य पाठः कर्त्तव्यः। अन्तरंगत्वाच्च लुक् प्राप्नोति। अ
लुक्। अस्त्री विषय। कौड्रीहसी वृंदारिकाकौड्रीवृन्दारिका। पुंवद्भावेन किं क्रियते स्त्रीप्रत्ययस्य निवृत्तिः। अर्थोऽनिवृत्तिः स्त्रीत्वं तस्मा
न्निवृत्तत्वात् केन पशब्दः श्रूयेत। अस्त्रियामितिहि ल्योविधीयते। अस्त्री विषय [redacted]। द्विं स्त्रीप्रत्यय। गार्ग्यायणी वृंदारिका गा
र्ग्यवृंदारिका इत्यत्र पुंवद्भावो न प्राप्नोति। किं कारणं भाषितपुंस्कादनूङः समानाधिकरणे उत्तरपदे पुंवद्भावो भवतीत्युच्यते।। ॥

ल्विधीयमानोऽन्तरंगत्वात् प्रागेव स्त्रीप्रत्ययनिवृत्तेः प्राप्नोति तत्रैनत्स्यान्निमित्ताभावाल्लुक् निवर्त्तिष्यत इति। एतच्च नास्ति न त्वेषा परिभाषा सर्वत्राश्रीयते इ
यानिस्यादौ निवृत्तायामपि प्रवृत्तौ प्रत्ययस्यानिवर्त्तनाद्दर्शितं हि रं गामं तरंगइ ईकारनिवृत्तेरसिद्धत्वाच्च। कौड्रीवृस्य वृंदारिकेति। स्त्रीत्वस्यानिवर्त्तनात् व्रातच्फ
ञोरस्त्रियामिति ञ्यो न प्राप्नोति। गार्ग्यायणीति। ष्फस्योत्तरपदेनानंतर्याभावात् पुंवद्भावेन निवृत्तिर्नप्राप्नोति। ङीषस्तु भाषितपुंस्कात् विधानात् श्रवणप्रसं
ग इत्यर्थः।। ॥

सर्वप्रसंग इति। यथा प्रत्ययपक्षे भाषितपुंस्कात्परः स्त्रीप्रत्यय इति शक्यते विशेषयितुं नैवं स्त्र्यर्थाभिधायी शब्दो भाषितपुंस्कात्पर इति शक्यते विशेषयितुं मृदुल्कचू
डादौ पुंवद्भावस्याप्रसंगात्। नन्वयं स्त्रुक्ला शब्दो भाषितपुंस्कात्परः। अंगारका इति। अंगारक शब्देन न कदाचित् स्त्रियाम्भिधानं कालिका शब्देन च पक्षिजातौ

=अत्रपक्षे रूपातिदेशः। एवं वक्ष्यमाणान्तनीयपक्षेपि ०१=

पश्चात्तु भाषितपुंस्कात्परं नैतदुत्तरपदे यच्चोत्तरपदे नैतद्भाषितपुंस्कात्परमिति। अस्मिंस्तर्हि स्त्रीशब्दग्रहणं स्त्रीशब्दस्य पुंशब्दा
तिदेश इति चेत् सर्वप्रसंगो विशेषात्। स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत् सर्वस्य स्त्रीशब्दस्य पुंशब्दातिदेशः प्राप्नोति। अंगारकाना
म शकुनयः तेषां कालिकां स्त्रियः कालिकावृन्दारिकाः अंगारकवृन्दारिकाः प्राप्नुवन्ति। हंसस्य वरटा कच्छपस्य डुली ऋश्यस्य रो
हित्। अश्वस्य वडवा पुरुषस्य योषित्। किं कारणं। अविशेषात्। नहि कश्चिद्विशेष उपादीयते एवं जातीयकस्य स्त्रीशब्दस्य पुंशब्दाति
देशो भवतीति। अनुपादीयमाने हि विशेषे सर्वप्रसंगः। कथं च नाम नोपादीयते यावता भाषितपुंस्कादित्युच्यते। भाषितपुंस्का
नुपपत्तिश्च। त्यर्थे चापंचः पठितः। सर्वो हि शब्दो भाषितपुंस्कात्परः शक्यं कर्तुं॥ ॥ श्री ॥

तस्याः स्त्रिया एवाभिधानमिति। पुंवत्कर्मधारये सनेनार्थेन अंगारक शब्दादेरप्रसंगः। शक्यते हि कालिकांगारक शब्देन साहचर्यादभिधातुमेव मन्यत्रा
पि योज्यं। सर्वो हि शब्दः इति। एताः कालिकावृन्दारिका इति भवत्येतच्छब्दात्। भाषितपुंस्कात्परः कालिकाशब्द इति पुंवत्प्रसंगः॥ ॥ श्री ॥ ॥

अर्थातिदेशादिति। ह्यर्थस्य पुमर्थो भवतीत्यर्थः। तदिष्टेत ह्राचीशब्दः प्रवर्त्तते। भिन्नविषयत्वात्तु विप्रतिषेधानुपपत्तिरन्यो ह्रस्वो ऽर्थस्य पुंवद्भावः। पुंवद्भावो ऽभिनिर्व
र्त्यमान इति। स्त्रीप्रत्ययस्य निवृत्तौ दीर्घोत्तत्वाभावाद्ध्रस्वस्याप्रवृत्तिं स्पर्शः। ह्रस्वत्वमिति। ननु ह्रस्वे प्रवृत्ते ऽप्यर्थस्यानिवर्त्तनात् कथं पुंवद्भावो ह्रस्वेन बाध्यते। उच्यते।

अस्तु तर्हि अर्थग्रहणं। अर्थातिदेशे विप्रतिषेधानुपपत्तिः अर्थातिदेशे विप्रतिषेधो नोपपद्यते। पठिष्यति ह्याचार्यो विप्रतिषेधं पुंवद्भावाद्ध्रस्व
त्वं विद्वारिकेभ्य इति स विप्रतिषेधो नोपपद्यते। किं कारणं। द्विकार्ययोगो हि नाम विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। शब्दस्य ह्रस्वत्वं अर्थस्य पुंवद्भा
वः। किं च सर्वप्रसंगो ऽविशेषादिति सर्वस्य अर्थस्य पुंवदर्थः प्राप्नोति। अस्यापि प्राप्नोति। अंगारका नाम शकुनयः तेषां कालिकाः स्त्रियः। कालि
का वृंदारिकाः अंगारकवृंदारिकाः प्राप्नुवंति क्षेमवृद्धयः क्षत्रियाः तेषां तनुकेश्यः स्त्रियः तनुकेशी वृंदारिकाः क्षेमवृद्धिवृंदारिकाः प्राप्नुवंति हं
सस्य वरटा। कच्छपस्य डुली। ऋश्यस्य रोहित्। अश्वस्य वडवा पुरुषस्य योषित्। किं कारणं। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवं जातीयकस्य
स्त्र्यर्थस्य पुंवदर्थो भवतीति। अनुपादीयमाने हि विशेषे सर्वप्रसंगः। कथं नाम नोपादीयते यावता भाषितपुंस्कादित्युच्यते भाषितपुंस्कानुपपत्ति
श्च भवति। न ह्यर्थे न पौर्वापर्यमस्ति। अयं तावददोषः। यदुच्यते अर्थातिदेशे विप्रतिषेधानुपपत्तिरिति। नात्र वयं द्विकार्ययोग एव विप्रतिषेधः। किं
तर्हि असंभवो ऽपि स चात्रास्त्यसंभवः। को ऽसावसंभवः। पुंवद्भावो ऽभिनिर्वर्त्यमानो ह्रस्वत्वस्य निमित्तं विहंति ह्रस्वमपि निर्वर्त्यमानं पुंवद्भावं बाधत एषो ऽ
ऽसंभवः। अस संभवे युक्तो विप्रतिषेधः॥ ॥ ॥

यदि कृतं ह्रस्वत्वं प्रयोगे श्रूयते एवं तत्कृतं भवति यदि तु कृतमपि पुंवद्भावेन निवर्त्येत ततदाः कृतमेवैतन्न स्यादिति परत्वात्प्रवर्त्तमानं ह्रस्वत्वं पुंवद्भावं बाधते॥ ॥

१ ॥श्री॥ ॥५॥ ॥

=कालिंमन्येत्यादिविषयं ह्रस्वत्वं सामर्थ्याद्बाधकं भवतीति भावः।१=

तस्मादस्त्विति। शब्दपक्षे सामान्याद् अन्यपदेन पौर्वापर्यसंभवात्। भाषितपुंस्काद् अनूङ्। यस्मिन्निति। समुदायः समासार्थोऽवयवेन विग्रहः। निपातनादिति। ननु लौकिक
त्वादस्य कर्यं निपातनादिति परिहारः। लुकापि तर्हि लौकिकत्वान्नभाव्यं यथा लुक्प्रसंगोऽध्यवसीयते। लुगप्यध्यवसीयतामित्यदोषः। अथवेति। ननु च पराथेत्वात्

=कथं पुनरिति। अयं भावः। भनरूपशब्देनोरूपिलो भावरूपः। ...वामोरूपिः ... = ... एवं च निपातनादित्यस्य सोऽर्थ इत्यर्थः = ...

अयं तर्हि दोषः। सर्वप्रसंगोऽविशेषादिति। तस्मादस्तु स एव मध्यमः पक्षः। ननु चोक्तं स्त्री शब्दस्य पुंशब्दात्ति रेशाऽनिचेत्सर्वप्रसंगोऽविशेषा
दिति। नैष दोषः समासनिर्देशोऽयं भाषितपुंस्काद् अनूङ्। यस्मिन्सोऽयं भाषितपुंस्काद् अनूङिति। यद्येवं लुक्प्राप्नोति। निपातनान्न भविष्यति।
अथवा अलुक्प्रकरणः सोऽनुवर्तिष्यते। कथं पुनरनूङि सनेन स्त्रीप्रत्यय ग्रहणं शक्यं विज्ञातुं। नञिवयुक्तमन्यसदृशाधिकरणे
तथा ह्यर्थगतिः। नञ्युक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते। तद्यथा अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश आनीय
ते। नासौ लोष्टमानीय कृती भवति। एवमिहाप्यनूङि सुक्ते उङ् प्रतिषेधादन्यस्मिन् उङ्सदृशे कार्यं विज्ञास्यते किंचान्यत् अनूङ् उङ्स
दृशं स्त्रीप्रत्यय इति। एवमपि दरदविदरूवृंदारिका ऐडविडवृंदारिका पृथुवृंदारिका [redacted] पार्थवृंदारिका उशिक्वृंदारिका औशिजवृंदारिका अत्र

इवयुक्तं॥ ॥ पुंवद्भावो न प्राप्नोति॥ ॥×वृंदारिका दरद्वृंदारिका दारदः× ॥

कथं तर्ह्यपरसूत्रनिर्देशस्तदिचेदानीमाहौथैनाथेनधात्वभावनपसक्तोपूयः...

कथं लक्षणयोः संबंधः। अथ नेङ्लुगधिकारसामर्थ्याल्लक्षणागममपि लक्षणं भविष्यति संज्ञा परिभाषवत्। दरदिति दरद् विडोऽपत्यं पृथोऽपत्यं जनपदशब्दादित्यत्र। ॥श्री॥ ॥७॥ ॥७॥
उशिग्दरदभ्यां अपत्ये गद्यत्यण् उभयोरत स्त्रीति स्त्रियां लुक्॥ ॥

कर्तव्योऽत्र यत्न इति। नेह टाबादीनामेव ग्रहणं किं तर्हि प्रत्ययमात्रस्य लुक्स्थानिवद्भावात्प्रत्ययो भवत्येवेत्ययं तु भाषितपुंस्कादनूङ् यस्मिन्नकृतः स भाषितपुंस्कादनूङिति मध्यमपद-
लोपी समासः। अयमपि शेषे व्याख्यायते तत्र हि शेषस्य प्रसंगः स्यात्। पट्वीमृदुभार्य इति। पट्वीशब्दस्योत्तरपदेनानन्तर्याभावात्पुंवद्भावाभावो मृद्वीशब्दस्यानन्तर्यात्पुंवद्भावः। इतरोऽयथोक्तमप्रतिपद्याह।
पुंवद्भावः कस्मान्न भवतीति भाषितपुंस्कादिति। एकदेशेन समस्तं सूत्रं लक्ष्यते तत्रोत्तरपदेनानन्तर्याभावात्पट्वीशब्दस्य पुंवद्भावाभावः। इतरस्तु भाषितपुंस्कत्वमत्र नास्तीत्यनेन

=प्रत्ययस्तेन सादृश्यमभिप्रेतमिति भावः। २=

कर्तव्योऽत्र यत्नः। अथेह कथं भवितव्यं पट्वीमृद्वीभार्यः आहोस्वित् पटुमृदुभार्यः पट्वीमृदुभार्य इति भवितव्यं पुंवद्भावः क-
स्मान्न भवतीति भाषितपुंस्कादित्युच्यते। ननु च भोः पटुशब्दो मृदुशब्दश्च पुंसि भाष्येते समानायामाकृतौ भाषितपुंस्कं चाकृतं तत्र चैतौ भाषितपुंस्कौ।
समानायामाकृतावपि भाषितपुंस्कौ। कथम्। आरभ्यते च मतुब्लोपः। एवं तर्हि भाषितपुंस्कादनूङः समानाधिकरण उत्तरपदे पुंवद्भवतीत्युच्यते। यस्या
च भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदे कृतं तस्य पुंवद्भावः। यस्य चाकृतं नासौ भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदेऽपूरणीप्रधा-
नपूरणीग्रहणं कर्तव्यम्। प्रधानं या पूरणीति तन्नेति वक्तव्यं इह मा भूत्॥ ॥ ॥

नोक्तमिति मत्वाह। ननु चेति। इतरः शिष्यबुद्धिपरीक्षार्थमाह समानायामिति। आकृतौ इति। पटुर्गुणो मृदुर्गुण इति गुणो भाषितपुंस्को भार्यायोगे न तु स्त्रीलिङ्गाविति भावः।
आरभ्यत इति। ततश्च पाटवे मार्दवे च समाने प्रवृत्तिनिमित्ते पटुमृदुशब्दौ पुंसि स्त्रियां च वर्तेते इदानीमाचार्यः स्वाभिप्रायं प्रकाशयति। एवं तर्हीति॥ ॥ ॥

भा०कै० ६ कल्याणपंचमीक इति। पक्षेऽन्यपदार्थे। अवयवानामसंतततिरोधानाच्च क्षिप्रणाः प्राधान्यमपूरणी प्रमाण्योरिति समासांतोपि प्रधानपूरणापएव विहित इत्यत्र न
११८ भवतीति न घत श्चेति कप्प्रभवति। इतरस्तु सर्वेत्र बहुव्रीहौ वर्त्ति पदार्थस्य प्राधान्यमलाए इति। अथेह कथमिति। रात्रयोऽत्रेति। उद्भूतावयवा रात्रयोऽप्रधानं तत्र
यथैव सप्रमा घाणत्रयः समासाभिधेया एवं पंचम्यपीति वर्त्तिपदार्थस्यान्यपदार्थेऽनुप्रवेशान्न प्राधान्यमित्यर्थः। प्रधानेकार्यसंप्रत्ययात् प्रधानपूरणीग्रहणा

=तिरोहितावयवभेदस्समुदायस्य पक्षशब्देनाभिधानात्=

कल्याणीपंचमीअस्य पक्षस्य कल्याणपंचमीकः पक्ष इति। अथेह कथं भवितव्यं कल्याणीपंचमीआसां रात्रीणामिति कल्याणीपंचमा
रात्रय इति भवितव्यं। रात्रयोऽत्र प्रधानं। तसिलादिष्विह केचित्तसिलादयः प्राक्पाशपः। केचित् प्राक्कल्पपः। अपरे प्रागिवात्। तत्रैके मन्यन्ते। परिगण
नं कर्त्तव्यं। तसिलादिष्वातसौ। त्रसौ तसिलादिषु द्रष्टव्यौ। तस्यां शालायां वसति तत्र वसति। तस्याः ततः। यस्याः यतः। तरप् तमपौ। तर
प्तमपौ तसिलादिषु द्रष्टव्यौ। दर्शनीयतरा। [redacted]। दर्शनीयतमा। चरट् जातीयरौ। चरट् जातीयरौ तसिलादिषु द्रष्टव्यौ। पटुचरी। प
टुजातीया। कल्पप्देशीयरौ। कल्पदेशीयरौ तसिलादिषु द्रष्टव्यौ। दर्शनीयकल्पा दर्शनीयदेशीया। रूपप्पाशपौ। रूपप्पाशपौ तसिला
दिषु द्रष्टव्यौ। दर्शनीयरूपा। दर्शनीयपाशा। थमुथालौ थमुथालौ तसिलादिषु द्रष्टव्यौ। कया। कथं। यया। इत्थं यथा। दार्हिलौ तसि
लादिषु द्रष्टव्यौ। तस्यां वेलायां तदा तस्यां वेलायां तर्हि। तिल्थ्यनौ। तिल्थ्यनौ तसिलादिषु द्रष्टव्यौ। वृकीवृक तिः॥ ×वोनेष्यते केचिदन्यत्र पर्यंते

भिसादुः। तसिलादिषु कल्पसप पाठः। घरूपकल्पेति परत्वात्। ह्रस्वस्याभावात् तस्माद् दर्शनीयकल्पेति पाठः। वृक्तितिरिति। लिंगविशिष्टपरिभाषया वृकीशब्दात् एम०
वृकज्येष्ठाभ्यामिति तिल्प्रत्ययः। परिगणनसामर्थ्यात् ज्ञाने श्चेति उवङादयमतिषेधाभावः॥ ॥ श्री ॥ ११८

अजघ्येति। पूर्ववद् जाशब्दाद्जादिभ्यां घ्यन्निति घ्यन्प्रत्ययः। हास्तिकमिति। यद्यत्र पुंवद्भावो न स्यात् तदा हस्तिनी शब्दस्य यस्येति चेति लोपे कृते नस्य तद्धिते निवलादसिद्ध
वदत्राभादित्यसिद्धत्वाद्वचनत्वात् द्विन इति टिलोपो न स्यादिति पुंवद्भावो विधीयते। ठक् छसो श्चेत्यनेनात्र पुंवद्भावो न भवति। छसा सह चरितस्य ठक्कोग्रहणात्। टेपेनेय
इति। ढेपेतरो हिताभ्यां वर्णादित्यतिरिप न कारो पुंवद्भावे टेपते यो रोहितेय इति स्यात्। अग्नायीति। अग्नेर्देवतेति वा सर्वत्राग्निकलिभ्यां ढक्वक्तव्य इति ढक्। तत्र पुंवद्भाव

अजघ्यायूथिः शसिवह्वल्पार्थस्य। बह्वल्पार्थस्य शसि पुंवद्भावो वक्तव्यः। बह्वीभ्यो देहि बहुशो देहि। अल्पशो देहि। [redacted] त्वतलोर्गुणवचनस्य। त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः। पट्वीभावः पटुत्वम् ह्वीभावः मृदुत्वं। पटुता मृदुता।
गुणवचनस्येति किमर्थं कठीत्वं। कठीता। भस्याढे तद्धिते। पुंवद्भावो वक्तव्यः। हस्तिनीनां समूहो हास्तिकं। अढ इति किमर्थं। टेपेनेयो रोहिणेयः।
पद्यढ इत्युच्यते। अग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः स्थालीपाकः। अत्र न प्राप्नोति। इह च प्राप्नोति। कौण्डिन्यं सापत्न इति। यदि पुन
रनपत्य इत्युच्यते नैवं शक्यं इह हि न स्यात्। गार्ग्यायण्या अपत्यं माणवकः गार्ग्यो जाल्मः। अस्तु तर्हि अढ इत्येव। कथं। कौण्डिन्यः सापत्न इति। कौ
ण्डिन्ये निपातनात्सिद्धं किं निपातनं आगस्त्यकौण्डिन्ययोरिति। सापत्नः प्रकृत्यन्तरत्वात्॥ ॥ ॥

प्रतिषेधात् ढग्नायेय इति प्राप्नोति। कौण्डिन्य इति। कुण्डिन्या अपत्यं गर्गादित्वात् यञ् तत्र पुंवद्भावे सति कौण्ड्य इति प्राप्नोति। सपत्नी शब्दात् तीसापत इति प्राप्नोति। यदि पुन
रिति। अढ इत्यपनीयानपत्य इति उच्यमाने आग्नेय इत्यनपत्यत्वात्सिध्यति। टेपेनेय रोहिणेय कौण्डिन्य सापत्नानां प्रत्यपत्यप्रत्ययान्तत्वान्न सिध्यति। गार्ग्यायण्या इति गो
त्रस्त्रियाः कुत्सने णचेति णे अपत्यप्रत्यये पुंवद्भावो न प्राप्नोति॥ ॥ ॥ श्री॥ ॥ श्री॥ ०

भा० कौ० ६ सपत्न शब्द इति। यन्न सपत्न इति निर्देशोऽत्र लिंगं। तस्मादेव शार्ङ्ग रवादिषु दृष्टान्त इति निकृते सपत्न्याः अपत्यमिति शिवाद्यणि पुंवद्भावे सापत्नः सिध्यति। कर्तव्योऽत्रे
११५ ति। स्त्रियां योऽणो विहितः स्त्रीभ्यो ढगित्यनेन तत्र पुंवद्भाव प्रतिषेधो न त्वग्रे ढगि सम्भवति नित्याख्येयं। ढकृच्छ्रसोरिति। छसं भवित्वात् तत्र सितिचेति पदसंज्ञा विधानात्
भत्वाभावाद्दृच ना। तां तादि तिका देशो न भवतीति। ढस्ये तिवर्णा मात्रस्य स्था नि त्वे ऽलविधित्वात् स्थानि वत्वाभावात् संघातस्य तु स्थानित्वे संनिपातपरिभाषोपस्था

= ननु पंचमी समासेनना धिकसिद्धे ... सपत्न शब्द एव ... तेन समानः पतिर्यस्याः ... विवाह निबंधन सपत्नी ... किंतु पुंवद्भावेपसुन ... इति भावः। = ३ =
... पंचमी समासा भावपक्षे ... इति भावः। =

सपत्न शब्दः प्रकृत्यंतरमस्ति। कथमग्नायी देवता अस्य स्थाली पाकस्य आग्नेयः स्थाली पाक इति। अस्त्वेतद्यन पसर त्वेवा यथं गार्गी जात्मः गा
नीर गार्ग्ये यो न संदेते। कथ्योः त्रयपत्वः। ढकृच्छसोश्च। ढकृच्छसोश्च पुंवद्भावो वक्तव्यः। भवत्याः छात्राः भावत्काः भवदीयाः। ढकृग्रहणं किमर्थं। नरके
कृते अजादावित्येव सिद्धं। नेवं शक्यं। अजादिलक्षणो हि मात्थितिकादिवत्प्रसंगः। अजादिलक्षणो हि मात्थितिकादिवत्प्रसज्येत। तद्यथा मथि
तं पण्यमस्य मात्थितिक इत्यकार लोपे कृते तां तादिति कारे शो न भवति एवमिहापि न स्यात्। तसिलादि। क्यङ्मा। मानिन्ग्रहणं किमर्थं। मा
निन्ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च। मानिन्ग्रहणं क्रियते अस्त्र्यर्थमसमानाधिकरणार्थं च। अस्त्र्यर्थे तावत्। दर्शनीयां मन्य
ते देवदत्तो यज्ञदत्तां दर्शनीयमानी। अयमस्याः। असमानाधिकरणार्थं च। दर्शनीयां मन्यते देवदत्तायज्ञदत्तां दर्श

नात्। क्यङ्मा मानिन्ग्रहणमिति। स्त्रीलिंगे समानाधिकरणे उत्तरपदे पूर्वेणसिद्धत्वाद्यथा दर्शनीयमात्मानं मन्यते दर्शनीयमानिनी देवदत्तेति। अत्रत्ये कस्याए एम०
व कर्मत्वात् कर्त्रीत्वाच्चास्ति सामानाधिकरण्यं॥ ॥श्री॥ ॥श्री॥ ॥ ११५

नकोपधाया ऽस्याद्यस्यौपान्तिनिपठितं स्तत्रत्रयस्येत्यर्थः। पुंवद्भावमात्रस्येति। औपसंख्यानिकस्यापीति यावत्। माध्यमिकीया इति। मध्यमिकायां भव इति वेणुकादिभ्य
श्छण् वक्तव्य इति छण् प्रत्ययः। तत्र भवा ठ इति पुंवद्भावप्रसंगः। शाल्लूकिकीया इति। शाल्लूका निर्वृत्तं तेस्यामिति वुञ्छणके तिकं। शाल्लूकिकायां भव इति वृद्धाच्छ इके कां
तस्वोपधायाः इति छः। विधिरपीति। नगर्यो ग्रामे चाभाषितपुंस्कत्वात्। वैलेपिकमिति। अणमहिष्यादिभ्य इत्यण्। एवं तर्हीति। प्रयोगमूलो व्याख्यानात् यथेष्टवि

=ततश्चेकारस्य श्रवणं न स्यात्:२=

नकोपधायाः। किमिदमेव माद्यनुक्रमणं आद्यस्य योगस्य विषये आहोस्वित् पुंवद्भावमात्रस्य। किं चातः। यद्याद्यस्य योगस्य विषये माध्यमिकी
याः। शाल्लूकिकीयः अत्र न प्राप्नोति। विधिरप्यत्र न सिध्यति। किं कारणं। भाषितपुंस्कादनूङ इह तर्हि विलेपिकाया धर्म्यं वैलेपिकं विधिश्च सि
द्धो भवति। प्रतिषेधश्च न प्राप्नोति। अथ पुंवद्भावमात्रस्य विषये। हस्तिनीनां समूहो हास्तिकं जातिलक्षणः पुंवद्भावप्रतिषेधः प्राप्नोति। एवं
तर्हि नकोपधाया इत्ययं योगः पुंवद्भावमात्रस्य विषये। तत उत्तरमेव माद्यनुक्रमणमाद्यस्य योगस्य विषये। कोपधप्रतिषेधे तद्धितवुग्रहणं। को
पधप्रतिषेधे तद्धितस्य यः ककारो वोपधः तस्य ग्रहणं कर्तव्यं। इह माभूत्। पाकभार्यो भेकभार्यः। स्वांगा [redacted] स्वांगाच्चेतोः
मानिनि। स्वांगाच्चेतो मानिनीति वक्तव्यं। इहापि यथा स्यात्। दीर्घमुखमानी। श्लक्ष्णमुखमानी। यद्यमानिनीत्युच्यते दीर्घमुखमानिनी श्ल
क्ष्णमुखमानिनीति न सिध्यति। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति॥ ४ ङिलुच्यते न ह्येतद्भवति भाषितपुंस्कादनूङ्॥४॥५

षयविभागत्वाभः। पाकभार्य इति। पाकशब्दः प्रत्ययमवयोवाची ततो ङीव प्रवादः जातिलाद्यपं भेकभार्य इति। भेकशब्दः क्रियाशब्दो मण्डूकजातिवाची तेन तु भे
कीभार्य इति भाव्यं। जातेश्चेति पुंवद्भावनिषेधात्। स्वांगाच्चेतः। स्वांगाच्चेतरइ सेतावत्तन्नहत्त्वमिति मत्वा वार्त्तिकारंभः॥ ॥ श्री ॥

=अयपुक्तो नेकः।९=

पुंवत्। किमर्थमिति। कर्मधारयेत्त्रियाः पुंवदिति सिद्धः पुंवद्भावो जातीयदेशीययोरपि तस्मिल्लादिष्विति मत्वा प्रश्नः प्रतिषिद्धार्थमिति। प्रतिषिद्धोऽपि पुंवद्भावो यथा

कारकवृंदारिका२

पुंवत्। किमर्थमिदमुच्यते। नसामान्येन सिद्धः। पुंवत्कर्मधारये प्रतिषिद्धार्थः। प्रतिषिद्धार्थोऽयमारंभः। नकोपधायाः इत्युक्तं तत्रापि पुंवद्भावो भवति। कारिकावृंदारिका। कारकजातीया। कारकदेशीया। संज्ञापूरण्योश्चेत्युक्तं तत्रापि पुंवद्भवति दत्तावृंदारिका दत्तवृंदारिका। दत्तजातीया। दत्तदेशीया। पंचमीवृंदारिका। पंचमवृंदारिका। पंचमजातीया। पंचमदेशीया। वृद्धिनिमित्तस्येत्युक्तं तत्रापि पुंवद्भावो भवति। स्रौघ्नीवृंदारिका स्रौघ्नवृंदारिका। स्रौघ्नजातीया। स्रौघ्नदेशीया। स्वांगाच्चेतोऽमानिनीत्युक्तं। तत्रापि पुंवद्भावो भवति। श्लक्ष्णमुखीवृंदारिका श्लक्ष्णमुखवृंदारिका। श्लक्ष्णमुखजातीया श्लक्ष्णमुखदेशीया। जातेश्चेत्युक्तं। तत्रापि पुंवद्भवति कठीवृंदारिका कठवृंदारिका। कठजातीया कठदेशीया। कुक्कुट्यादीनामंडादिषु पुंवद्वचनं। कुक्कुट्यादीनामंडादिषु पुंवद्भावो वक्तव्यः। कुक्कुट्या अंडं कुक्कुटांडं। मृग्याः पदं मृगपदं। काक्याः शावः काकशावः॥ नवा स्त्रीपूर्वपदविवक्षितत्वात्। नवा वक्तव्यं किं कारणं अस्त्रीपूर्वपदविवक्षितत्वात्। नात्र स्त्रीपूर्वपदं विवक्षितं [redacted] किं तर्हि अस्त्रीपूर्वपदं विवक्षितं। उभयोरंडं उभयोः पदं उभयोः शावः॥ ॥ ॥

स्यादित्येवमर्थं। नवेति। पुमान् वृत्तिवाक्यविषयः स्त्रियां तु वाक्यमेव भवति वृत्तिस्त्वनभिधानान्न भवति॥ ॥ श्री ॥

इह तु कथमिति। न हि पुंसा क्षीरस्य संबंधसंभवः। अत्रापीति। जात्यंतरनिवृत्तिपरायां स्त्रीत्वमनुपकारित्वादविवक्षितमित्यर्थः। यत्र तु लिंगविशेष उपकारक-
स्तत्रासौ विवक्ष्यत एव यथा जामूत्रेण पर्युक्षितं दातव्यमिति। असत एवेति। विवक्षाया एव बलीयस्त्वमित्यनेन प्रतिपाद्यते। समुद्रः कुंडिरिति। असदेव समुद्रत्वं कुं- के२
डिकायामसत्कुंडिकात्वं समुद्रे वारोप्य शब्दप्रयोगः। वायुवारुणमिति। उभयत्र वायोः प्रतिषेधो वक्तव्य इत्यसानर्थः। न भवति वायुवरुणौ देवतास्य साऽस्य देवते-
चोदनायां

इह तु कथं मृगयां क्षीरं मृगक्षीरं अत्रापि न वा स्त्रीशब्दं पदविवक्षितत्वादिसेवा। कथं पुनः सतो नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। त-
द्यथा अलोमिका एडका अनुदरा कन्या असतश्च विवक्षा भवति तद्यथा समुद्रः कुंडिका विंध्यो वर्द्धितकमिति। अग्नेरीत्वाद्वरुणस्य वृद्धिर्वि-
प्रतिषेधेन। अग्नेरीत्वाद्वरुणस्य वृद्धिर्भवति विप्रतिषेधेन अग्नेरीत्वस्यावकाशः। अग्नीषोमौ वरुणस्य वृद्धेरवकाशः॥ वायुवारुणं। इहो-
भयं प्राप्नोति। आग्निवारुणीमनड्वाहीमालभेत। वरुणस्य वृद्धिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेध-
ः। नात्रैको द्विकार्ययुक्तः। कथं अग्नेरीत्वं वरुणस्य वृद्धिरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्ह्यसंभवोऽपि। स चात्रास्त्यसंभवः। क्वो-
ऽसावसंभवः। अग्नेरीत्वमभिनिर्वर्तमानं वरुणस्य वृद्धिं बाधते॥ ॥ ॥

=परित्यज्य चापवादविषयमिति न्यायात्‌ः२=   तद्धि१

स्याऽऽदेवताद्वंद्वे चेत्युभयपदवृद्धिः। आग्निवारुणीमिति। ननु ईत्वमंतरंगं बहिरंगा तु उत्तरपदवृद्धिस्तामपेक्षणादिति। स युक्तो विप्रतिषेधः। नैतदस्ति। इद्वृद्धाविति ईत्वस्याप-
वादरूपत्वं विधीयते तेन तोपवादविषयापेक्षणान्नास्त्यंतरंगत्वमीत्वस्यात्र विषये॥ ॥ ॥ ॥

=इद्वृद्धावितीत्वमीत्वस्यापवादरूपत्वं=

वरूणस्य वृद्धिमिति। दीर्घोच्चवरूणस्येति निषेधात्। ईत्वं बाधत इति। इहह्रस्वाविति वचनात्। कालिंमन्ये इति। कालीमात्मानं मन्यते काल्ये वाहमिति मन्यत इत्य
र्थः। न त्तेकिजेरेति। अत्र नकोपधाया इति पुंवद्भावः प्रतिषिद्धः। हारदिकेति। दरदो ऽपत्यं स्त्री घञ्मगधेत्यणा तस्यात इष्टेति लुक् ततः प्राग्वित्क इति कः।

=कालीमप्रियात्मेनमन्यतेऽस्यपर्वेय विकस्णालुंवलात्रातिराह्ः कालीमिति: २=

वरूणस्य वृद्धिरभिनिर्वर्तमाना अग्रे ईत्वं बाधते। एषोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः। पुंवद्भावाद्ध्रस्वत्वं खिद्वादिकेषु। पुं
खिद्वादिकेषु२ वद्भावाद्ध्रस्वत्वं भवति विप्रतिषेधेन। पुंवद्भावस्यावकाशः। पटुभार्यः। मृदुभार्यः। खिति ह्रस्वत्वं भवतीत्यस्यावकाशः। कालिंमन्यः हरि
णिंमन्यः। इहोभयं प्राप्नोति। कालिंमन्या। हरिणिंमन्या। ह्रस्वो भवति विप्रतिषेधेन। घादिषु नद्या ह्रस्वो भवतीत्यस्यावकाशः। नर्त
कितरा नर्तकितमा। पुंवद्भावस्यावकाशः। दर्शनीयतमा। इहोभयं प्राप्नोति। पटुतरा पटुतमा। ह्रस्वो भवति विप्रतिषेधेन। के ह्रस्वो
भवतीत्यस्यावकाशः। नर्तकिका। पुंवद्भावस्यावकाशः। हारदिका। इहोभयं प्राप्नोति। पटुिका। मृद्विका। ह्रस्वत्वं भवति विप्रतिषेधेन
। अथेदानीं ह्रस्वत्वे कृते पुनः प्रसंगविज्ञानात्पुंवद्भावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥ ॥घादिषु नदी
ग्रहणं किमर्थं। अनेकाचो ह्रस्व इतीयत्युच्यमाने खट्वातरा मालातरा अत्रापि प्रसज्येत। नैतदस्ति प्रयोजनं भाषितपुंस्कादित्युच्यते।
×दर्शनीयतरा× ॥एवमपि दत्तातरा प्रातरा [redacted] अत्रापि प्राप्नोति॥ ॥ ॥
तसिलादिष्विति पुंवद्भावः। ननु परिगणिता स्तत्र तसिलादयो न च कल्पप्रत्ययः परिगणितः। एवं तर्हि विप्रतिषेधात् कल्पप्रत्ययोपि तत्रास्युपगत इत्यनुमीयते तेन
॥नासौ परिगणितः घादिषु॥ ॥श्री॥ भिधानात् ॥श्री॥ ॐ

=कालदिकेसवकाशभदर्शनासांद्विकेसुघालवणत्वेसपिबोधं:१=

ईत इति। स्वांगाच्चेतः इसन्तः। स्त्रियां स्त्रियां इति वर्त्तेत इति। ते नैं स्त्रीवाचिन ईकारस्य ह्रस्वो विधीयमानो ग्रामणी शब्दस्य न भविष्यत्ये तत्वादीकारस्य शेषग्रहणमर्थमिति।
विशिष्टस्य शेषस्य [redacted] ग्रहणमर्थमित्यर्थः। अनीचया नदीति। ब्रह्मबंधुतरा ब्रह्मबंधूततरेति। ईदंतेचेति। खितराण्स्त्रीतरेति। अविशेषेणेति। ईतोः नेकाच इति विशे
षानाश्रयात्। यद्येवमिति। यदीत इत्यनुवृत्ताङीग्रहणं च मसारव्या यस्त्रिया इत्यनेनैकोऽविशेषात्तेन दालक्ष्मीतं ज्योरीकारः स्त्रियां न विहित इति निसं ह्रस्वत्वं नास्ति

= ननु यामणीशब्दस्यापि स्त्रीवाचकतया यथं तत्स्त्रियामिस्यानुवृत्तौ कथमतिप्रसंग इत्यत आह। नेमेति। = नन्वसत्यपि ङीग्रहणे शेषग्रहणमिति सिद्धे व उपयुक्तो दन्त्यस्येवत्यत आह। विशिष्टस्येति। तथाच श्वानदीत्यादिना प्राप्तं इति इति। =

ईत इति वर्त्तेतेक्रमकृतं स्वांगाच्चेतोः मानिनीति। एवमपि ग्रामणीतरः सेनानीतरः। अत्रापि प्राप्नोति। स्त्रियामिति वर्त्तेते। एवमपि ग्रामणीतरा सेनानी
तरा अत्रापि प्राप्नोति। स्त्रियाः स्त्रियामिति वर्त्तते शेषग्रहणमर्थं तर्हि ङीग्रहणं कर्त्तव्यं। नद्याः शेषस्यान्यतरस्यामिति। कश्च शेषः अङीबयानदी ब्रह्मबंधुतं
चयदेकाच। ओतरेणापि ङीग्रहणं ग्रहणं शेषः कथं ईत इति वर्त्तते। अनीचया [redacted] नदी ईदंतं चा। यदेकाच। शेषग्रहणं चापि
शक्यमकर्त्तुं कथं। अविशेषेण घादिषु नद्याः अन्यतरस्यां ह्रस्वत्वमुत्सर्गस्तस्यानेकाच इति निसं ह्रस्वत्वमपवादः। तस्मिन्नित्ये प्राप्ते ङीतो विभाषे
यमारभ्यते। यद्येवं लक्ष्मितरा तंत्रितरा इति न सिध्यति। लक्ष्मीतरा तंत्रीतरा इति प्राप्नोति। इष्टमेवैतत्संगृहीतं लक्ष्मीतरा तंत्रीतरा [redacted] इसेव भवितव्यं। एवं हि सौनागाः पठंति घादिषु [redacted] नद्या ह्रस्वत्वे कृते नद्याः प्रतिषेध इति॥ ॥ इति श्रीमद्भ
गवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥ ॥

नद्याः अन्यतरस्यामिसत्रापि स्त्रिया इत्यनुवर्त्तनात् विकल्पेन ह्रस्वत्वं नास्ति सति चिद्दङीग्रहणे स्त्रिया इत्यस्य प्रयोजनाभावादननुवृत्तौ सभावान्नद्याः शेषस्येत्यनेन ह्रस्वः
सिध्यतीति भावः। इष्टमिति। सति हृङीग्रहणे नद्याः शेषस्येति विकल्पेन प्राप्तं ह्रस्वत्वं वचनं प्रतिषेधमसति तु ङीग्रहणे। स्त्रिया इत्यस्य तत्र द्वये प्यनुवृत्सा ह्रस्वस्याप्र
संगः कृत्स्त्रिया इति नास्ति लक्ष्मेदृत इति सिद्धं सर्वमिष्टं॥ ०॥ इत्युपाध्याय० कृते भाष्यप्रदीपे षष्ठस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥

= इदंतं चापीति। अत्रपक्षे श्री = = ततो स्वादिः आवृत्तिः क्रिया = = ह्रस्वनुवर्त्तनादिति बोध्यं। =

= स्त्रिया इत्यननुवृत्तिस्तु न विच्छिन्नत्वात्। = स्त्रिया इत्यनुवर्त्तनादिति। श्रीतरे सादिश्या इत्यर्थ इति भावः। =

= एवं च ङीग्रहणमसाध्याने पक्षे ... इति निवन नकृत्प्रमिति मत्वाह। =

भा० कौ० ६
१२२

आन्महतः समानाधिकरणजातीययोः। महद्भूत इति। महच्छब्दो भूतशब्दश्चैकस्मिन्नर्थे चेद्वर्तेते इति सामानाधिकरण्यात्वं प्राप्नोति। अन्यप्रकृतिरि

ति। अन्यस्य महतः प्रकृतिः कारणमन्यप्रकृतिर्महान्भूतप्रकृतावितिभूतशब्दस्य प्रकृतिः कारणमित्यर्थप्रतिपादनाय शब्दोच्चारणाच्छब्दस्यार्थः कार

णमुच्यते तदयमर्थो भूतशब्दार्थे महान्वर्तते। अमहतो भूतेन सामानाधिकरण्यं न तु महत इत्यर्थः। महान्महत्त्वेवेति। महच्छब्दो महत्त्वेव वर्तते न तु भूता

=कर्तृस्थेऽर्थस्यार्थः। २=

आन्महतः॥ इह कस्मान्न भवति अमहान्महान्संपन्नो महद्भूतश्चन्द्रमा

इति। अन्यप्रकृतिर्महान्भूतप्रकृतौ महान्महत्त्वेव। अन्यो महान् अन्यः

अमहान्भूतप्रकृतौ वर्तते। महान्महत्त्वे वर्तते तस्मादात्वं न स्यात्॥ तस्मादात्वं

न भविष्यति॥ ॥ ॥श्री॥ ॥

र्थेऽभिविषये हि प्रकृतिः कर्त्री न विकृतिः। तथाहि। संख्ये भवति ब्राह्मणाः पटी भवन्तीति तत्र वर इति प्रकृतिसंख्याश्रयं वचनं दृष्टं तेन विकृतिसंख्याश्रयं तथा अ

त्वं त्वं संपद्यते त्वद्भवतीति प्रकृत्याश्रयः प्रथमपुरुषो भवति न विकृत्याश्रयो मध्यमपुरुषः। तत्र भूत इति निष्ठाप्रत्ययो भवनक्रियायाः कर्तर्ययं महत्सु सन्नो न तु

९ विकारे महति॥ ॥श्री॥ ॥श्री॥ ॥

रा० मं०
१२२

पुंवत्त्विति। वैयधिकरण्यात्तत्त्ववत्पुंवद्भावोऽपि न प्राप्नोति। यथा च प्रकृतेः कर्तृत्वं दृश्यते तथा विकृतेरपि सुवर्णपिण्डः खदिराङ्गारसवर्णौ कुण्डले भवत इति विकारसंख्या अयद्विवचनदर्शनात्तथा अष्टौ पि संपद्यमाने चतुर्थी नि विकाराच्चतुर्थी दृश्यते न प्रकृतेः। मूत्राय संपद्यते यवागूः उच्चारणाय कल्पते यवान्नमिति तथा संघो ब्राह्मणाः संघः संपद्यते अपरः स्तनवृः परः संपद्यते इति विकारसंख्या अयं वचनं दृश्यते। तत्र यदिमहद्भूते त्यत्र सामानाधिकरण्यमाश्रित्य पुंवद्भावो विधीयते तदा गोमती भूते त्यत्रापि प्राप्नोति। अनाल्वप्रसंगश्च। तत्र पुंवद्भावं तावत्साधयितुमाह। एवं तर्हीति। अमहत्सर्पे महच्छब्दो वर्त्तत इति भूतशब्द सामानाधिकरण्ये पुं

=तेन संपत्तिक्रियाकर्तरि विधीयमाना चतुर्थी विकारादेवोत्पद्यते इति विकारस्यैव कर्तृत्वमावेद्यत इत्यर्थः। १८= अमानिनत्वेन निजा प्रयोगमुगं द्विकालवचाधिकुत्राः धिरं स्थितमिति मिश्री हर्षप्रयोगे एवैष गतिः।१८= =१९...

पुंवत्तु कल्पं भवेदत्र। पुंवद्भावोऽपि तर्हि न प्राप्नोति। अमहती महती संपन्ना महद्भूता ब्राह्मणी। एवं तर्हि अमहन्महान् हि ह्ति तत्र स्त्त्वद्वाची चात्र भूतशब्दोऽयं॥ ॥ अमहतिहि महत शब्दो वर्त्तते तद्वाची भूतशब्दो [redacted] यं प्रयुज्यते॥ ॥ किं चाचीन हद्वाची॥ तस्मात्सिध्यति पुंवत्। तस्मात्सिध्यति पुंवद्भावः॥ ॥ ॥ श्री॥ ॥

=ननु महद्वाची सन्पुंकं च्व्यन्तेन प्रकृतेरेव कर्तृत्वादत आह। अयं भावः इति। १८= संमूर्छित इति। उभयरूपतयाध्यवसीयमानत्वात्। अभिधीयत इति। च्व्यन्तेन निर्देशः। एवं चैकस्यैव वस्तुनः कर्तृत्वं तस्योपाधित्वमिति कल्पितमिति विरुद्धरूपयोरपि कं=

वद्भावो भवतीत्यर्थः। महद्वाचीति। अयं भावः। च्व्यन्तेऽत्र महच्छब्दः। च्विप्रत्ययश्च यदा प्रकृतिर्विकाररूपतामापद्यमाना विवक्ष्यते तदोत्पद्यते परिणामविषयत्वात् च्विप्रत्ययस्य। यदा चैकोऽर्थः प्रकृतिविकारात्मकतया आश्रीयते तदा परिणामव्यवहारो भवति। यथोक्तम्। जहद्धर्मो नरं पूर्वमुपादत्ते पदापरं। तैत्वा दृश्यतो धर्मी परिणामः स उच्यत इति। यदा तु न त्त्ववस्थापूर्वावस्थावानाश्रीयते तदा च्व्येर्भावस्तत्तत्तोऽभवन्तिप टो भवतीति। उक्तं च हरिणा। पूर्वावस्थामविजहत्संस्पृशन् धर्ममुत्तरं। संमूर्छित इवार्थात्मा जायमानोऽभिधीयत इति। तत्र विकारस्य कर्तृत्वात् भूतशब्देन सामानाधिकरण्यान्न सिद्धः पुंवद्भावः॥ ॥

=जरदिति। नत्वसत्कार्यात्। किं चिदन्यथात्वं यथावस्थायां स्थितं द्रव्यादित्यवस्थायां

माᵒकैᵒ ६
१२३

निवर्त्स्यमिति। पुंवद्भावव्यवहारत्वस्यापि प्रसंगात्। तदत्र क्वचित्सामानाधिकरण्यं क्वचिद्वैयधिकरण्यम्। अस्य प्रयोगः समर्थ्यते महद्भूते सत्र विकारभागः कर्तृ-
त्वेनाश्रीयते। गोमती भूते सत्र तु प्रकृतिभागो महद्भूतश्चंद्रमा इत्यत्रापि प्रकृतिभागः संघीभवंति ब्राह्मणा इत्यादौ तु प्रकृतेरेव कर्तृत्वं। च्व्यंतस्य गतित्वात्ग-
तीनां च क्रियाविशेषकत्वात् संघीभवनलक्षणायां विशिष्टायां क्रियायां ब्राह्मणानां कर्तृत्वात्। संघः संपद्यते इत्यादौ तु वाक्ये जन्ममात्रस्य संघः कर्ता यथा
व्याकरणस्य सूत्रं करोतीति मात्रस्य सूत्रं कर्म व्याकरणं सूत्रयतीत्यत्र विशिष्टस्य करोतेर्व्याकरणमेवमिहापि कृतिविकृत्योर्भिन्नक्रियाविषयकर्तृत्वं तेनेहत्वतोप्र-
कृतिसंख्याश्रयं वचनमेवं महद्भूतश्चन्द्रः प्रकृतेरेव कर्तृत्वमवगमयितुं शक्यो महद्भूते सर्यं तु विकृतेरिति दोषाभावः [redacted] तत्र तु
तीतिकर्तृ प्र
यद्येवमात्वमपि प्राप्नोति महद्भूतश्चंद्रमा इति निवर्त्स्यमात्वं तु मन्यंते। आत्वमपि प्राप्नोतीति नैष दोषः। कथं यत्तु महतः प्रतिपदं समास उक्तः तद्वा-
श्रयं ह्यात्वं कर्तव्यम् मन्यंते न लक्षणेन लक्षणोक्तस्यायां। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यः समासो विहितः तस्य
ग्रहणं लक्षणोक्तस्यायां। इहापि तर्हि न प्राप्नोति महान्बाहुरस्य महाबाहुरिति॥ ॥श्री॥ ॥७॥

विकृतेः कर्तृत्वे प्रकृतिरनुमानिकी। महती संपन्ना केतिसामर्थ्यादेवा महतीति गम्यते प्रकृतेस्तु कर्तृत्वे सामर्थ्याद्विकारावस्थापनीयते। महान् संपन्नः केन धर्मे-
ति महत्वेनेति गम्यते। अल्पत्वं संपद्यते लघुवती सत्र तु वक्तौ वा केवल प्रकृतेरेव कर्तृत्वमिति नराश्रयः पुरुषो भवति। मध्यमे तु क्रियमाणे पुष्पादयस्य प्रकृतित्वं प्र-
तीयेत त्वमन्यो भवसि सर्वे त्रचात्र शब्दशक्तिः प्रयोगानुसारिणी प्रमाणमेष तु न्यायो महद्भूतइ सत्र परिहारेण तरसंभवात्। महद्भूते सत्र च पुंवद्भावव्यवहारत्वप्रसंगा-
त् भाष्यकृतानोक्तस्तं दर्शयति। यत्तु महत इति। सन्महदिति प्रतिपदोक्तसमासस्येह ग्रहणं महद्भूतइ सत्र तु कुगतिप्रादय इति लाक्षणिकः समास इत्याल्वा
९ भावः॥ ॥ श्री ॥

रामᵒ
१२३

नार्थं पुनर्विधा १ मुख्यमिव २

शेषवचनादिति। शेषग्रहणमन्यपदार्थग्रहणं वा कर्तव्यमन्यतरेणैव स्वलाभादुभयोपादानं तु पुनर्विधानाच्च प्रतिपदोक्तबहुव्रीहिर्भवतीत्यर्थः

संपद्यते। प्रधानतो वेति। यस्मात्प्रधानस्य वृत्तिरस्तीति तस्माद्गौणस्यात्वं न भवतीत्यर्थः। गुणशब्दागतो गौणः। मुख्यः प्रधानमित्यर्थः। शाब्दाद्विम्बो

य इति यमस्य यः। लोके हि शब्दैरुच्चारितैर्गौणमुख्ययोर्मुख्ये संभवे मुख्य एवार्थे कार्याणि क्रियन्ते व्याकरणेपि स्वं रूपमित्यत्र स्वरूपग्रहणेन ज्ञा

पितं रूपवदर्थोऽप्यंगीक्रियत इति तत्रापि मुख्यस्यैवार्थस्य कार्ये ग्रहणं करणं कथं पुनरत्र गौणता महदर्थस्य उच्यते। यस्मादुपचरितं महत्त्वं समुदायो

= ननु शेषग्रहणं प्रथमान्तानां समासः आर्थ येन द्विभावे मत्रे बाधिका तस्मादित्यर्थता आर्थं च अन्यपदार्थग्रहणं च न यायाताः संतीत्यत्र मास्माहीति या आर्थमात्र दित्यर्थ मिति चेन्न पंचधा मुख्य वंतो स्पमि बहुव्रीहेर्दिवा मभिधानेन न तस्यापि =

योषवचनात्तु योऽसौ समासारंभात्कृतो बहुव्रीहिः तस्मात्सिध्यति तस्मिन्। यस्माच्छेषो बहुव्रीहिरिति सिद्धे नेकमन्यपदार्थे इत्याह ते

न प्रतिपदोक्तं तत्र भवति [redacted] प्रधानतो वा यतो हेत्रिः। अथ वा गौणमुख्ययोर्मुख्ये संप्रत्ययः यथा गोरनुबन्ध्यः जोऽग्नीषोमी

य इति न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्र

१ यं शब्दमात्रे तद्भवति॥ ॥ ॥

= कथं तर्हि दिशं का उपजनं पुंवद्भावे विकल्प रूपार्थोपस्थिता गौणमुख्यन्यायाय बाधो तस्मात्। तत्रोपलक्षितं शंका पाउत्तरमाह एवं तर्हि इति। मुख्यमेवेति। तस्यैवार्थस्योपस्थिते रिति भावः। कंठतः रूढ तथा कोत्तरमाह गोमव दिति। १ =

र्थः। चर्च्यं तेन पूर्वावस्था उपचरितो न त्वावस्था। थो त्वाभिधीयत इति महत्त्वमप्यस्य उपचरितमिति गौणत्वाभिधायी महदर्थो योगो वाहीक इति वाहीके गौ

शब्दः। पुंवद्भावे तु शब्दविशेषस्यानाश्रयणाद्गौणमुख्यन्यायानवतारान्महद्भूतेति पुंवद्भावः सिद्धः। कथं तर्ह्योदित्यत्र शब्दविशेषानाश्रयेपि गौणे भवदि

त्यत्र गौणमुख्यमेव तदाश्रयश्च पुंवद्भावो गौणमतीभूते त्यत्र तु महत्तेः कृत्वाश्रयणाद्वैयधिकरण्यात्संवद्भावाभावः। गौणे भवदित्यत्र त्वोदंतस्य निपातस्य गौ

× न्यायाश्रयेण प्रत्यस्य संज्ञापरिहृता। एवं तर्हि महद्भूते त्यत्र स्त्रीत्वमर्थस्य मुख्य × १ ॥ १ णत्वात्प्रत्यसंज्ञाभावः॥ ॥

भा०कै०६ शब्दा अर्थे चरितार्थत्वात् इति। प्रातिपदिकस्य सर्वनामस्थाने इत्यम् शसो ग्वरुत्थात् लविधानात् प्रातिपदिकस्यैवान्वयव्यतिरेकाभ्यां कल्पिताभ्यामर्थवत्त्वात्कल्पनात्र
१२४ स्यामवस्थायां नास्ति गौणार्थत्वं पदान्तरसंबंधे हि परस्य गौणार्थताभिव्यक्तिः। अथवा शब्दो न कदाचित्स्वार्थपरित्यागेनार्थान्तरमभिधातुमिति सत्व प्रसंग
त् शब्दार्थसंबंधस्य गौणत्वं तु कश्चिदारोपितं गोशब्दस्य प्रयोजकं गौर्वाहीक इति कश्चित्तु मुख्यं यथा रज्जुः सर्पत्वेनाध्यवसायस्य शब्दः प्रयुज्यमानो न स्वार्थं
जहाति अर्थस्तु विपर्यस्तः। तत्र परस्य पदान्तरसंबंधे ऽर्थविपर्यासः संभवात् परकार्ये ऽपेक्षैव गौणमुख्यन्यायो न प्रातिपदिककार्ये ऽपि विपर्यस्त एव वा

=अनुपसंहृत्यप्रयुक्तौ गौणत्वं प्रकार्यं तत्तरेण एह अप्यवेति·१=

घासश्रये च दृष्टत्वात्। महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं चासमानाधिकरणार्थं महदात्वे घासकरविशिष्टेषूपसंख्या
नं कर्तव्यं पुंवद्भावश्चासमानाधिकरणार्थोद्देश्यः। महतो घासो महाघासः॥ महतः करो महाकरः॥ महतो विशिष्टो महाविशिष्टः॥
अष्टनः कपाले हविषि उपसंख्यानं कर्तव्यं। अष्टाकपालः। हविषीति किमर्थं॥ [redacted] ॥ श्री॥ ॥

र्थे दृष्टत्वे अनुभूय गोशब्दो वाहीके समारोपितगोत्वे प्रवर्त्तते। अग्निसोमौ माणवकाविति मन्त्राग्नेः स्तुत्सोमसोमा इति षत्वं न भवति। गौणत्वादग्निसोमश
ब्दार्थयोः प्रसिद्धप्रसिद्धिकृतत्वान्मुख्यगौणव्यवस्थायाः। महदात्व इति केचि दन्वाचये च शब्दं मन्यमाना महतो घासो महाघास इत्यत्राप्यात्वं वर्णयं
ति। यथा तु भाष्यं तथा समुच्चये चशब्द इति पुंवद्भावसन्नियोगेनात्वविधीमानमन्यत्र न भवतीति लक्ष्यते। अष्टाकपाल इति। अष्टसु कपालेषु संस्कृ एम०
त इति तद्धितार्थे समासः संस्कृतं भक्षा इत्यण् तस्य द्विगोर्लुगनपत्ये लुक्॥ ॥ श्री॥ ॥ १२४

अष्टकपालमिति। समाहारे द्विगुः पात्राद्यन्तः प्रतिषेध इति स्त्रीत्वाभावः। अष्टागवेनेति। अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ द्वयोर्द्विगुर्गोरतद्धितलु
कीति टच् समासान्तस्तत्र दीर्घत्वेन युक्तार्थसंप्रत्ययानुगतार्थत्वाद्युक्तशब्दस्य निवृत्तिरथवा समाहारे द्विगुस्तत्र साहचर्यादभेदोपचारादष्टागवेन युक्तं शकटम

अष्टकपालं ब्राह्मणस्य। गवि च युक्ते। गवि च युक्त उपसंख्यानं कर्तव्यं। अष्टागवेन शकटेन। युक्त इति किमर्थं। अष्टगवं ब्राह्मणां(स) अन्यप्रकृतिरम
हान्भूतप्रकृतौ महान्महत्स्वेव। तस्मादात्वं न स्यात्सुवनुकर्षं भवेदत्र। अमहति महानहन्तस्तद्वाची चात्र भूतशब्दोऽयं तस्मात्तिप्राप्ति पुंवत्त्वे वर्त्तमा
त्वं तु मन्यते। यस्तु महतः प्रतिपदं समास उक्तस्तदाश्रयं स्यादात्वं। कर्तव्यमन्यं तेन लक्षणेन लक्षणे कृत्स्नायं। शेषवचनानुयोः सौप्रत्यारंभात्
तो बहुव्रीहिः तस्मान्न सिध्यति। तस्मिन्प्रधानतो वा यतो वृत्तिः। द्व्यष्टनः। प्राक्शतादिति वक्तव्यं। इह मा भूत् द्विशतं॥ द्विसहस्रं अष्टसहस्रं। वि अष्टशतं४
भाषा। सर्वेषां ग्रहणं किमर्थं। चत्वारिंशत्प्रभृतौ सर्वेषां ग्रहणं सर्वेषां विभाषा यथा स्यात्। द्व्यष्टनः त्रेश्चैतदस्ति प्रयोजनं प्रकृतं द्व्यष्टनोर्ग्रह
णमनुवर्त्तिष्यते। यदीतरन्नु वर्तते। त्रेस्त्रयस द्व्यष्टनोरपि त्रयस्त्रादेशः प्राप्नोति। नैष दोषः। मंडूकगतयोऽधिकाराः। तद्यथा मंडूका उ
त्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः त्रेस्त्रयः। ततो विभाषा चत्वारिंशत्प्र
भृतौ सर्वेषामिति॥ ॥

=विधयभेदेन वाक्यभेदस्य युक्तत्वात्। एकेति। प्रतिपत्तिवाक्यमेकं प्रक्रियावाक्यं तु भिन्नमिति भावः।२=

ष्टागवमुच्यते। विभाषा। मंडूकगतय इति। द्व्यष्टशब्दार्थं त्रयआदेशो न शक्नोति वक्तुमिति त्रयआदेशेन संबंधाभावादिहैव द्व्यष्टनोरभिसंबंधः। अथवेति।
एका भवति क्रिया आत्त्रयआदेशकर्तृकोपादीयते। ततो यस्मिन्काले द्व्यष्टनोरात्वं तस्मिन्नेव त्रिशब्दस्य त्रयआदेश इत्यर्थः॥ ॥ ॥

हारः समानाश्रयवचनात्सिद्धमिति कथं आणि अकारलोपः आणंतस्य ईतियलोपः प्रस्थादिषु प्रेयान् स्थेयान् प्रस्थादीनामसिद्धत्वात् प्रकृत्यैका
र्थे सौरीति सूर्येणोकृदिकृ इत्यण यस्येति लोपस्ततो ङीप् पुनर्यस्येति लोपः तत्र द्वयोर्लोपयोरसिद्धत्वाद्यकार उपधा न भवतीति यलोपाप्रसंगः ननु च माग्भादसि
द्धत्वे लोपद्वयस्यासिद्धत्वादुपधायकारो न भवतीति लोपस्याप्रसंग एवस्थानिवद्भावोपि यलोपविधौ प्रतिषिद्धः भूतपूर्वगत्योपधाश्रयणाददोषः वचनसामर्थ्याद्वा सर्वे यलोपः

पश्चादकारलोपः इति क्रम आश्रयिष्यते निसत्वे प्यकारलोपस्य॥ ॥७॥

भा० कौ० ६ टिलोपोपीति नन्वादेशलक्षणः प्रकृतिभावोसिद्धत्वान्न भवतीति वृकुयुक्के टिलोपः पुनरुत्सर्गलक्षणः प्राप्नोति नैष दोषः आदेशेन निरवकाशत्वात्सर्वं नेन स्था
१५३ निनो निवर्जितत्वादसतः कुतः टिलोपः तत्रयद्यपि प्रादीनामसिद्धत्वात्प्राकृ टिलोपः क्रियते तेन यथाप्यादेशे पुत्रते पुत्रे पाम सिद्धत्वान्न तद्लक्षणः टिलोपो ना
प्युत्सर्गलक्षणः उत्सर्गेषु प्रागेव प्रवृत्तत्वात् अनवकाशत्वाच्च प्रादीनां चकुकुदो दोषोपिनास्ति आन्नलोपः किमर्थमिति यथांतरेण मकारनिर्देशं प्रादितिश्च
मेव गृह्यते ऽन्यस्यासंभवात् तथा विनापि शिन्निर्देशेन श्रमेव यहीष्यत इतिभावः नंदितेति इदित्वमस्य किमर्थं स्यादिति चेत् उपदेशावस्थायां नुमिस्तति

× [यथैव प्रस्यादीनामसिद्धत्वात्प्रकृतिभावो न भवति ४१]

एवं टिलोपोपि न भविष्यति आन्नलोपः अथ किमर्थं श्नमः सशकारस्य ग्रहणं क्रियते न नान्नलोप इत्येवोच्येत नान्नलोप इत्युच्य
माने नंदिता नंदक इत्यत्रापि प्रसज्येत एवं तर्हि वक्ष्यामि नान्नलोपोऽनिदितां नेतं हल उपधायाः क्ङितीति अनिदितामिति नैवं शक्यं इ
ह हि न स्यात् हिनस्ति तस्मान्नैवं शक्यं न चेदेवं नंदिता नंदक इत्यत्रापि प्रसज्येत एवं तर्हि क्ङितीत्यनुवर्तते एवमपि हिनस्तीत्यत्र न प्राप्नो
ति नैषा परसप्तमी का तर्हि सत्सप्तमी क्ङितिसति एवमपि नंदमान इत्यत्रापि प्राप्नोति॥ ॥ श्री ॥

=तस्मिन्ननुवर्तमाने गुरोश्च हलः इत्यनेन ११= देवा१

अप्रत्ययादित्यकारार्थं तथा न नंदतुरिसादौ कृते पि न लोपेतस्यासिद्धत्वात्प्रासलोपा परत्वस्यैव स्यात् क्ङितिसतीति श्रमेव हि दस्ति इति हिनस्तीत्यादौ न लो
पः सिद्धः कथं पुनः संभवं सा परसप्तम्यां सत्सप्तमी शक्याविज्ञातुं यथेष्टं वाक्यशेषाध्याहारादद्दोषः क्ङितिसतीत्येवं हि विज्ञायमाने पौर्वापर्यानाश्रयणान्नास्तित
स्मिन्निति इत्यस्याः परिभाषाया उपस्थानं यदा त्वोपश्लेषिकेऽधिकरणे सप्तमी तदा किं सर्वस्य कार्यं अथ परस्येति अनियमप्रसंगे नियमाय परिभाषोपस्थानं राम०
नंदमान इति ताच्छील्यादिषु चानशि कृते शपि वचान प्रो व्यवहितस्यापि ङितोऽभावान्नलोपप्रसंगः क्वचिन्नंद्यमान इति पाठस्तत्र यगाश्रयो नलोपप्रसं १५३
१ गः अर्थवद्ग्रहणपरिभाषात्तु विकरणानां मानर्थक्यान्नोपन्यस्ता॥ ॥

=नंदतेः परस्मैपदितादानशो ऽभावेः १७=

=अप्रत्ययादित्यकीत्यत्रादिविकरणं ङितमाश्रित्य मुख्यसोबुकः स्यात् १=

नशब्द एवेति अर्थवशाद्विभक्तिविपरिणामो भवतीति सप्तमी पष्ठ्या सोगेन पञ्चम्याश्रयणात् प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इत्यत्र परिहारः संभवति यत्नानामिति पूर्वेत्रासि
द्धमिति ष्टुत्वस्यासिद्धत्वान्नशब्दात् उत्तरो नकारः परत्वान्नलोप इति अग्नीनामित्यादौ नामीति दीर्घत्वं सावकाशं नलोपो हि न स्तीत्यादौ सावकाशो यत्नानामित्यादावुभयप्रसं
गे परत्वान्नलोपप्रसंगः पञ्चसु पि चेति दीर्घत्वं न तस्मिन्निपातनलक्षणपरिभाषावशान्न भवति लक्षणप्रतिपदोक्तयोरिति लाक्षणिकस्यानुमेयरूपत्वादित रस्यतु मत्यक्ष

=नामीत्यनेन नलोपः अप्रमाणमर्थादि रिः आ बाध्यते कृतेनामित्यर्थकृते नामीत्येवमदेवः एवं चनलिङ्कितिन कर्त्तव्यं भवतीत्याचमदितिभावः=

एवं तर्हि नशब्द एवात्र क्रियते न विशेष्यते किं चेन्नशब्दो भवति एवमपि यत्नानां यत्नानां इत्यत्र प्राप्नोति दीर्घत्वमत्र बाधकं भविष्यति इदमत्र संप्र
धार्यं दीर्घत्वं क्रियतां नलोप इति किमत्र कर्तव्यं परत्वान्नलोपः तस्मात्तत्र शकारस्य ग्रहणं कर्तव्यं अथ क्रियमाणेपि सकारग्रहणे इह कस्मान्न भवति
विश्नानां प्रश्नानां इति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति अनिदितां हल उपधायाः अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरवि
कारयोरुपसंख्यानं अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानं कर्तव्यं विलगितः विकपितः उपतापशरीरविकारयोरिति किम
र्थं विलङ्गितः विकम्पितः बृंहेरच्यनिटि बृंहेरच्यनिटि उपसंख्यानं कर्तव्यं निबर्हयति निबर्हकः अचीति किमर्थं निबृंह्यते अनिटीति किमर्थं नि

=व्यतिरेकदर्शनः॥२=
१ बृंहिता निबृंहितुं न वार्हि उपसंख्यानं कर्तव्यं न कर्तव्यं॥ ॥ ॥

त्वात् यदा तु विकरणानामपि सार्थेनार्थवत्ताश्रीयते तदा यथेव ग्रहणपरिभाषया विश्नानां प्रश्नानां इति नलोपाभावसिद्धिः अनिदितां हलः विलगित इति गत्यर्थत्वात्क
र्तरि क्तः कृछ्रप्राप्तिरत्रोपतापो गम्यते न तु रोगो यथा दुःखोपतापगर्व्यादिति अन्यथा शरीरविकारग्रहणं केवलं कुर्यात् विकपित इति गत्यर्थो कमे केतिगत्यर्थत्वात्कर्तरि
क्तः शरीरविकारो व्याधिरुच्यते न तु स्थौल्यादि कं पेरत द्विषयत्वात् बृंहेरिति वृहि वृद्धावित्यस्य॥ ॥श्री॥ ॥

वृहिंप्रकृसंतरमिति वृह वृहिवृद्धाविति पाठात् अजादावपिन दृश्यत इति ननश्चदोषायैवोपसंख्यानं स्यान्न धातुलोप इति गुणनिषेधनिवारणाय यत्नश्चकने
व्यः स्यादि सनारंभणी यमेवोपसंख्यानं रजयतीति नलोपे वृद्धौ च जनी ज्रृष् क्नसुरजो मंताश्चेति मित्वात् ह्रस्वः प्रत्ययांत स्येति शावंत स्येत्यर्थः यङ्लुङ्क्षु ० त्यर्थे
श्चतत्र शपृनिर्देशः घिनुणनुताच्छील्ये विधीयते शृ० शब्द प्रकाराश्च ताच्छीलिका इति यङ्लुगंताद् ज्ञेनं भवति औणादिका इति रजक इत्यत्र क्वुन् शिल्पि

= ननु घिनुणिधावपिरंजेश्चेति नलोपेन रंजेर्निपाता निर्देशोयक्लुङ्धिवत्यर्थ एवेत्यत आह: घिनुणिति: १ =

वृहिःप्रकृसंतरं कथंज्ञायते अचीति लोप उच्यते ऽनजादावपिदृश्यते निवृह्यते अनिटीत्युच्यते इडादावपिदृश्यते निवर्हिता निवर्हितुं अ
जादावपिनदृश्यते निवृंहयति निवृंहकः रंजेर्णौ मृगरमणे रंजेर्णौ मृगरमणे उपसंख्यानं कर्तव्यं रजयति मृगान् मृगरमणे इति किमर्थं रं
जयति वस्त्राणि घिनुणिच घिनुणिचोपसंख्यानं कर्तव्यं रागी घिनुणिनिपातनात्सिद्धं किं निपातनं त्यजरजेति अपशब्दो धातुनिर्देशो नि
न पातनत्वं आश्रयितुं इह हि दोषः स्यात् दशनहं करणे दंष्ट्रा नैतद्धातुनिपातनं किं तर्हि प्रत्ययांतस्यैतद्रूपं तस्मिंश्च प्रत्यये लोपो भवति दंशसंज
स्वंजां शपीति रजकरजनरजः सूपसंख्यानं रजकरजनरजःसूपसंख्यानं कर्तव्यं रजकः रजनं रज इति रजकरजनरजःसु किलात्सिद्धं कितएवै
ते औणादिकाः नद्यथास्त्र चकः भुवनं शिर इति शास इदङ्हलोः शास इत्वे आशासः क्वौ उपसंख्यानं शास इत्वे आशासः क्वौ उपसंख्यानं कर्तव्यं
आशीरिति किंपुनरिदं नियमार्थं आहोस्विद्विध्यर्थं कथं नियमार्थं स्यात् कथं वा विध्यर्थं यदितावच्छासिमात्रस्य ग्रहणं ततो नियमार्थम्॥ ॥

संज्ञयोरिति क्वुन्प्रत्ययः रंजकीति पुंयोगादाख्यायामिति ङीष् पुंयोगे तु ङीषानमात्रमितिभाष्यकाराभिप्रायः रजनमिसत्र रंजेः क्युन्प्रत्ययः स च बाहुलकादिति
द्रष्टव्यः तेनरजनीतिङीप्भवति रज इत्यत्र भूरंजिभ्यां कित् इत्यसुन्प्रत्ययः किद्भवति शास इदङ्हलोः शासिमात्रस्येति शासु अनुशिष्टावित्यस्य आङः शा
सु इच्छायामित्यस्य चेत्यर्थः नियमार्थमिति क्वावेवाशास इत्वं यथा स्यादाशास्त इत्यादौ मा भूत् इत्यर्थः॥ ॥ ॥

= ननु शिल्पिनि ष्वुन् भावे रजकी ति ङीष् स्यादित आह: रजकीति १ =

राम० १५४

यस्माच्छासेरिति शास्तुरनुशिष्टाविति यस्मादङ्विहितः सन्निति शास्त्यर्थिन्यप्यस्ति तत्र परस्मैपदाधिकारान्नन्वाङः संसर्गो हि शिष्टस्य शासो ग्रहणं संसर्गस्य विशिष्टस्येति हेतुत्वात् यथा सक्तिशोणी धेनुरानीयतां सवत्सा सकरभेति विशिष्टा धेनुः प्रतीयते यद्येवं शासिमात्रग्रहणं कथमाशंकितं अथ हलोप्युपादानात् तस्य च शासिमात्रेण संबंधसंभवात् इत्युच्यते तत्र साधारणासाधारणसन्निपातेप्यसाधारणसंबंधिग्रहणं दृश्यते यथा दृष्टानां किशोरीणां च मध्ये धेनवो ध्यंतामित्युक्ते वडवा एव बध्यंते न तु गवादयः एवं तर्हि एकशेषाद्याश्रयणाच्छासिमात्रग्रहणपक्षसंभवः यद्यपीति आचार्यदेशीयस्येदं वचनं विध्यर्थैवाशास्त इत्यादाविलमनिवारितं

बर

अथ हि यस्माच्छासेरङ्विहितः तस्य ग्रहणं न तो विध्यर्थेम् यद्यपि शासिमात्रस्य ग्रहणं एवमपि विध्यर्थमेव कथं अङ्हलोरित्युच्यते न चात्र हलादिं पश्यामः ननु च क्विब्हलादिः क्विपो लोपे कृते हलाद्यभावान्न प्राप्नोति इदमिह संप्रधार्यं क्विब्लोपः क्रियतां अङ्हलोरित्वमिति किमत्र कर्तव्यं परत्वादङ्हलोरित्वं नित्यः क्विब्लोपः कृतेप्यङ्हलोरित्वे प्राप्नोति अकृतेपि नित्यत्वात् क्विब्लोपे कृते हलाद्यभावान्न प्राप्नोति एवं तर्हि प्रत्ययलक्षणेन भविष्यति वर्णाश्रयेनास्ति प्रत्ययलक्षणं यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवंति तथा चेदमपि भविष्यति॥ ॥

स्यात् आर्यशीरित्यत्र च न प्राप्नोति यदि वेति यथैवेत्यर्थः तथा चेति तथैवेत्यर्थः यत्र कार्ये वर्णरूपमेव निमित्तत्वेनोपादीयते तत्र प्रत्ययलक्षणेन न भवति यथा रायः कुलं रैकुलमित्यायादेशः यत्तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव यथा तृणेढीति हलादौ पिति सार्वधातुके विधानात् प्रत्ययनिमित्तत्वादीमागमः इत्वमपि हलादौ प्रत्यये क्विपि विधीयमानं प्रत्ययनिमित्तत्वात् प्रत्ययलोपे भवति॥ ॥ श्री॥ ॥ ॥

भा० कै० ६ अथवेति वर्णाश्रयत्वात्प्रत्ययलक्षणेनाप्राप्तमित्त्वं क्वावित्यनेन विधीयते अविशेषेणेति प्रत्ययमात्रे क्ङितीत्यर्थः अङ्ग्वेवाजाद्याविति तेन शास्ति शिष्ट शास्तुरि
१५५ सात्त्विलाभावः हलादौ क्ङिति क्वौ च नियमाभावादित्त्वं भवत्येव तुल्यजातीयापेक्षत्वान्नियमस्याजादिरेव व्यावर्त्यते इहापीति शास्तिमात्रग्रहणं मत्वाचो
दयति यस्माच्छासेरिति वाक्यान्तरे श्रुतः संसर्गी विशेषावगतिहेतुर्भवति यथा धेनवो मुच्यन्तां किशोरीव त्सतामिति वत्सवाए वृषपतीयन्ते निपातनादिति य

अथवैवं वक्ष्यामि शास इदङ्हलोः ततः क्वौ च शास इद्भवति आर्यशीः मित्रशीः ततः आङः आङ्पूर्वाच्च क्वौ शास इद्भवति आशीरिति इदमिदा
नीं किमर्थं नियमार्थम् आङ्पूर्वाच्छासः क्वावेव क्वमाभूत आशास्ते आशासते आशासमान इति तत्राहि वक्तव्यं न वक्तव्यं अविशेषे
ण शास इद्भवति इत्युक्ता ततः अङीति वक्ष्यामि तन्नियमार्थं भविष्यति अङ्येव अजादौ नान्यस्मिन्नजादौ इहापि तर्हि नियमादित्त्वं प्रा
प्नोति आशास्यते आशास्यमान इति यस्माच्छासेरङ्विहितस्तस्य ग्रहणं न चैतस्माच्छासेरङ्विहितः कथं आशीरिति निपातनात्सिद्धं किं
निपातनं क्षियाशीः प्रैषेषु तिङाकांक्षमिति अनुदात्तो अनुदात्तोपदेशे अनुनासिकलोपोल्यपि च अनुदात्तोपदेशे अनुनासिकलो
पोल्यपि चेति वक्तव्यं प्रमत्य प्रतत्य ततो वामः वा अम इति वक्तव्यं प्रयत्य प्रयम्य प्ररत्य प्ररम्य प्रणत्य प्रणम्य गमः क्वौ गमादीनामिति वक्त
=तेन न त्रमते नियमस्थितविभावामभ्युपगमे सिद्धिः सदिता:२= व्यं इहापि यथा स्यात् परीतत्सहकुण्डिकायाः॥ ॥श्री॥ ॥

यास्यासेतु एवोक्तेन न्यायेन प्रत्ययलक्षणासद्भावादार्यशीरित्यत्रेत्त्वं भवति आशीरित्यत्र तु निपातनादेव अनुदात्तो वाल्यपीति सूत्रन्यासेः विशेषेण विकल्पः
प्राप्नोति इति वार्त्तिकारम्भः तेनामन्तानां गमियमिरमिनमीनां ल्यपि विकल्पोन्येषां त्वनुदात्तोपदेशवनतितनोत्यादीनां नित्यं लोपः गमः क्वौ परीतदिति तनोतेः ए म०
क्विपि न लोपे कृते तु क्विन्हि हिवति वर्षीति पूर्वे पदस्य दीर्घः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ १५५
=सत्वे आङ्पूर्वस्यप्य सेर्ग्रहणाभावात्:२=

संयदिति यमेः क्विप् उुङ् चेत्यनुनासिकलोपो ऽकारलोपो ऽङ् च विनापि दिलेनां स्यसम्पति ध्यस्यकार इति नार्थो ऽदितग्रहणेन अग्रेगूरिति ओः सुपीति यणादेशो धा
तुत्वादुवङप्रसङ्गे ग्वाविति भूरिति अचिश्नुधातुभ्रुवां इत्यत्र भूग्रहणं नकर्त्तव्यं धातुत्वादुवङः सिद्धत्वात् जन अथ किमयमिति यदि द्वंद्वनिर्देशः ततः समुच्च
यः अथ सौत्रो निर्देशस्ततो विशेषणविशेष्यभाव इति पक्षद्वयसंभवः सिसनिषतीति सनीवन्तर्ध इति पक्षे इडागमः ततः सनिचेति अकृत्स्यार्थमेतत् जंनु

=सार्वधातिङ्गं ना[illegible] दाचार्यक्विवंता ऽत्मनेपदार्थं ...

संयत् सुनदिति तुङ् च तुङ्गमादीनामिति वक्तव्यं लोपश्च अग्रेगूः अग्रेभ्रूः जनसनखनां सञ्झलोः अथ किमयं समुच्चयः सनि
च झलादौ चेति आहोस्वित् सन् विशेषणं झल्ग्रहणं सनि झलादाविति किं चातः यदि समुच्चयः सन्यझलादावपि प्राप्नोति सिसनिषति जि
जनिषते चिखनिषति अथ सन् विशेषणं झल्ग्रहणं जातः जातवान् इत्यत्र न प्राप्नोति यथेच्छसि तथास्तु अस्तु तावत् समुच्चयः न
नु चोक्तं सन्यझलादावपि प्राप्नोति नैष दोषः प्रकृतं झल्ग्रहणमनुवर्त्तते तेन सनं विशेषयिष्यामः सनि झलादाविति अथ वा पुनरस्तु
सन् विशेषणं कथं जातो जातवानिति प्रकृतं झलि क्ङितीत्यनुवर्त्तते यद्येवं नार्थो झल्ग्रहणेन योगविभागः करिष्यते जनसनखनामनुना
सिकस्याकारो भवति झलि क्ङिति ततः सनि सनि च जनसनखनामनुनासिकस्याकारो भवति झलीत्येव तस्मान्नार्थो झल्ग्रहणेन सनोतेरनु
नासिकलोपादात्वं विप्रतिषेधेन सनोतेरनुनासिकलोपादात्वं भवति विप्रतिषेधेन सनोतेरनुनासिकलोपस्यावकाशः अन्येतनोसारयः

रित्यादौ आत्वस्य संगार्थो हि एवंत्र क्ङिद्ग्रहणानुवृत्तिः सनोतेरनुनासिकलोपस्येति सनोतेर्यो ऽनुनासिकलोपः प्राप्नोति तनोसादित्वात्सन्यस्येतनोत्पारयो
र्वकाश इत्यर्थः ॥ सनोतेस्तु तनोसादिषु पाठस्तनादित्वे नम्भ उत्त नादिभ्यस्तथासोरि सेवमर्थः ॥ ॥श्री॥ ॥७॥ ॥

भा० कै० ६ अन्येजनादय इति समुदायस्य कार्ये विधीयमाने भवयवानां प्रवृत्ते नैतत्कस्यचिदप्यवयवस्य कृतं समुदायस्य कृतं भवतीति भावः जनादय इति बहुवचननिर्दे
१५६ शः प्रयोगभेदादारोपितबहुत्वजनखनापेक्षः आत्वं भवतीति सातः सात्वानि स्यादौ सन्ग्रहणं तु सनोत्यर्थमेव सिषासतीति जनखनाम्प्रां तु सनः सेट्त्वा

अन्येजनादयः सनोतेरनुनासिकस्योभयं प्राप्नोति [redacted] आत्वं भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः नहि सनोतेरनुना
सिकलोपस्यान्ये तनोत्यादयोऽवकाशः सनोतेर्ये तनोत्यादिषु पाठः सोऽनवकाशः न खल्वप्यात्वस्यान्ये जनादयोऽवकाशः सनोतेर्यदात्वे ग्रहणं
तदनवकाशं तस्मानवकाशत्वादयुक्तो विप्रतिषेधः एवं तर्हि तनोत्यादिषु पाठस्तावत्सावकाशः कोऽवकाशः अन्यानि तनोत्यादिकार्याणि तना
दिभ्यस्तथासोरिति आत्वेऽपि ग्रहणं सावकाशं कोऽवकाशः सनि च ये विभाषा च उभयोः सावकाशयोः युक्तो विप्रतिषेधः एवमप्ययुक्तो विप्र
तिषेधः पठिष्यति ह्याचार्यः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति एकस्य हि नामाभावे विप्रतिषेधो न स्यात् किं पुनर्यत्रोभयं नास्ति
। नैष दोषः भवतीह विप्रतिषेधः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते आचार्यप्रवृत्तिर्ज्ञापयति भवतीह विप्रतिषेध इति यदयं घु
मास्थागापाजहातिसां हलीति हल्ग्रहणं करोति कथं कृत्वा ज्ञापकं हल्ग्रहणस्यैतत्प्रयोजनं हलादावीत्वं यथा स्यात् इह मा भूत् गोदः कंब
लद इति यदि चात्र विप्रतिषेधो न स्यात् हल्ग्रहणमनर्थकं स्यात् अस्त्वत्रेत्वं ईत्वस्यासिद्धत्वाल्लोपो भविष्यति पश्यति त्वाचार्यो भवतीह वि
प्रतिषेधः ततो हल्ग्रहणं करोति॥ ॥ श्री॥ ॥

तकृत्वादित्वाभावः भवतीह विप्रतिषेध इति विप्रतिषेधेन व्यवस्थायां क्रियमाणायां असिद्धत्वं न भवतीत्यर्थः गोद इत्यादावसति हल्ग्रहणे परत्वादीत्वं स्या राम०
दिति हल्ग्रहणं क्रियते असति हि विप्रतिषेधे द्वयोः परस्परस्मिन्नसिद्धत्वात्कृतेऽपीत्वे आल्लोपेन गोदादेः सिद्धत्वादनर्थकं हल्ग्रहणं स्यात्॥ ॥ १५६

नैतदस्तीति हलग्रहणस्य ज्ञापकत्वं विघटयति असत्यपि विप्रतिषेधे गोद इत्यादि न सिध्यति कृते इत्वे इयङादेशप्रसंगादिति तन्निवारणार्थं हलग्रहणं न ज्ञापकमित्यर्थः ज्ञापकबाधामाह ननु चासिद्धत्वादिति ज्ञापकभंगबाधामाह न शक्यमिति धियाविति दधातेः पिबतेश्च क्विपि लुप्ते पिप्रत्यय लक्षणेनेत्वं भवतीति तस्यासिद्धत्वे आश्रीयमाणे इयङ् न प्राप्नोतीति यदि अवश्यमाश्रयितव्यमीत्वस्यासिद्धत्वमित्यर्थः ज्ञापकबाधामाह नैतदीत्वमिति अभ्युपगम्यापीत्वमाह समानाश्रयमिति धियाविस्मादावीत्वं व्याश्रयं गोदइत्यादौ तु समानाश्रयत्वादियङ्सिद्धमेवेति ज्ञापकमेव हलग्रहणं स्थितं पुनर्ज्ञापकभंगं बाधामाह नास्ति चक्रकप्रसं

×बाधाह· व्यवस्थार्थमिति·ज्ञापक×१

नैतदस्ति ज्ञापकं व्यवस्थार्थमेतत्स्यात् हलादावीत्वं यथा स्यात् अजादौ माभूदिति किं च स्यात् यद्यजादावपि ईत्वं स्यात् इयङादेशः प्रसज्येत ननु चासिद्धत्वादेवेयङादेशो न भविष्यति न शक्यमीत्वं इयङादेशेऽसिद्धं विज्ञातुं इह हि दोषः स्यात् धियौ धियः पियौ पियः इति नैतदीत्वं किं तर्हि ध्याप्योः संप्रसारणमेतत् समानाश्रयं खल्वप्यसिद्धं भवति व्याश्रयं चैतत् कथं व्याश्रयं क्वावीत्वं क्विबंतस्य विभक्तौ इयङादेशः व्यवस्थार्थमेव तर्हि हलग्रहणं कर्तव्यं कुतो ह्येतत् ईत्वस्यासिद्धत्वाल्लोपः न पुनर्लोपस्यासिद्धत्वादीत्वमिति न त्र चक्रकं व्यवस्थाप्रसज्येत नास्ति चक्रकप्रसंगः न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यं शास्त्रतो व्यवस्था न त्र ईत्वस्यासिद्धत्वाल्लोपः लोपेना व्यवस्था न भविष्यति न खल्वपि तस्मिंस्तदेवासिद्धं भवति॥ ॥

=पुनर्यालोपस्यासिद्धत्वेप्यनेन शास्त्रेण स्वकृतेकार्येऽसिद्धत्वे पुनरीत्वप्रवृत्तिः ३=

गइति द्वयोरपि शास्त्रयोः परस्परतोऽसत्त्वं पुनः प्रवृत्तिकारणाभावादित्यर्थः लोपेनाव्यवस्थानमिति अथ विपरीतक्रमः कस्मान्न भवति पूर्वमाल्लोपस्यासिद्धत्वादीत्वमिति उच्यते अस्मिन्नपि क्रमे ईत्वस्यासिद्धत्वात्तु न ल्लोपो भविष्यति [redacted] लक्ष्यसंस्कारार्थत्वाच्छास्त्रस्य प्रवृत्तेः न खल्वपीति आल्लोपे कर्तव्ये ईत्वस्यासिद्धत्वं नत्वीत्वे कर्तव्ये अस्मिन्निदमसिद्धमिति भेदनिबंधनत्वाद्विषयविषयिभावस्य तत्रस्था ल्लोपो भविष्यति ननु पुनः पुन

भा०कै०६ १५७ पुनर्ज्ञापकभंगवाद्याह अवस्थार्थमिति नहि शास्त्रचक्षुरन्तरेणावचनमिदमिष्टमिदमनिष्टमिति निश्चीयते तदेवेति व्यक्तिपदार्थपक्षे प्रतिलक्ष्यं लक्षणभेदाद्द्वियवि
षयेऽपि विभागोपपत्तावीत्वशास्त्रमीत्वशास्त्रे एवासिद्धमिति पुनः पुनरीत्वप्रवृत्तेनादिपि च क्ङ्प्रसंग इत्यर्थः ज्ञापकवाद्याह एवं तर्हीति ई च भवतीति अजादौ क्ङितीति

अवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यं हलादावीत्वं यथा स्यात् अजादौ मा भूदिति कुतो ह्येतत् ईत्वस्यासिद्धत्वादाल्लोपः लोपेनावस्थानं भवि
ष्यति न पुनर्लोपस्यासिद्धत्वादीत्वमीत्वेन व्यवस्थानं स्यात् तदेव खल्वपि तस्मिन्नसिद्धं भवति कथं पठिष्यतीत्याचार्यः चिणो लुकि तग्रहणान
र्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति चिणो लुक् चिणो लुक्येवासिद्धो भवति एवं तर्हि यदि व्यवस्थार्थमेतत्तस्मात् नैवायं हल्
ग्रहणं कुर्वीत अविशेषेणायमीत्वमुक्त्वा तस्याजादौ लोपमपवादं विदधीत तदेतत्कथं इदमस्ति आतो लोप इटि चेति ततः घु मास्था
गापाजहातिसां लोपो भवति इटि च अजादौ क्ङितीति किमर्थं पुनरिदम् ईत्वं वक्ष्यति तद्बाधनार्थं तत ईत् ई च भवति घ्वादीनां ततः एर्लिङि.
वान्यस्य संयोगादेः नल्यपि मयते रिदन्यतरस्याम् ततः यति यति च ईत् भवति सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्धल्ग्रहणं करोति तद्गरी
यांसं यत्नमारभते तज्ज्ञापयत्याचार्यः भवतीह विप्रतिषेध इति सनः क्तिचि लोपश्चास्यान्यतरस्याम् इहान्यतरस्यांग्रहणं शक्यमकर्तुं कथं
सनः क्तिचि लोपश्च आत्वं च विभाषेति अपर आह सर्व एवायं योगः शक्योऽवक्तुं इह लोपोऽपि प्रकृतः आत्वमपि प्रकृतं विभाषाग्रहणमपि प्र पिप्र-
०तं तत्र केवलमभिसंबंधमात्रं कर्तव्यं सनः क्तिचि लोपश्च आत्वं च विभाषेति॥ ॥

त्यपेक्षन्ते सनः क्तिचि इह हल्प्रत्ययं साध्यं सातिः संतिरिति तच्च सनः क्तिचि लोपश्चेत्येतावति सूत्रेऽपि विभाषेत्यतो विभाषाग्रहणानुवृत्त्या सिध्यतीति मत्वाह ३ रा०म०
हेति सर्व एवायमिति सनः क्तिचीत्येव लोपस्य प्रकरणात्सिद्धत्वाल्लोपश्चेत्यपि न वक्तव्यमित्यर्थः बहूनां पदानां प्रत्याख्यानाच्च सर्व एवायं योग इत्युच्यते॥ ॥ १५७

सतिः २

आर्धधातु अथ द्वितीयाध्यायविहिता आर्धधातुकनिमित्ता आदेशा इहैव कस्मान्नोक्ताः एवं हि द्विरार्धधातुकग्रहणं न कर्त्तव्यं भवति नैवं शक्यं आभाच्छास्त्रीये कार्ये तेषां
असिद्धत्वप्रसंगात् ततश्चास्यादेशस्य भुवो वुक् न स्यात् अनादेशस्यैव तु स्यात् तथा च ख्यनुगि सादेश्ख्याभो सिद्धत्वादल्लोपाप्रसंगः कानि पुनरिति कानिचिदन्यथा

धिका

आर्धधातुके कानि पुनरार्द्धधातुकारस्य प्रयोजनानि अतो लोपो यलोपश्च णिलोपश्च प्रयोजनं आ
ल्लोपईत्वमेत्वं च चिणवद्भावश्च सीयुटि अतो लोपः चिकीर्षिता चिकीर्षितुं आर्धधातुक इति किमर्थं चिकी
र्षति नैतदस्ति प्रयोजनं अस्त्वत्र सनो अकारलोपः शपः अकारस्य श्रवणं भविष्यति शप एव तर्हि
माभूदिति एतदपि नास्ति प्रयोजनं आचार्यप्रवृत्तिर्ज्ञापयति नानेन शबकारलोपो भवतीति यदयं
अदिप्रभृतिभ्यः शपो लुकं शास्ति नैतदस्ति ज्ञापकं कार्यार्थमेतत्स्यात् विन्नोमष्ट इति॥ ॥

पिसिष्यंतीति प्रश्नः चिकीर्षतीति अकारोच्चारणं तु सनः प्रतीषिषतीत्यादौ द्विर्वचनार्थं स्यात् शप एव तर्हीति शब्विधानं तु प्रत्ययलक्षणेन गुणाद्यर्थं स्यात् अतो
दीर्घो यञीति अस्य सर्वत्राकारलोपे को वकाश इति चेत् वचनादतो लोपं बाधित्वा पचाव इत्यादौ भवत्येव तत्र च चरितार्थम् उपदेशाच्च सार्वधातुकानुदात्तत्वं ज्ञापकं सार्वधा
तुकेऽतो लोपाभावस्य कार्यार्थमे ततस्यादिति प्रत्ययलक्षणप्रतिषेधार्थमित्यर्थः॥ ॥

भा०कै०६
१५८

यत्तर्हीति यदि शपोतोलोपः स्यात् यावाप्रभृतय आकारांतामूर्वादिष्वेव पठेरन् नन्वत्वदादिषु लुङ्लोपयोस्तत्र विशेषाभावात् ननु शिंशयोश्चोद्यमिदं पाठसामर्थ्यकृतत्वं
स्यात् नैष दोषः विशेषकार्यार्थत्वाद् द्विशिष्टगणपाठस्य ननु यातीब्राह्मणीयांतीब्राह्मणीत्यादौ शपृथक्पनोर्निसमिति प्रत्ययलक्षणेन निसो नुम्मा भूदि
त्येवमर्थं लुग्विधानं स्यात् नैतदस्ति लुमतालुप्ते यदंगं तस्य कार्ये प्रत्ययलक्षणप्रतिषेधो नच नुमागमस्तस्यांगस्य कार्यमिति लुक्यपि क्रियमाणे प्रत्ययल
क्षणप्रसंगः सर्वत्र च शपोऽतोलोपे विज्ञायमाने शपृथक्पनोर्निसमित्यत्र प्रत्ययलक्षणं भूतपूर्वविज्ञानं वाश्रयणीयमिति नास्त्येव लुङ्लोपयोर्विशे
ष इति ज्ञापक एवाकारांतानां अन्येषां चागुणवृद्धिमाजाम दहनादीनां अदादिषु पाठः सार्वधातुकेऽतोलोपाभावस्य कथं तर्हि यातीकुलेइत्यादौ प्रत्य

=शिंशपचोद्यमिति ... =

यत्तर्हि आकारांतेभ्यो लुकं शास्ति याति वाति अस्तेश्च अस्तेश्च शपो लुकं शास्ति अस्ति इदं तर्हि प्रयोजनं वृक्षस्य अतो लोपः प्राप्नो
ति यल्लोपोपि प्रयोजनम् बेभिदिता चेच्छिदिता आर्द्धधातुके इति किमर्थं बेभिद्यते चेच्छिद्यते णिलोपः प्रयोजनं पाच्यते याज्यते का
रणा हारणा आर्द्धधातुक इति किमर्थं पाचयति याजयति कारयति हारयति आल्लोपः पपतुः पपुः ववतुः ववुः आर्धधातुक
९ इति किमर्थं याति वाति ईत्वं हीयते धीयते आर्धधातुक इति किं॥ ॥

=...तथाच वर्णाश्रयत्वात् प्रत्ययलक्षणमिति भावः ॥४=

यल्लक्षणेन नुम्न भवति शपाकारस्य विशेषणाच्छपोयोऽकारस्तदंतादंगादुत्तरस्य शतुर्नुम्भवतीति नच शपि लुप्ते शपोऽकारः संभवति वृक्षस्येति प्रागेवस्था
दतो लोपः भूतपूर्वगत्यानुस्वादेशः ननु परत्वात्स्यादेशो भविष्यति तत्र कृते सन्निपातपरिभाषयातो लोपो न भविष्यति उच्यते कृष्टायेति निर्देशेनानित्यत्वख्या
पनादनुपपन्नादस्याः परिभाषायाः स्यादेवातो लोपः पाचयतीति णिज्विधानं तु प्रत्ययलक्षणार्थं स्यादिणाद्यर्थं च पाचयितेति यातीति ननु आम्
स्तयोरेवातः सार्वधातुके नास्येति एवं नियमाद्दत्र न भविष्यति विपरीतोपि नियमः किं न स्यात् सार्वधातुक एवआम्प्रत्ययोरिति पपतुरित्यादौ न स्यात् आ

=...प्रतिषेधः स्यात्... =
=...भावः ॥२=

रा०म०
१५८

=नदुहलुनमामिसनेन १=

अदातामिति लुङ्. तां गातिस्थेतिसिचो लुक् प्रस्नुवीतेति कर्मकर्त्तरि इदमुदाहरणं तत्रयक् प्रतिषेधात् कर्मणितु प्रस्नूयेतेति माध्यं ननु चिणोऽपि प्रतिषेधा
त्कथं चिण्वद्भावः एवं तर्हि भावकर्मणोश्चिणदर्शनाद्त्र चिण्वद्भावप्रसंग इत्याशयः अस्मान्मधुस्योदाहरणं तरमाह इदं चापीति येभ्यो धातुभ्यः कर्मकर्त्तरि चिण
तिषिध्यते तेषां चिण्वद्भावस्यापि निषेधः वृद्धिरिति एतच्च एतद्धो पाविसाध्यं न पेक्ष्योक्तं अत्र हि चिण्वद्भावात् तो लोपोपि प्राप्नोति वृद्धिश्च यावादिभ्यो हि यको लु
ग्विधाने नसार्वधातुके तो लोपाभावो ज्ञापित इति सार्वधातुके योः तो लोपो मा भूत् चिण्वद्भावाच्चिणितस्य दर्शनात्सादेव भाष्यकारेण तु प्राप्तिमात्रं वृद्धेराश्रित्योक्तं
अथवा द्दोषोपलक्षणं वृद्धिरतो लोपेपि रूपासिद्धिप्रसंगात् वृद्धौ कृतायामाकुणश्च प्राप्नोति युक् च तत्र वार्णादांगं बलीय इति युक् प्रसंगः इट् प्रसंग स्कवि

=अनपेक्ष्येति. तदपेक्षायां लुङ्वृद्धि वा भिता कारलोपेन भाव्यं २= सार्वधातुकाश्रय: १२= =ननु कर्तेति. परस्मैपदित्वान्नापि कर्मणीत्याह. कर्मणीति. ५= =असमाप्ते बीजमाह. मेमद इति. ७= चिण्वद्भावादिप्रसंगइति कुतो....भाए इत्येति १=

अदातां अधातां एत्वं ग्लेयात् म्लेयात् आर्द्धधातुक इति किं ग्लायात् म्लायातां चिण्वद्भाव इट् सीयुटि चिण्वद्भावे सीयुटि किमुदाहरणं कारिषी
ष्ट आर्धधातुक इति किं क्रियेत ह्रियेत नैतदुदाहरणं यकाव्यवहितत्वान्न भविष्यति इदं तर्ह्युदाहरणं प्रस्नुवीत इदं चाप्युदाहरणं क्रियेत ह्रिये [redacted]
त ननु चोक्तं यकाव्यवहितत्वान्न भविष्यतीति यक एवैतर्हि मा भूदिति किं च स्यात् वृद्धिः वृद्धौ कृतायां युक् प्रसज्येत भ्रस्जो रोपधयोरमन्यतरस्यां अयं
रम रेफस्य स्थाने कस्मान्न भवति मिदचोन्त्यात्पर इत्यनेन अचामन्त्यात्परः क्रियते रेफस्य तर्हि श्रवणं कस्मान्न भवति षष्ठ्युच्चारणसामर्थ्यात्॥ ॥

=सीयुडादेरिति चिण्वलो....... दीर्घविधि.........१=

तर

शेषाभावान्नोक्तः भ्रस्जो रोप आदेशांतराणां स्थानितुल्यदेशानां दर्शनात्स इति अयं रमिति रेफग्रहणस्योपलक्षणं [redacted] र्थत्वा उपधाया अपीति वोढव्यं रेफस्य
तर्हीति स्थानांतरप्रवृत्तेन रमाः निवर्जितत्वात् षष्ठ्युच्चारणसामर्थ्यादिति रोपधयोरिति स्थानषष्ठ्यांतयोरनुविषयेः प्रयोगः प्रतिपाद्यते रोपधयोः प्रसंगे रम्प्रयुज्य
ते रोपधेनप्रयुज्येते इत्यर्थः रम्प्रयुज्यमानो मित्वादचोन्त्यात्परो भवतीति वा कार्यः संपद्यते यस्य तु देशांतरे नास्ति विधानं स स्थानिदेश एव भवति तत्प्रसंगेत
स्य विधानाद्विशिष्टदेशश्च स्थानिनः प्रसंग इति तद्देशो नैवादेशेन भाव्यं॥ ॥श्री॥ ॥ ॥

भारद्वाजीया इति तेहि सनः क्ङिच्चिल्लोपः इत्यतो लोप इत्यनुवर्त्य रेफोपधयोर्लोपं रमागमं चान्यतरस्यां विदधति भर्ज्जतीति आर्धधातुकाधिकारस्तत्र रमो प्र
संगः रसोरिति साचकसरेफस्य सकारस्य चस्त्वश्त्वो वा आरेप्राः नत्वकृते किति गुणः प्रवर्त्तते भर्ष्टेति स्वकाराभावपक्षेतु भ्रष्टेति किति तु स्वशत्वे भ्रष्टमिति
भवति तदभावपक्षे पि संप्रसारणेसति भृष्टमिति नार्थः पूर्वविप्रतिषेधेनेति इतोऽत्रापि पूर्वविप्रतिषेधो वक्तव्य इति तुल्यतां प्रतिपादयन्नाह रसोरिति॥
भ्रस्जेः सिचि स्वभावं विकल्पितं बाधित्वा परत्वाच्चित्त्वे हलंतलक्षणा वृद्धिः प्राप्नोतीति स्वभावार्थः पूर्वविप्रतिषेधो वक्तव्य एवं तेन रूपद्वयं सिध्यति अभ्रा

भारद्वाजीयाः पठंति भ्रस्जो रेपधयोर्लोप आगमो रमुविधीयत इति भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन भ्रस्जादेशात्संप्रसारणं वि
प्रतिषेधेन भवति भ्रस्जादेशस्यावकाशः भर्ष्टा भर्ष्टुं संप्रसारणस्यावकाशः भृज्जति इहोभयं प्राप्नोति भृष्टवानिति संप्रसारणं भ
वति पूर्वविप्रतिषेधेन स तर्हि पूर्वविप्रतिषेधो वक्तव्यः न वक्तव्यः रसोर्वचनात्सिद्धं रसोर्वा स्वं भवतीति वक्ष्यामि रसोर्वचनेसिचिवृ
द्धेर्भ्रस्जादेशो वक्तव्यः वृद्धौ कृतायामिदमेव रूपं स्यात् अभ्राक्षीत् इदं नस्यात् अभार्क्षीत् [redacted] सर्वथा वयं पूर्व
विप्रतिषेधान्न मुच्यामहे सूत्रं च भिद्यते यथान्यासमेवास्तु ननु चोक्तं भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेनेति इदमिह संप्रधार्यं॥
भ्रस्जादेशः क्रियतां संप्रसारणमिति किमत्र कर्त्तव्यं परत्वात् भ्रस्जादेशः नित्यत्वात्संप्रसारणं कृतेपि भ्रस्जादेशे प्राप्नोति अकृतेपि भ्र
स्जादेशेपि नित्यः कृतेपि संप्रसारणे प्राप्नोति अकृतेपि प्राप्नोति॥ ॥

क्षीदभाक्षीदिति नतुच स्वभावो नित्यः कृतायामपि वृद्धावेकदेशविकृतस्यानन्यत्वात्प्रसंगाद्वृद्धिस्तु शब्दजा कृतेरेकत्वान्नास्ति वृद्धेः शब्दांतरस्य प्राप्त्यां नित्यत्वमिति
द्वयोर्नित्ययोः परत्वाद्वृद्धिप्रसंगः अंतरंगस्वभाव इति चेत् न सिच्यंतरंगमस्तीति ज्ञापयिष्यते रम्भावेतु क्रियमाणे परत्वाद्वृद्धौ कृतायां पुनः प्रसंगविज्ञानाद्र
मिसति सिद्धमभार्क्षीदिति॥ ॥श्री॥ ॥

×अंतरंगप्रसंगादनित्या×२ सशक्ति

योसौ स्वकारो रेफ इति ननु च स्वकारावयवस्य रेफस्य क्रियमाणः कथमंत्यादचः परः स्यात् मा भूदंत्यादचः परः तत्र विषय आदेशो भविष्यतीमित्वं नु मन्येष्टे सा ह्येसावकाश
म् उपदेश इति वर्त्तत इति प्रसक्तेरुपदेशे योरेफस्तत्स्थाने रम् भवति नच स्वकारावयव उपदेशे प्रसक्तो रेफो भवति वरीम उत्पत इति तन्मध्यपतितस्तद्ग्रहणेन गृह्यत
इति रीकोरेफो प्रसक्तो भवतीति रम प्रसंगः प्रसक्तरूपदेशो ननु नासौ रेफ इति रमभावः उपेनं सविकार इ सेतनुभयोजना भावान्नो प्राप्नोतीति अतो लोपः यणादेशे नेति

=ननु रीकोऽनं सस्य रेफत्वान्नेविष्यति अत आह नं स्वविकार इति प्रयोजनाभावादिति अनवलक्षणादवक्षो येन ह्लादेस्मरमिरूपम्

योसावृकारो रेफस्तस्य चोपधाया अह्लते पिप्राप्नोति अनिस्योप्रसक्तादेशः नहि ह्लते संप्रसारणं प्राप्नोति किं कारणं न हि वर्णैकदेशा वर्णग्रहणेन गृह्य
न्ते अथापि कथंचित् गृह्यन्ते एवमपि अनिसः कथमुपदेश इति वर्त्तते न चावश्यमुपदेशग्रहणमनुवर्त्त्यं वरीम उत्पतेरसेव मर्थं अतोलो
पः एपद्धोपाविय इ यणगुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धं एपलोपो इयङ् यणगुणवृद्धिदीर्घेभ्यो भवतो विप्रतिषेधेन णिलोपस्यावकाशः का
र्यते हार्यते इयङो देशस्यावकाशः श्रियौ श्रियः इहोभयं प्राप्नोति आटिटत् आशिशत् ननु चात्र यणादेशेन भवितव्यं इदं तर्हि अततक्षत् अ
ररक्षत् यणादेशस्यावकाशः निन्यतुः निन्युः णिलोपस्य स एव इहोभयं प्राप्नोति आटिटत् आशिशत् वृद्धेरवकाशः सखायौ सखायः णिलोपस्य
[redacted] स एव इहोभयं प्राप्नोति कारयतेः कारकः हारयतेः हारकः गुणस्यावकाशः चेता स्तोता णिलोपस्यावकाशः आटि
टत् आशिशत् इहोभयं प्राप्नोति॥ ॥ ॥

॥एरनेकाच इत्यनेन ततश्च यणाबाधनादियङः संप्रधारणागोचरत्वाभावः सखायाविति सख्युरसंबुद्धाविति प्राप्ताति देशपक्षे वृद्धेरयमवकाशो न तु कार्योति
देशपक्ष इत्यवसेयम् णिलोपस्यावकाश आटिटत् इति यणो णिलोपे न बाधितत्वादिति भावः॥ ॥श्री॥ ॥७॥

कारणेति ननु चात्रापि इयङ्गुणापवादत्वादनेकाच इति यण् प्राप्नोति परत्वात्तस्य गुणेन बाधनात् गुणस्यापि पूर्वविप्रतिषेधात् णिलोपेनेत्यदोषः एकैकेन सह णिलोप
स्य विचारादियङादीनां अन्यतमविषयोपि णिलोपस्यावकाशउपन्यस्यते संतत्रैनेति ननु कारणकारक इत्यादौ गुणवृद्ध्योः कृतयोः अन्तरंगत्वा दयायोः कृतयोः

कारणा हारणा दीर्घत्वस्यावकाशः धीयते स्तूयते णिलोपस्यावकाशः स एव इहोभयं प्राप्नोति कार्यते हार्यते णिलोपो भवति विप्रतिषेधे
न स तर्हि पूर्वविप्रतिषेधो वक्तव्यः न वक्तव्यः संत्वत्रैते विषयाः एतेषु विधिषु कृतेषु स्थानिवद्भावात् णिग्रहणेन ग्रहणाल्लोपो भविष्यति नैवं शक्यं।
इयङ्गुणादेशो हि दोषः स्यात् किं अंसस्य लोपः प्रसज्येत अल्लोपस्य यूङ्यणोश्च नास्ति संप्रधारणा वृद्धेरवकाशः प्रियमाचष्टे प्रापयति अल्लोप
स्यावकाशः चिकीर्षिता चिकीर्षितुं इहोभयं प्राप्नोति चिकीर्षको जिहीर्षकः गुणस्याल्लोपस्य च नास्ति संप्रधारणा दीर्घत्वस्यावकाशः अ
पिकाकः अपेनायते अल्लोपस्य स एव इहोभयं प्राप्नोति चिकीर्ष्यते जिहीर्ष्यते अल्लोपो भवति विप्रतिषेधे न स तर्हि पूर्वविप्रतिषेधो वक्तव्यः
न वक्तव्यः इष्टवाची परशब्दः विप्रतिषेधे यत्परं इष्टं तद्भवतीति यस्य हलः किमिदं यलोपे वर्णग्रहणं आहोस्वित् संघातग्रहणं कश्चात्र विशेषः
यलोपे वर्णग्रहणं चेत् बाल्वत् स्यप्रतिषेधो वक्तव्यः सुच्छिता मथ्यिता अस्तु तर्हि संघातग्रहणं अंत्यस्य लोपः प्राप्नोति सिद्धो सस्य पूर्वेणो
वत तत्र आरंभसामर्थ्यात् सर्वस्य भविष्यति एवमपि तेनातिप्रसक्तमिति कृत्वा नियमो विज्ञास्यते यस्य हल एव नान्यतः क्येमाभूत् लोलूयिता पो
९ पूयिता॥ ×ग्रहणं यदि संघात× ॥श्री॥ ॥ ॥

अंत्यस्य णिलोपः प्राप्नोति वा वर्णो ह्यंगं वलीय इत्यस्य (या) यो बाधित्वा णिलोपो भविष्यतीत्यदोषः प्रापयतीति प्रियस्य प्रादेशे वृद्धौ च पुगागमः अनार्धधातुकत्वात्स्येधो
तोरविधानाद् अतो लोपस्यात्राप्रसंगः यस्य हलः किमिदमिति यथांगं तु नाकारेण निर्दिश्यते तो वर्णमात्रग्रहणं अन्यथा तु संघातग्रहणमिति पक्षद्वयसंभवः
९ अंसस्येति अल्लोसस्येति वचनात्॥ ॥श्री॥ ॥

कैमर्थक्यादिति को र्थोयस्यतत्किमर्थकं तस्य भावं कैमर्थ्यं संप्रश्नविषयो‍ः संबंधोऽत्रभावप्रत्ययवाच्यः अपूर्वएव विधिरिति नियमे हि श्रुतार्थत्यागेनाश्रुतायाऽन्यनि
वृत्तेः सामर्थ्यात्परिकल्प्य नेउक्तानुवादे लोपस्यप्राप्नोति एवमप्यंत्यस्येति अलोंत्यपरिभाषोपस्थानात् अपूर्वस्यविधेरसंभवाद्विधिनियमसंभवेचविधिरेवज्या
यानिति असम्न्यायस्यायमविषय इत्यर्थः संघातग्रहणसामर्थ्यादिति किंयस्यहलइत्यस्यविधिरूपत्वेबाध्यंतो उतालोंत्यस्येतिपरिभाषेतिपाणर्थ्यात्प्राधा
न्यस्यपरिभाषायास्त्यागोयुक्तोनतुप्रधानस्यविधिरूपबाधनं समिधितेति समिधमिच्छत्यात्मन इतिक्यच्‌ततस्तच् इट् इहवर्णग्रहणोक्यस्यविभाषेत्यत्रक्येन

कैमर्थक्यान्नियमोभवतिविधेयंनास्तीतिकृत्वा इहचास्तिविधेयंकिं अंत्यस्यलोपः प्राप्नः सर्वस्यविधेयः तत्राप्यर्थोविधिरस्तुनियमोवेति॥
अपूर्वएवविधिर्भविष्यति ननियमः एवमप्यंत्यस्यप्राप्नोति किंकारणं नह्निलोपः सर्वापहारी ननुचसंघातग्रहणसामर्थ्यात्सर्वस्यभविष्य
ति संघातग्रहणंचेत्क्यस्यविभाषायांदोषः संघातग्रहणंचेत्क्यस्यविभाषायांदोषोभवति समिधिता समिध्यिता यदालोपस्तदासर्वस्य[redacted]
[redacted] लोपः यदाअलोपस्तदासर्वस्यालोपः प्राप्नोति॥ ॥ ॥

×नापयस्येतियोयोगविभागोव्याख्या×२ विदि मेन

यकारोविशेष्यनेक्यस्ययोयकारोहलः परः तस्यविभाषालोपोभवत्यकारस्यत्वतोलोप इतियथेष्टंरूपद्वयंसिध्यति संघातग्रहणेतुयस्यहलइत्यनेननाप्राप्तिन्याये
नातोलोपोवाध्योयल्लोपोपिक्यस्यविभाषेतिविकल्पेनबाध्यतेतत्पक्षेसंघातस्यैवश्रवणंप्राप्नोति निसयल्लोपवदल्लोपस्यापिविकल्पेनबाधनात् एतच्चन
धातुलोपइत्यस्यभस्यारव्यानस्तमनाश्रित्योक्तंतदाश्रयेल्लोपस्यसिद्धत्वात् क्यस्येति कंड्वादियकोपिग्रहणंकेच्छंतिकिंतोयशब्दस्यग्रहणेतान्यर्यात्ककारस्या
नुबंधस्यादित्वमविवक्षितमितिवदंतः एतदपरेनेच्छंति आदिभूतककारानुबंधनिर्देशेसत्यादित्वाविवक्षायांप्रमाणाभावात्लक्ष्यस्यचतथाशिष्टैरप्रदर्शनात्॥

आदेरिति ततश्च क्यस्य विभाषेति यकारस्यैव लोपो विकल्पेनाकारस्य तु नित्यमिति सिद्धमिष्टं अंगादिति विवर्तते इति अंगस्येति निमित्तनिमित्तिभाव संबं
धाश्रयणे पंचम्यर्थत्वाभावात् लाभे हास्यं चमीनिर्देशः कृतः इतरेतरयथाक्रमभिप्रायं अप्रतिपद्य आह नवै अंगादिति संबंधषष्ठीति अनेकसंबंधसंभवे

आदेः परवचनात्सिद्धं हल इति पंचमी तस्मादित्युत्तरस्यादेः परस्येति यकारस्यैवं भविष्यति अथ वा पुनरस्तु वर्णग्रहणं नुचो यल्लोपे वु
र्णग्रहणं चेद्धात्वं तस्य प्रतिषेध इति नैष दोषः अंगादिति हि विवर्तते नवै अंगादिति पंचम्यस्ति एवं तर्हि अंगस्येति संबंधषष्ठी विज्ञास्यते
अंगस्य यो यकारः किं चांगस्य यकारो यस्मिन्नंगमित्येतत् भवति कस्मिंश्चैतद्भवति प्रत्यये णेरनिटि अनिटीति किमर्थं कारयि
ता कारयितुं अनिटीति शक्यमवक्तुं कस्मान्न भवति कारयिता कारयितुं निष्ठायां सेटीत्येतन्नियमार्थं भविष्यति निष्ठायामेव सेटि णे
र्लोपो भवति नान्यत्रेति क्व मा भूत् कारयिता कारयितुं अथ वा उपविष्टात् योगविभागः करिष्यते इदमस्ति निष्ठायां सेटि जनि
तामंत्रे शमितायज्ञे ततः अय अय आदेशो भवति णेः सेटि ततः आमंताल्वाय्येत्निष्णुषु अय भवतीत्येव॥ ॥ ॥

=अतोपदृति॰यद्यपिपरत्वाद्यल्लोपे॰कारलोपइतिकथंतस्यप्रत्ययत्वंतथापियदिपूर्वमल्लोपःस्यात्तस्यापिप्रत्ययत्वंस्यादितितार्किकप्रत्ययत्वाद्दोषः॥२=भनिटोनिष्ठायामिति॰एवंतात्मनायाइनिएव॥एतद्येत्तरसूत्रेस्फुटीभविष्यति॥२=

प्यंतरंगत्वान्निमित्तनिमित्तिभावलक्षणएवसंबंधः परिगृह्यते प्रत्यय इति प्रत्ययहेतुकत्वादंगव्यपदेशस्य ननु च समुदायः प्रत्ययोंऽगस्य निमित्तं न तु य
कारमात्रं अकारेलुप्ते यकारमात्रस्य प्रत्ययत्वाद्दोषः णेरनिटि निष्ठायामेव सेटीति सेट्येव निष्ठायामिति नियमो न भवत्यनिटो निष्ठाया
ऽभावात् अयादेशो भवतीति लोपापवाद इत्यर्थः॥ ॥श्री॥ ॥

संज्ञपित इति सनीवंतर्धेतिसनि विकल्पविधानाद्यस्य विभाषेति इट्प्रतिषेधः सेड्ग्रहणसामर्थ्याच्च पूर्वेणापि न भवति वाऽऽदांतशांतेत्यत्र ज्ञपेर्निपातनमाश्रीयते ज्ञ ज्ञपित इति एकाचो हीति यस्य विभाषेत्यत्रैकाच इत्यधिकारात् इड्भावार्थेति इटि कृते णिलोपो यथा स्यात् कृते मा भूदिति कालावधारणार्थं सेड्ग्रहणमित्यर्थः ॥

×निष्ठायां सेटि ४२

निष्ठायां सेड्ग्रहणं किमर्थं निष्ठायां सेड्ग्रहणं अनिटि प्रतिषेधार्थं निष्ठायां सेड्ग्रहणं क्रियते अनिटि प्रतिषेधो यथा स्यादिति संज्ञपितः पशुरिति निष्ठायां सेड्ग्रहणं अनिटि प्रतिषेधार्थमिति चेत्तत्सिद्धं निष्ठायां सेड्ग्रहणं अनिटि प्रतिषेधार्थमिति चेत् अंतरेणापि सेड्ग्रहणं तत्सिद्धं कथं अनिड्भावात् ननु च यस्य विभाषेति तत्र पेरिट्प्रतिषेधः एकाचो हि प्रतिषेधः एकाचो हि स प्रतिषेधः ज्ञपिश्चानेकाच् इड्भावार्थं तु हि सेड्ग्रहणं क्रियते कथं पुनः सेटीत्यनेनेट् शक्यो भावयितुं तन्निमित्तत्वाल्लोपस्य नाञ्चालते इटि णिलोपेन भवितव्यं किं कारणं सेटी त्युच्यते ऽयच्चनेहि णिलोपः इट्प्रतिषेधप्रसंगः अक्रियमाणे हि सेड्ग्रहणे णिलोपे कृते एकाच इतीट्प्रतिषेधः प्रसज्येत कारितं हारितं एवं तर्हि नार्थः

इड्भावार्थेन

सेड्ग्रहणेन नापि सूत्रेण ॥ ॥ ॥

अक्रियमाणे सेड्ग्रहणे कारित इति स्थिते णिलोपश्च प्राप्नोति इट् च नित्यत्वाण्णिलोपः प्राप्नोति तत्र कृते एकाच इतीट्प्रतिषेधः प्राप्नोत्येकदेशविकृतस्यानन्यत्वात्स एवं रोति [redacted] भवति इति यस्य च लक्षणांतरेण निमित्तं विहन्यते न तदनित्यमित्येतच्च कार्यगतभावापेक्षायां नाश्रीयत इत्यनित्य एवेडागमः इटि तु णिलोपे क्रियमाणे न प्रवर्जते इट्प्रतिषेधो निर्वृत्तस्य प्रतिषेद्धुमशक्यत्वात् एतच्च प्रयोजनं पूर्वस्मादपि विधौ स्थानिवद्भावादस्ति नाश्रितो

सप्तमेयोगविभागइति णेरध्ययने वृत्तमिति योगं विभज्य योगद्वयं क्रियते क्रमविपर्यये यच्छाश्रीयते णेरित्येको योगः तत्र निष्ठायां नेडिति वृत्ते ततो वृत्तमिति द्वितीयो योगो णिलोपनियमार्थो गुणप्रतिषेधार्थश्चानेकप्रयोजनत्वान्निपातानां अथवा वृत्तं वृत्तमित्येकशेषाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भविष्यति ततोध्ययन इति तृतीयो योगो वृत्तशब्दस्यार्थविशेषनियमार्थः रमणात्विति व्यत्ययेनाप्रत्ययः अथा किं पुनरिति यद्यपि क्त्वावयामं तात्वाप्येत्विसमुच्चिति निर्देशानुपपत्तिः तथापि युक्तायुक्तत्वापेक्षो विचारः कः प्रत्यय आश्रयितुं युक्तः को न युक्त इति अथवा किं कृते डाग

×निपात्यते·णेर्निष्ठायां लोपो निपात्यते·किं×२

कथं सप्तमे योगविभागः करिष्यते इदमस्ति निष्ठायां नेट् भवति ततः णेः एवं तस्य निष्ठायां नेट् भवति कारितं हारितं ततो वृत्तं वृत्तमिति च निपात्यते किं प्रयोजनं नियमार्थं अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र क्व माभूत् कारितं इहापि तर्हि प्राप्नोति वर्त्तितमन्नं वर्त्तिता भिक्षेति ततः अध्ययने अध्ययने चेद्वृत्तिर्वर्त्तते वृधिरमिशब्धीनामुपसंख्यानं सार्वधातुकत्वात् वृधिरमिशृधीनामुपसंख्यानं कर्त्तव्यं किं कारणं सार्वधातुकत्वात् वर्धन्तु लास्तुष्टु तयोगिरो मे वर्धयन्त्विति प्राप्ते वृहस्पतिष्ट्वा सुम्ने रम्णातु रमयत्विति एवं प्राप्ते अग्ने शर्धमहते सौभगाय शर्धयेति प्राप्ते तत्र हि वक्तव्यं वृधिरमिशृधीनामार्धधातुकत्वात्सिद्धं कथं आर्द्धधातुकत्वं अन्ये पि हि धातुप्रत्ययाः उभयथा छन्दसि दृश्यन्ते अयामं तात्वाप्येत्विसमुच्च किं पुनरयं क्तुः आहो स्विदितुः कश्चात्र विशेषः क्त्वा विधिर्णेर्गुणवचनं क्नोसतिइरिणोर्गुणो वक्तव्यः॥ गद

=उभयथेति क्त्वोप्रत्ययस्वरेण तुदिचित्स्वरेण निभावः।३= नवक्तव्यं२ १ यितुः स्तनयितुः अस्तनयितुः इत्नुः इत्नो प्रत्ययांतरकरणं यदि तु इत्नुः प्रत्ययांतरं कर्त्तव्यम्॥

मः क्तुरिह निर्दिष्टो यः प्रत्ययस्वे त्नुरिति विचारः क्त्वाविटीति स्तनिहृषीत्यत्र यदि क्तुर्विधीयते तदा तस्येडिति कृते उ नि टी ति वचनाण्णिलोपो नास्ति किं तर्हि कित्वात् गुणप्रतिषेधः प्राप्नोति गुणो विधेयः इत्नाविति स्तनिहृषीत्यत्रेत्नुर्विधेयः कृहनिभ्यां क्तुर्विधेयः यदा तु स्तनादिभ्यः क्तुर्विधीयते तस एव को नरत्रानुवर्त्तते तदा प्रत्ययांतरं न विधेयं स्वरे अपि भेदो नास्ति उभयथाप्याद्युदात्तत्वात्॥ ॥ श्री॥ ॥७॥ ॥ ॥

=कुरिति·नेनक्तुरित्याणेन गुणः।२=गुणो विधेयः इति·तदा चेत्नुः क्नो यत्नुः प्रत्ययांतरं न कर्त्तव्यमिति भावः।१=

अयादेशो चेति णिलोपस्य प्रसंगात् उपसंख्यानशब्देनात्र सूत्रे पाठ उच्यते न पूर्ववचनं भाष्यकारेण गुरुलाघवमनादृत्य यथान्यासं समर्थयितुमाह उभयमिति यद्यत्र त्वनु
ग्रहणमयादेशार्थं क्रियते तर्ह्यन्यादिप्रसङ्गः कुर्वीधीयते न ह्यस्मादेव लाघवं त्वपिलघुके चिरा चार्येणालघुपूर्वस्येति षष्ठ्यन्तमध्यापिताः अन्येतु लघुपूर्वादिति पञ्चम्यन्तं तत्र षष्ठ्
ठीमाश्रित्याह त्वपीति प्रशममव्येति शमेर्णिचि हृस्वौ मितां हृस्व इति हृस्वस्तत्र णेः पूर्वं व्यंजनं न लघ्विति अयादेशो न प्राप्नोति न चात्र व्यवहिते पि पूर्वशब्दो वर्त्तते

=सोपसर्गस्य हमिति भाष्यकृतां नालप्युत्सन्नादिभ्योपि णौ विधीयमाने नत्वाकिरानरणकामार्थ्या पूर्वपिलुदिस्त्रणेर्व्यवधाने पिगुणमित्यधम्मसंगः भन्मभावान्मेनि दिलादि यतलन्यादिभ्यस्तु ह्रस्व निर्म्मांकादिति वदेदितिभावः ॥२॥ =देः [illegible]

अयादेशेचोपसंख्यानं अयादेशे चोपसंख्यानं कर्त्तव्यं उभयं क्रियते न्यासे एव त्वपि लघुपूर्वात् त्वपि लघुपूर्वस्येति चेत् व्यंजनान्तेषू
पसंख्यानं त्वपि लघुपूर्वस्येति चेत् व्यंजनान्तेषू पसंख्यानं कर्त्तव्यं प्रशममय्यगतः प्रतमय्यगतः अल्लोपे च गुरुपूर्वात्प्रतिषेधो वक्तव्यः
प्रतिचिकीर्षय्यगतः त्वपि लघुपूर्वादिति वचनात्सिद्धं [redacted] त्वपि लघुपूर्वादिति वक्तव्यं ॥ ॥

=लघुग्रहणे पूर्वस्येति कर्मधारयेऽनन्तरेणवनाद्यस्थानात् लघुः पूर्वो यस्मादिति अन्यान्ययमान्यवधानमेवग्रहणमिति मिति विकीर्षगतप्रसंगेन दोषः न च वर्णग्रहणे जातिग्रहणमेव एवात्रेति वाच्यं धर्मिग्राहकमानेन वर्णं ह्रस्वाधानरणधर्माभयेण न वर्णग्रहणेन बाहुल्ये न तात्र [illegible]

इति शब्दमाश्रयितुं चकारस्तदीरिदादीनामपि णौ परतो नां अयादेशप्रसंगात् प्रचकास्य गत इति न चाव्यवहितं पूर्वमाश्रयितुं शक्यं ततश्च प्रगणय्य प्रस्तनयेत्यादौ एव स्या
दत्र त्वल्लोपस्यासिद्धत्वाल्लघुपूर्वो णिर्भवति अथापि व्याश्रयत्वाद ल्लोपस्यासिद्धत्वं न स्यात् एवमपि भूतपूर्वगत्या लघुपूर्वो णिरयो ऽयादेशः स्यात् अल्लोपे चेति अ
ल्लोपे कृते योऽगुरुपूर्वस्तस्मात्परस्य णेरभूतपूर्वो लघुपूर्वतामाश्रित्यायादेशः प्राप्नोति लघुपूर्वादितिवचनादिति लघुपूर्वादिति पञ्चम्यन्तं पठितव्यमित्यर्थः लघुः पूर्वो यस्मा

((दिति लघुपूर्वस्तस्मात्परस्य णेरयादेशः ॥ ॥ ॥

भा०कै०६ १६३

एवमपीति कृतर्हि स्यान्मृदमाचष्ट इति णिचु प्रकृत्यैकाजिति प्रकृतिभावाद्विलोपप्रतिषेधः प्रम्रदप्यगत इत्यादौ स्यात्तं विभाषा अध्याप्येति क्रीङ्जीनां णौ
विसात्वमर्जिहीत्यादिना पुक् आगमः सानुबंधकनिर्देशादिति आपुक्तिति पठितव्यमित्यर्थः आप्न शब्दासंबन्धेकवचने लकारलकारयोः सवर्णविधि
रितिस्तत उदित्सुः उरण्रपर इत्यत्रउत्या हारग्रहणान्न परत्वं भाष्यकारस्त्वसंदेहार्थं अविभक्तिकमाश्रित्याह आप्नु इति लक्षणप्रतिपदोक्तयोरि

एवमपि ह्रस्वयलोपाल्लोपानामसिद्धत्वात्पिलघुपूर्वादिति अयादेशो न प्राप्नोति प्रशममप्यगतः प्रतममप्यगतः प्रचेच्छिदप्यगतः प्रबे
भिदप्यगतः प्रगदप्यगतः प्रस्तनप्यगतः ह्रस्वादिषु चोक्तं किमुक्तं समानाश्रयवचनात्सिद्धं इति कथं णावेते विषयः णेरप्यादेशाः
विभाषाप इङादेशस्य प्रतिषेधो वक्तव्यः अध्याप्यगतः आपः सानुबंधकनिर्देशः करिष्यते आप्नु इति तेन इङादेशस्य न भविष्यति
स तर्हि सानुबंधकनिर्देशः कर्तव्यः न कर्तव्यः कथं अध्याप्यगतः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति॥ ॥
इति श्रीभगवत्पतंजलिविरचिते व्याकरणस्य महाभाष्ये षष्ठस्य चतुर्थे द्वितीयमाह्निकम्॥ ×आपः सानुबंधकनिर्देशादिङः सिद्धं× ॥

ति लाक्षणिकस्यानुमेयरूपत्वाद्विलंबितप्रतीतिगोचरत्वात्प्रतिपदोक्तस्य तु प्रत्यक्षत्वादविलंबितप्रतीतिविषयत्वाद्गृहीतौ च पदार्थे इयं परिभाषा न व्यक्तौ तत्र हि
सर्वस्यां व्यक्तौ लक्षणेन प्रवर्तितव्यं॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्॥ ० उप० १६३

१ ॥श्री॥ ॥७॥ ॥७॥ ॥

स्यसिच्सीयुट् कथमिति । किं भावकर्मणोरित्यभिधेयनिर्देशो भावकर्मणोर्यद्वर्त्तन्ते स्यादय इति । अथ भावकर्माभिधायी प्रत्ययो भावकर्मणोरभिधीयते भावकर्मवाचिनि
प्रत्यये परतो ये स्यादय इति । तत्राद्ये पक्षे भावकर्मशब्दस्य मुख्यार्थवृत्तित्वं द्वितीये गौणार्थता युगपच्च गौणमुख्यार्थवृत्तित्वासंभव इति प्रश्नः । यदि विज्ञायत इति । यदि प्र
सिद्ध्यनुरोधेन मुख्यार्थपरिग्रहः सीयुड्विशेषित इति । आर्धधातुक इति वर्त्तते न च सीयुट आगममात्रस्य आर्धधातुकसंज्ञास्तीति सामर्थ्यात् सीयुडाद्यार्धधातु
कं गृह्यते तस्य च संभवति भावकर्माभिधायित्वमित्यर्थः स्यसिच्तासय इति । भावकर्मणोस्त्वादेशार्थत्वेन शास्त्रे व्यवस्थापितत्वात् विकरणानामतदर्थत्वात् । अ

=आर्धधातुकत्वमस्यास्त्यनुसाभावकर्मणोर्द्दर्शनात्वसंभवे पितस्मिन्प्रत्ययः स्यादयो न संभवंस्ततः आर्धधातुकमितिस्मात् नामेव विशेषणं नत्वार्धधातुके परतो ये स्यादय इत्युपर्यक्तमपीति किं ॥

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे । कथमिदं विज्ञायते भावकर्मणोर्ये स्यादय इति आहोस्विद्भावकर्मवाचिनि पर
तो ये स्यादय इति । किं चातः । यदि विज्ञायते भावकर्मणोर्ये स्यादय इति सीयुड्विशेषितः उभयथापि चिण्वद्भावो ऽविशेषि

✕ स्यसिच्तासयो ऽविशेषिताः अथ विज्ञायते भावकर्मवाचिनि परतो ये स्यादय इति स्यसिच्तासयो विशेषिताः सीयुड् विशेषितः ✕ तः । यथेच्छसि तथास्तु ॥

षेति भूयसामनुग्रहाय यथासौ णार्थे संप्रयणमिति भावः सीयुड्विशेषित इति । तत्र सीयुटः प्रत्ययैकदेशत्वात् समुदायावयवयोः पौर्वापर्याभावादागमेत्यप
जाते सागमकस्य प्रत्ययादयः संज्ञाः अर्थाभिसंबंधश्च न तत्रावयवस्येति सीयुटो भावकर्मवाचिप्रत्ययपरत्वासंभवः समस्यावयवयोः पौर्वापर्ये ऽतोनंतरं कृचितां ऽउ
भयथापि चिण्वद्भावो विशेषित इति तत्र न दोषांतरोपन्यासः किं तर्हि पक्षद्वयदोषोपसंहारः अन्यतरपक्षपरिग्रहे सर्वविषयव्यापनाद्विशेषितश्चिण्वद्भाव इ
(त्यर्थः ॥ ॥ ॥

भा०कै०६
१६४

स्यादयोपीति स्याद्यनुवृत्तेरिदमेव प्रयोजनं भावकर्मणोः स्यादीनामप्यभिधेयं यथा स्यातामिति यथा च द्वंद्वपदानि प्रत्येकं समुदायार्थे वाचीनि तथा स्यादयो ला
देशाश्च भावकर्मणोरभिदधतीति न कश्चिद्दोषः भावकर्मवाचिनि सीयुटीति तत्रान्यायाश्रयणादेकं भावकर्मग्रहणमभिन्नेन रूपेण यथासंभवं स्यादिभिः संबध्य
ते अथवा विषयसप्तम्येषाश्रीयते भावकर्मविषयेषु स्यादिषु च एव कार्यं भवतीति नास्ति दोषः स्याद्वकाशः कस्यायमिति स्यादीनामागमसंबंधे षष्ठ्यनि

=श्रुतानां षष्ठ्यंतत्वाभावेनागमित्वे प्रमाणाभावात्. १=

अस्तु तावद्भावकर्मणोर्ये स्यादय इति ननु चोक्तं सीयुड्विशेषितः स्यसिच्तासयो विशेषिता इति स्यसिच्तासयश्च विशेषिताः कथं भावक
र्मणोर्ये कुर्भवती अत्र स्या[illegible]दयोप्यनुवर्तिष्यंते अथवा पुनरस्तु भावकर्मवाचिनि परतो ये स्यादय इति ननु चोक्तं स्यसिच्तासयो विशे
षिताः सीयुड्विशेषित इति सीयुड्विशेषितः कथं भावकर्मवाचिनि परतः सीयुट् नास्तीति कृत्वा भावकर्मवाचिनि सीयुटि कार्यं विज्ञास्यते अ
पर इट् चेत्युच्यते कस्यायमिड्भवति अंगस्येति वर्त्तते यद्येवमंगस्यादितस्तद्इट् प्राप्नोति अजादौ तु न यथा अडाटौ टित्वाद्द्यादितो भवतः
१ एवं तर्हि स्यादीनां भविष्यति॥ ॥श्री॥ ॥

=कुर्भवति नियोजकत्वाभावे प्रकरणस्य प्रयोजकत्वमाश्रित्य विनाव॥१=

देशात् प्रश्नः स एवाह अंगस्येति वर्त्तत इति प्रकरणस्य नियोजकत्वं चेदाश्रीयते तदा निष्ठप्रसंग इत्यर्थः अथवा अंगस्येति वर्तत इति सिद्धांतवादिवचनं अं राम०
गस्य निमित्तं यत्तस्येडागम इत्यर्थः इतरस्त्वंगमेवानेनागमित्वेनोक्तमिति मत्वाह॥ यद्येवमिति॥ ॥श्री॥ ॥ १६४

षष्ठ्यभावादिति इड्भावेन स्यादीनामागमित्वं उपलक्ष्यमिति भावः ननु च भावकर्मणोरिति एषा षष्ठीति षष्ठीनिमित्तत्वात्षष्ठीत्युच्यते यथा नड्वलोदकं पादरोगः इह भावक
र्मवाचिनि परतो ये स्यादय इति शब्देन शब्दस्य पौर्वापर्यसंभवात्तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठत इत्यस्ति भावकर्मणोरित्यस्य षष्ठीसंज्ञा नो निमित्तभावः इतर
स्तु भावकर्मणोरित्यभिधेयसप्तमीं मत्वाह नैषा षष्ठीति इतरः स्वाभिप्रायं प्रकाशयितुमाह एवं तर्हीति भावकर्मवाची प्रत्यय उपचाराद्भावकर्मशब्दाभ्यां परत्वेन सप्तम्या श६३
प्रतिपादित इति सप्तमीस्यसिच्सीयुट्तासिषु इति सप्तम्याः कार्यातिदेशे च रितार्थायाः षष्ठीं प्रकल्पयति चोदकोय थोक्तमभिप्रायमप्रतिपद्याह नसिध्यती

=ननु सप्तमी निर्दिष्टस्य सामर्थ्याल्लब्धा सतः कार्यातिदेशः ... ... सप्तमीति भावः ।१२ =कथं पुनर्भावकर्मणोरिति स्यवष्ठी निमित्त ... आह इति ।=

एवमपि षष्ठ्यभावान्न प्राप्नोति ननु च भावकर्मणोरित्येषा षष्ठी नैषा षष्ठी किं तर्हि अर्थनिर्देश एवासौ सप्तमी भावे चार्थे कर्मणि चेति एवं तर्हि भावकर्म
णोरित्येषा सप्तमी स्यादिष्विति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति एवमपि न सिध्यति किं कारणं न ह्यर्थेन पौर्वापर्यमस्ति
अर्थे असंभवात्भावकर्मवाचिनि शब्दे कार्यं विज्ञास्यते एवमपि सीयुटो न प्राप्नोति एवं तर्हि सप्तमे योगविभागः करिष्यते आर्धधातुकस्येट् यावा
दिनां नामसंसं आर्धधातुकस्य भवतीति विज्ञेयम् ततो वलादेः वलादेरार्धधातुकस्येड् भवतीति ॥ ॥ ॥

ति तत्राहितिनिः शब्दस्य प्रयोजनं शब्दे सप्तमीनिर्दिष्टे परिभाषोपस्थानं यथा स्यादर्थे माभूदिति शब्दात् बहिर्भूतो ऽर्थस्तु बहिर्भूतः निः शब्दो बहिर्भाववाची पूर्वोक्ते नामि
प्रायेणाह अर्थे ऽसंभवादिति एवमपीति नहि सीयुटो भावकर्मवाचिना प्रत्ययेन पौर्वापर्यमस्ति सीयुटस्तदवयवत्वात् आर्धधातुकस्येडिति परिभाषेयं क्रियते य
त्रेड्विधीयते तत्रार्धधातुकस्येति उपतिष्ठते तेन स्यादीनामेव अससामपि षष्ठीप्रकल्पना विज्ञेयिष्यति इदादिभ्यः सार्वधातुक इत्यत्र विशेषार्धधातुकस्येति नोपतिष्ठते ॥

मा०कै०६ यद्येवमिति स्यादीनामागमविधावुपयोगात्पुनः श्रुतभावाद्विशेषितः चिण्वदिड्भावः आर्धधातुकग्रहणेऽप्युपतिष्ठमाने तेन स्यादीनां विशेषणादागमसंबंधयोग्य
१६५ षष्ठ्यपादानादयमर्थः स्यात् अज्झनग्रहदृशां वा चिण्वदिड्भवति यत्र क्वचिद्यत्र तु स्यादयः सन्ति तेषामिडिति यथा कर्तुः कण्डूः सल्लोपश्चेत्यत्रेति भावः स्यादीनेवेति
तेषामेवश्रुतत्वात्तत्सन्निधानेन श्रुतकल्पनायाः युक्तत्वात्सव्यपेक्षत्वाद्गम्यते इति सप्तमीनिर्देशसामर्थ्याच्चिण्वदिड्भावे सर्वमुपयुक्तानां स्यादीनामार्धधा
तुकोपस्थानसामर्थ्यात्स्यादिद्वारा संबंधः के पुनरिति सर्वेभ्य इष्यते न च प्राप्नोतीति मत्वा प्रश्नः स एव पाणिभिप्रायमाशंकते येऽनुदात्ता अथ ये उदात्तास्तेषां

अनुदात्तभावश्चाविशेषितत्वादिति अज्झनग्रहदृशामिति चिण्वदिडेव चिण्वदुपयोगादेतत्संबंधिनां स्यादीनामिडिति सर्वस्मादनाभादिदेप्यविशेषितत्वात् अथ चिण्वद्भावसन्नियोगाधिष्ठत्वादिडन्तानेव प्रवर्तितिविनाभावविशेषितं तद्रूपसन्नियोगशिष्टत्वाच्चिण्वद्भावोऽपिनाविशेषितसुल्मम

यद्येवं स्यसिच्सीयुट्तासिषु इड्भवति चिण्वद्भावश्चाविशेषितो भवतीति तत्र को दोषः स्यसिच्सीयुट्तासिष्विड्भवति अज्झनग्रहदृशां वा चि
ण्वदिति क्वचिदेव चिण्वदिड्भावः स्यात् एवं तर्हि स्यादीन्नेवात्रापेक्षिष्यामहे स्यसिच्सीयुट्तासिष्विड्भवति अज्झनग्रहदृशां वा चिण्वत्स्यादिष्विति के पु
नरिमं इटं प्रयोजयंति येऽनुदात्ताः अथ ये उदात्तास्तेषां कथं सिद्धं तेनैव परत्वात् उदात्तेभ्योऽपि चिण्वदनेनैव इडेषितव्यः किं प्रयोजनं कारयतेः कारिष्य
ते हारिष्यते इटोऽसिद्धत्वात् णेरनिटीति णिलोपो यथा स्यात् कथं पुनरिष्यमाणो भवता उदात्तेभ्योऽनेनैवेट् लभ्यः न पुनरनेनाकृते नेति नैव स्यादिप्र
तिषेधेन ॥ ॥ श्री ॥

कथं सिद्धं तेनैव परत्वादिति किमेवं भवान्मन्यते इत्यर्थः ततः सिद्धान्तवाद्याह उदात्तेभ्योऽपीति अथवा शिष्याचार्यदेशीययोः के पुनरित्यादिके प्रश्नप्रतिवचने प
रत्वादित्यन्ते आचार्य आह उदात्तेभ्योऽपीति उदात्तग्रहणं चोपलक्षणं स्वरूपेणोऽनुदात्तेभ्योऽपि द्विधानात् तुल्यत्वान्न्यायस्यानेभ्योऽप्यनेनेड्विधिः इटो सिद्ध
त्वादिति ततश्चानिटीति प्रतिषेधाभावाण्णिलोप इति णिलोपः अपि चेट् सन्नियोगेन विधीयमानश्चिण्वद्भावोऽपि भवति अन्यथैतदभावे चिण्वद्भावो न स्यात्सं राम०
नियोगशिष्टानामन्यतराभावे द्वितीयाभावात् अन्वाचयेन तु विज्ञायमाने स्याच्चिण्वद्भावः यथा कर्तुः कण्डूः सल्लोपाभावेऽपि ॥ ॥ १६५

नित्योयमिति वलादित्वानपेक्षणात् आकृतिपक्षे च शब्दान्तरप्राप्त्यापि नास्य नित्यत्वम् भावकर्मार्थापेक्षणादस्य बहिरङ्गत्वमिति चेत् तस्यापि वलादित्वापेक्षत्वात्
नास्यान्तरङ्गत्वमित्यदोषः कानि पुनरिति प्रकरणाद्यवस्थाश्रयणादङ्गान्येव कार्याणि प्रयोजनान्यथाविशेषेणेति प्रश्नः इतरेणाङ्गान्येवोदाहरति वृद्धिरिति विघाती

× पि-नत्वस्मिन्कृते ×   = इतर इति प्रकरणाद्यवस्थाश्रीयते इत्यर्थः अन्यथादि णिदृष्टमात्रस्याति देशकृ निणिजदेशाजानिष्टुः घानिष्यते आनिष्यते अध्यापिष्यते ।९=

नित्योयं कृतेऽपि तस्मिन्प्राप्नोत्यकृतेऽपि प्राप्नोति किं कारणं अवलादित्वात् तस्मादनेनैवेडेषितव्यः कानि पुनरस्य[redacted]योगस्य प्रयोजनानि वृद्धि
श्चिण्वद्युक् हं हनेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति वृद्धिः प्रयोजनं चेष्यते चायिष्यते युक् प्रयोजनं ग्लास्यते ग्लायिष्यते हं हनेश्च घत्वं प्रयो
जनं हनिष्यते घानिष्यते दीर्घश्चोक्तो यो मितां वा चिणीति स च प्रयोजनं शमिष्यते शामिष्यते तमिष्यते तामिष्यते [redacted] इट् चासिद्धस्तेन
मे लुप्यते णिर्निमित्तमाद्यायं वलन्निमित्तो विघाती इटोऽसिद्धत्वात् अनिटीति णिलोपो यथा स्यात् कथमयं नित्यः कृताकृतप्रसङ्गित्वात् कृताकृतप्र
सङ्गी ह्ययं कृतेऽपि तस्मिन्निरि साप्नमिके आर्धधातुकस्येड्वलादेरिति पुनरनेनायं भवति अस्मिंस्तु विहिते वलादित्वस्य निमित्तस्य विहतत्वात् सा
प्नमिको न भवति निमित्तं विहतं भवति अयं तस्य निमित्तं विहन्तीति तस्मादयं नित्यः सत्त्वस्य निमित्तं न विहन्ति अथोपदेशग्रहणं किमर्थम्
चिण्वद्भावे उपदेशवचनं स्वकारगुणबलीयस्त्वात् चिण्वद्भावे उपदेशवचनं क्रियते स्वकारगुणस्य बलीयस्त्वात् कारिष्यते॥ ॥

ति अस्मिन्निरि सति वलादित्वलक्षणस्येटो वलादित्वाभावात् प्रवृत्तिलक्षणो विघातस्ततस्तस्य अनित्य[redacted]त्वमित्यर्थः अथ यावलन्निमित्त इट् विघाती अ
स्येटोऽप्रतिबन्धक इत्यर्थः स्वकारगुणस्येति अन्ये पांतु गुणोऽजन्तत्वं न विहन्तीति नित्यत्वाच्चिण्वद्भावः सिध्यति चायिष्यते लाविष्यते इति भावः॥ ॥

=आदिनाप्रवेशप्रतिबन्धमिति च अन्यथास्मादीनामजन्तत्वाच्चोपदेशापत्तिः २=

मा०कौ० ६ परत्वादिति द्वयोरप्यनित्यत्वात् वधिभावादिति ननु चार्धधातुक इति विषयसप्तम्याश्रयणादन्तरङ्गो वधिभावः नैतदस्ति लिङीति विशेषनिर्देशात्परसप्त
१६६ मीतद्विशेषणत्वादार्धधातुक इत्यपि परसप्तमीयत्त्वनुविशेषनिर्देशाभावोऽस्ते भूरित्यादौ तत्रैव विषयसप्तमीविज्ञानं भव्यादिसिध्यर्थं एकाच उपदेशेऽ
नुदात्तादित्यत्र नुवध्यतिभाष्यकारः वधिषीष्टेत्यत्र निपातनस्वरं प्रत्ययस्वरेण बाधिष्यते आर्धधातुकीयाः सामान्येन भवन्तीत्येवं ब्रुवता लिङीति विषय
सप्तम्येवाभ्युपगता ततश्चान्तरङ्गत्वाद्वधिभावः प्राप्नोति प्रतिपदविधेर्बलीयस्त्वान्नचिण्वदिड्वा भवति हनिणिङादेशप्रतिषेधश्चेति लुङ्परे आ

परत्वाद्गुणेर परत्वे चानजन्तत्वात् चिण्वदिड्वा न प्राप्नोति उपदेशग्रहणाद्भवति वधिभावात्सीयुटि चिण्वदिड्वा विप्रतिषेधेन वधिभावात्सीयु
तिनदोषोभवति युष्मत् अस्मत् अतियूयम् अतिवयम् युष्मदस्मदंतस्य यूयवयौ प्राप्नुतः निर्दिश्यमानस्यादेशाभवंतीतिनदो
षोभवति त्यदादिविकारः अतिसः उत्तमस्यः अत्सौ उत्तमासौ त्यदाद्यंतस्य त्यदादिविकाराः प्राप्नुवंति किमंतस्यकादेशः प्राप्नोति अति
कः परमकः निर्दिश्यमानस्यादेशाभवंतीतिनदोषोभवति उदः स्थास्तंभोः पूर्वत्वेप्रयोजनम् उदस्थात् उदस्थाता अटिकृतेसाट्कस्य

=नन्वितितकारदकारयोरेवस्यानिमेनसहितेवर्णांसदादीनामिति यदाचंते स्थितयोर्व पितदोषः स= ११ पूर्वसवर्णः प्राप्नोति उदः स्थास्तंभ्योरिति॥ ॥ ॥

=स्वप्रसंगः परिभाषयानविवादितः स्थानषष्ठी निर्दिष्टविषयेवदि साप क्रियामितिप्रकार्य:॥२=

गाधिकार इतिवचनात्तदंतस्यसमुदायस्यातिशब्दतकारस्यापितदोषः सः सादिति सत्वप्रसंगः अत्वंत्वलोः सस्येतिवचनादंतस्यसैवभवतीतितत्रविशेषा पाम० १७८
भावः परमक इति अनेकाल्त्वात्सर्वादेशः कः प्राप्नोति ननुनसत्वविधौ त्यदादीनामितिस्थानषष्ठीकातर्हि तदोरित्येषेतिकथं सत्वमतिशब्दतकारस्य प
रिह्रियते एवंतर्हि त्यदादीनां गणसंनिविष्टानां यौनिर्दिष्टौ तेतकारदकारौ तयोः सत्वविधानादतिप्रसंगाभावः॥ ॥श्री॥ ॥

=एवंतर्हीति परिभाषोपस्थानसामर्थ्यान्निर्दिश्यमानस्यराधवयवतदोरेवसत्वमितिसर्वान्तदोषइतिभावः निर्दिश्यमानस्येत्यस्य निर्दिश्यमानं निर्दिश्यमानावयवंचस्थानेनयुज्यतेइत्यर्थइतिनासर्व:॥२=

वाहऊठ् इति यद्यपि छ्वोः शूडित्यत्रास्य ठित्वं प्रतिपादितं तथापि यथाश्रुतं गृहीत्वा प्रश्नः संप्रसारणमित्यनेनेति वाक्यस्यमाविवर्णस्य वा संप्रसारणसंज्ञा
यां विज्ञायमानायां यणः स्थाने ऊठ् भवति अथ यण आदिः कस्मान्न भवति संप्रसारणप्रदेशान्तरेषु यण इति स्थानषष्ठ्या श्रयणादिहापि स्थानषष्ठ्ये
व युक्ता यथोक्तं संप्रदर्शादेशाः स्थाने योगत्वं प्रयोजयंतीति दिङ्ग्रहणं तु वैय्यर्थ्यं यद्येवमिति प्रश्न वाह ऊठ इति हि तेवकारस्य संप्रसारणे प्रवै

=तिप्सजीप्सत्रः १=   =एत्येधत्यूठ्स्विति सत्रविशेषणार्थं १=

निर्दिश्यमानस्यादेशा भवंतीति न दोषो भवति यस्माद्धि निर्दिश्यते तस्य कस्मान्न भवति अन्तराव्यवहितत्वात्तस्मात्तथैषा परिभाषा कर्तव्या उ
क्तं षष्ठी स्थाने योगेत्यस्य योगस्य वचने प्रयोजनं षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठी उच्चारितेति वाह ऊठ् ऊठादिः कस्मान्न भवति
आदिष्टिद्भवतीत्यादिः प्राप्नोति संप्रसारणमित्यनेन यणः स्थाने क्रियते यद्येवं वाह ऊठ्वचनानर्थक्यं संप्रसारणेन कृतत्वात्तु वाह
ऊठ्वचनमनर्थकं संप्रसारणेन कृतत्वात् संप्रसारणेनैव सिद्धम् का रूपसिद्धिः प्रष्ठौहः प्रष्ठ गुणः प्रत्ययलक्षणत्वात् प्रत्ययलक्ष
णेन गुणो भविष्यति एज्ग्रहणं वृद्धिः एज्ग्रहणाद्वृद्धिर्भविष्यति॥ ॥श्री॥ ॥छ॥

कादेशे च कृते गुण ओकारो एविभ्रमस्य याश्रयः तथा वृद्धिरेचीति वृद्धौ प्रकृतायां प्रष्ठौहः इत्यादि सिध्यति अनकारान्ते चोपपदे छंदसि एविन्ने दृश्यत इति शाल्प
हइत्यादि सिध्यर्थमपूठ्विधानं नोपपद्यते सत्यपि वा प्रयोगे वत्स्यर्थे वर्तमानस्योहतेः क्विपि शाल्पूहइत्यादिर्भविष्यति उपसर्गेष्वप्युपपदे वहेः ण्विः छंदसि
नास्ति यतो वर्द्धेर्बाधकं पररूपं प्रसज्येत तस्य ऊठ्विधानं सार्थकं स्यात्॥ ॥श्री॥ ॥श्री॥ ॥०॥

एवं तर्हीति संप्रसारणं यजादिप्रत्ययनिमित्तं न भसंज्ञाश्रयत्वाद्बहिरंगमंतरंगे णत्वाश्रये गुणे कर्तव्ये सिद्धमिति गुणो न स्यात्तद्भावे रूपं न सिध्येदित्यूड्विधान
मसिद्धपरिभाषां ज्ञापयति ननु नैतत्ज्ञापकसाध्यं लोकतः सिद्धत्वात्प्रसंगवर्त्ती हि लोकः नैतदस्ति यत्र युगपदंतरंगबहिरंगयोः प्राप्तिस्तत्र लौकिकन्याया
श्रयणाद्भवत्वंतरंगः इह तु बहिरंगनिमित्तमंतरंगमिति लौकिकन्यायानवतारः श्वयुव मघोनामिति मघवा बहुलमिति त्रादेशे कृते एकदेशविकृ

एवं तर्हि सिद्धे सति यद्वाह्युं दर्शयति तत्ज्ञापयत्याचार्यः भवत्येषा परिभाषा असिद्धं बहिरंगलक्षणमंतरंगलक्षण इति किमेतस्य ज्ञापने प्र
योजनम् पचावेदं पचामेदम् असिद्धत्वाद्बहिरंगलक्षणस्याद्गुणस्यांऽ तरंगलक्षणमेत्वं न भवति श्वयुवमघोनामतद्धिते श्वादीनां सं
प्रसारणे नकारांतग्रहणम् नकारांतप्रतिषेधार्थम् श्वादीनां संप्रसारणे नकारांतग्रहणं कर्तव्यम् किं प्रयोजनम् अनकारांतस्य माभूत्
मघवता मघवते तथा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येति एवं युवतीः पश्येत्यत्रापि
स्यादिति यत्तावदुच्यते नकारांतग्रहणं कर्त्तव्यमिति न कर्त्तव्यं उक्तं वा किमुक्तं उक्तमेतत् अवर्णस्त्रमघोन अन नशिष्यं छांदसं हितद्धि
यदप्युच्यते तथा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवति यथेह भवति यूनः पश्य एवं युवतीः पश्येत्यत्रापि स्यादिति लिंग
विशिष्टग्रहणे चोक्तं न वा विभक्तौ लिंगविशिष्टाग्रहणादिति अथवा परिशिष्टाद्योगविभागः करिष्यते श्वयुवमघोनामतद्धिते अल्लोपः अ
\ कारस्य च लोपो भवति॥ ततोऽनः इस्युभयोः शेषः श्वयुव॥
तस्यानस्त्वान्मघवतेत्यादौ संप्रसारणप्रसंगः अवर्णत्वेनित्विति मघवच्छब्दो मतुबंत इत्यर्थः न वा
विभक्ताविति यद्यपि विभक्तिमात्रिस्य संप्रसारणं न विधीयते तथापि विभक्तौ विधीयत इति लिंगविशिष्टपरिभाषानुपस्थानम् अन इत्युभयोः शेष इति
समुदायापेक्षणात् न च त्रादेशे कृते अन्तत्वमस्ति एकदेशविकृतस्यानन्यत्वेनाप्यन्नंतत्वन्नास्ति सामान्याप्तिदेशो विशेषानतिदेशात् युवतिशब्दोप्यन्नंतो न भ
\ वतीति तस्यापि संप्रसारणाभावः॥ ॥ ॥

=ननु अपवादविषयेण प्रकृतिभावस्य बाधकत्वात् अंतरंगत्वात् पूर्वं विप्रतिषेधाद्वा (?) इति: प्रसज्यत इत्यत आह: भेति।२=

[redacted] भावः सामन इति। सामन्येदेवनेसण: अत्रान्विति प्रकृतिभावादिलोपा:२

षपूर्वे अचेति किमिदं विध्यर्थम् नियमार्थमिति प्रश्नः। यद्यविशेषेणेति मंक्लसैकाजित्यादि: प्रकृतिभावः प्राकरणिकविध्यपेक्षो न तु वृद्धिगुणापेक्षः तत्र प्राकरणिकार्याणि भेदेनापेक्षे रन्त्रु भेदेन वेति पक्षद्वयोपपत्तिः अविशेषेणेति अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते नाक्ष्णएप इति नक्षो पत्यमिति सेनां तलक्षणेति एप: येचाभावकर्मणोरिति प्रकृतिभावादिलोपाभावेऽल्लोपप्रसंगः अपापीति तत्रस्यादृच्चे वीश्रयणात्। साम न्कानि। =अंदेतेति अदेनापेक्षावामनं तस्येनित्याया दिलोपस्येवप्रकृतिभावइतिप्रश्नः।२= =तेनसामान्यविशेषणमितादेरप्युपादेयत्वंलंतस्य विधीयमानप्रकृतिभावेन न विरुद्धमिति तेनकरणस्यवाक्यात:२=

षपूर्वहन् धृतराज्ञामणि अथ किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थं कथं वा अल्लोपार्थं कथं वा नियमार्थम् यद्यविशेषेणाल्लोपटिलोपयोः प्रकृतिभावः ततो विध्यर्थं अथ हि अणि टिलोपस्येव प्रकृतिभावः ततो नियमार्थम् अत उत्तरं पठति षपूर्वादीनां पुनर्वचनमल्लोपार्थम् षपूर्वादीनां पुनर्वचनं क्रियते अल्लोपार्थं अविशेषेणाल्लोपटिलोपयोः स प्रकृतिभावः अवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसंगः अवधारणे हि सति अन्यत्र प्रकृतिभावे उपधालोपः प्रसज्येत कथं यदि तावदेवं नियमः स्यात् षपूर्वादीनामेवाणीति एवमपि भवेदिह नियमान्न स्यात् सर्म नो वैमन इति ताक्ष्णएप इति च प्राप्नोति अथाप्येवं नियमः स्यात् षपूर्वादीनामण्येवेति एवमपि भवेदिह नियमान्न स्यात् [redacted] ताक्ष्णएप इति साम नो वै मन इत्यत्र तु प्राप्नोति अथाप्युभयतो नियमः स्यात् षपूर्वादीनामेवाणि अण्येव षपूर्वादीनामिति एवमपि साम न्यो वै मन्त्र इति प्राप्नोति तस्मात् सुष्ठूच्यते षपूर्वादीनां वचनं अल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसंग इति आतो धातोः आतोः नापः आतोः नाप इति वक्तव्यम् इहापि यथा स्यात् समासेनञ्पूर्वे क्त्वो ल्यविति अनापइति किं खट्वायां मालायाम् यद्यनाप इति तत्र साधुरितियत् आतो समास इति ननु सौत्रोयं निर्देश इति किं तदर्थेन योगविभागेन एवं तर्हि यदा वैयाकरणा अनुकरणशब्दे व्यवहरन्ति तदर्थो योगविभागः ॥ ते हि साधुभिर्व्यवहरमाणाः अभ्युदयभाजो भवंति [redacted] ॥ ॥

[illegible]

भा०कौ०६
१८०

त्क्वायामिति निपातनाल्लोपाभावो यादागमश्च सामान्यापेक्षं च निपातनं न सप्तम्यपेक्षमिति त्क्वाया इत्यपि भवति ततो धातोरिति इदं नित्यार्थं सत्त्वैरा विकल्पं त्वापयति सा चुय्यवस्थित विभाषे त्यावं तस्या त्क्वोपाभावोऽन्यस्य यथा प्रयोगं विकल्पः केचित्त्वी लिंगपुल्लिंगाश्रयं त्क्वायाः त्क्व इत्यादि रूपद्वयं व्याचक्षते मंत्रे आडि- ति पूर्वाचार्यप्रक्रियया तृतीयैकवचनग्रहणाद्व्याप्तिं मत्वाह मंत्रेष्विति तस्येति सप्तम्येकवचनस्य स्थाने याडादेशः छां

त्क्वायाम् निपातनादिति निपातनादेतत्सिद्धं किं निपातनम् त्क्वायां च प्रतिषेध इति यद्येवं नार्थोऽनापइत्यनेन कथं समासेऽनञ्पूर्वे त्क्वोल्यवितिनिपातनादेतत्सिद्धं कथं हलः श्नः शानज्झाविति एतदपि निपातनात्सिद्धम् अथवा योगविभागः करिष्यते आतः आकारलोपो भवति ततो धातोः धातोराकारस्य लोपो भवतीति मंत्रे घसह्वर इत्यादेरात्मनः मंत्रे घात्मनः प्रत्ययमात्रे लोपः प्रसंक्तव्यः इहापि यथा स्यात् त्मन्यासमंजन त्मनोरंतरस्थ इति यदि प्रत्ययमात्रे लोप उच्यते कथमात्मन एव निर्मिमीष्वेति तस्मान्नार्थः प्रत्ययस्य लोपेन कथं त्मन्यासमंजन त्मनोरंतरस्थ इति छांदसत्वात्सिद्धम् दृष्टानुविधिश्छंदसि भवति आदिग्रहणानर्थक्यमाकारप्रकरणात् आदिग्रहणं चानर्थकं किंकारणं आकारप्रकरणात् आत इति वर्तते मंत्रे घसह्वर इत्यादेरात्मनः तिविंशतेर्डिति तिग्रहणं किमर्थं नविंशतेर्डितिलोप इत्येवोच्येत नैवं शक्यम् विंशतेर्डितिलोप इतीयं सुच्यमाने त्यस्य प्रसज्येत सिद्धो त्यस्य यस्येति लोपेनैव तत्रारंभसामर्थ्यात्ति शब्दस्य भविष्यति कुतो नु खल्वेतत् अनेनस्यार्थे आरंभे तिशब्दस्य भविष्यति न पुनरंगस्येति तस्मात्तिग्रहणं कर्तव्यम् अथ क्रियमाणेऽपि तिग्रहणे त्यस्य कस्मान्न भवति ॥ ॥ ॥

दसत्वादिति यथा शिवासुद्रस्येति प्राप्ते शिवारुद्रस्येति रेफलोपः एवमिहाकारलोपः एवं च ब्रुवता सूत्रमेव प्रत्याख्यातं स नित्यारंभे नार्थ आदिग्रहणेन आतो एम०
धातोरित्यत आत इत्यनुवर्तनात् तिविंकुतो नु खल्विति वचनसामर्थ्यादलोंऽत्यपरिभाषाया अनुपस्थानात्समुदायस्यैव षष्ठीनिर्दिष्टस्य लोपः प्रसज्येत नत्व १८०
१ संशब्दितस्य तिशब्दस्य तिग्रहणेन तु सति तेर्लोपो भवति ॥ ॥ श्री

निर्दिश्यमानस्यादेशा भवन्तीति नानेन परिभाषाया व्यापारः कल्प्यते न हि निर्दिश्यमानपरिभाषा ऽलोऽन्त्यस्यादेः परस्येत्येतयोर्बाधिकाऽनयोर्निर्विषयत्वप्रसंगात् तस्मा
न्नियहणसामर्थ्यादलोऽन्त्यस्यानुपस्थाने सर्वस्यैव लोपो भवतीत्ययमस्य भाष्यस्यार्थः । टेः । डित्यभस्यापीति चुटू इति वचनादित्संज्ञाभावात् उकारस्य प्रवर्तते दीर्घकाशतु
षभ्राष्ट्रग्वटंज इति निर्देशात् तत्रस्थानुबन्धकरणसामर्थ्याद्भस्येति प्रकरणमिह बाध्यते । नस्त नकारान्तस्येति इनण्यन पत्येऽस्मिन्निति च प्रकृतिभावे प्राप्ते वचनं

निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति टेः । अभस्योपसंख्यानं कर्तव्यम् इहापि यथा स्यात् उपसरजो मन्दुरज इति तन्न हि वक्तव्यम् न वक्तव्य
म् कथमुपसरजो मन्दुरज इति डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् अभस्याप्यनुबन्धकरणसामर्थ्याद्भविष्यति । नस्तद्धिते । नान्तस्य टिलोपे
सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् । नकारान्तस्य टिलोपे सब्रह्मचा
रिन् पीठसर्पिन् कलापिन् कुथुमिन् तैतिलिन् जाजलिन् लाङ्गलिन् शिलालिन् शिखण्डिन् सूकरसद्मन् सुपर्वन् इत्येतेषामुपसंख्यानं कर्तव्य
म् । सब्रह्मचारिन् सब्रह्मचारिण इमे साब्रह्मचाराः सब्रह्मचारिन् पीठसर्पिन् पैठसर्पाः पीठसर्पिन् कलापिन् कालापाः कलापिन् कुथुमिन्
कौथुमाः कुथुमिन् तैतिलिन् तैतिलाः तैतिलिन् जाजलिन् जाजलाः जाजलिन् लाङ्गलिन् लाङ्गलाः लाङ्गलिन् शिलालिन् शैलालाः शिलालिन् शिखण्डि
न् शैखण्डाः शिखण्डिन् सूकरसद्मन् सौकरसद्माः सूकरसद्मन् सुपर्वन् सौपर्वाः सुपर्वन् चर्मणः कोश उपसंख्यानम् ॥ ॥

म् सब्रह्मचारिण इम इति तस्येदमित्यण् पीठेन सर्पतीति पीठसर्पी एवं वदण् कलापिना प्रोक्तमधीयते कालापाः कलापिनोऽणि प्राप्ते ततोऽध्येतृवेदित्रोरणः प्रोक्ता
ल्लुगिति लुक् कुथुमिना प्रोक्तमधीयते कौथुमाः तेन प्रोक्तमित्यण् एवं द्वितीयस्याणो लुक् तैतिलिजाजलिलाङ्गलिप्रोक्तमध्ययनं साहचर्यात् तैतिल्यादिशब्दैर्लक्ष्य
ते तेभ्यस्तदधीते तद्वेदेत्यण् प्रत्ययः तेन प्रोक्तमित्यत्र तु शौनकादिभ्यश्छन्दसीति छः प्रसज्येत केचित्तु तैतिलिशब्दं मन्त्राधीयते ॥ ॥ श्री ॥ ॥

=ननु यदि लोपे दृष्टिविषयाभावेन तन्निषेधसन्नियोगशिष्टं एत्वं स्यादत आह

भा०कै०६
१८१

चार्म इति तस्य विकार इत्यण् शौव इति स्वेरमित्यण् सेयाम जनपद मनुष्येष्व इत्येतत्नुमस्याख्यातम् अत्र परत्वा द्वृद्धौ प्राप्तायां द्वारादीनां चेति तत्प्रतिषेधे ऐजाग मे च कृते टिलोपः क्रियते संकोचार्थस्य त्वत्र शौव न इति विकार एव यव योक्त मात्र एप ज्ञिप्रकृति भावा भावा च्छौव इत्येव भवति सायंप्रातिक इति सायंप्रातः शब्दात् द्वंद्वा काला ठञ्जिति ठञ्प्रत्ययः यथा कथं चित्कालशब्दात् पिठञ् भवतीति कालसमुदायवाचिनोऽपि ठञ् भवति पौनः पुनिक इति पूर्ववठ्ठञ् आदि शब्दः प्रकारे टिलोपदर्शनेन च सादृश्यमाश्रीयत इति अराती यः शाश्वतिक इत्यत्र च टिलोपाभावः निपातनादिति अत एव निपातनात् तां तादि तिकादेशाभावः शाश्वतमिति भाष्यकारवचनप्रामाण्यादण् प्रत्ययः यस्येति च सवर्णदीर्घत्वे लोपे वा नास्ति विशेष इति मत्वा पृच्छति इवर्णस्येति हेदाक्षीति दाक्षि

चार्मः कोशः अश्मनो विकार उपसंख्यानम् अश्मनो विकार उपसंख्यानं कर्तव्यं अश्मनो विकारः आश्मः मुनः संकोचे शौवः संकोचः अव्ययानां च सायंप्रातिकाद्यर्थम् अव्ययानां चो[redacted]पसंख्यानं कर्तव्यम् किं प्रयोजनम् सायंप्रातिकाद्यर्थम् सायंप्रातिकः पौनः पुनिकः शाश्वतिके प्रतिषेधो वक्तव्यः न वक्तव्यः निपातनादेतत्सिद्धम् किं निपातनं येषां च विरोधः शाश्वतिक इति एवं तर्हि शाश्वते प्रतिषेधो वक्तव्यः शाश्वतम् नस्तद्धिते यस्येति च इवर्णस्य ई इति किमुदाहरणम् हेदाक्षिर्दाक्ष्या दाक्षेयः हे दाक्षि ई इति यदि टिलोपो न स्यात् परस्य ह्रस्वत्वे कृते सवर्णदीर्घत्वं प्रसज्येत दाक्ष्या इति यदि टिलोपो न स्यात् परस्य यणादेशे कृते पूर्वस्य श्रवणं प्रसज्येत दाक्षेय इति यदि लोपो न स्यात् परस्य लोपे कृते पू

शब्दादि तो मनुष्यजातेरिति ङीषि कृते तत्स्य संबुद्धौ ह्रस्वे कृते सवर्णदीर्घत्वे सति सवर्णदीर्घस्य श्रवणप्रसंगः नु चांतरंगत्वात् सवर्णदीर्घत्वे कृते ह्रस्वो भविष्यति एवं तर्हि वार्णा दांगं बलीय इति ह्रस्वत्वं मन्यते दाक्षि ई आ इति स्थिते शब्द परविप्रतिषेधात् स्य यणादेशे कृते पूर्वस्य श्रवणप्रसंगः सवर्णदीर्घस्य पूर्वविधित्वात् तत्र कर्तव्ये परयणादेशस्य नास्ति स्थानिवत्त्वम् यणादेशोऽपि कर्तव्ये वरई इतीकारप्रश्लेषादीर्घविधिं प्रति स्थानिवत्त्वनिषेधः दाक्षि ई इति स्थिते ढ्ढी प्यो ठगिति ढकि कृते परस्य लोपे कृते पूर्वस्य श्रवणप्रसंगः परलोपस्य स्थानिवद्भावात् ढ्कितनिमित्त लोपस्याप्रसंगात्॥ ॥श्री॥ ॥श्री॥ ॥

=ननु सवर्णदीर्घस्यानिवत्त्वाभावेपि यणादेशस्यानिवत्त्वात्कथं पूर्वस्य श्रवणप्रसंगो नत आह यणादेशोपीति २[redacted]

रामं०
१८१

नैतानीति यत्रांग वर्णयोर्युगपत्प्रसंग स्तत्र वार्णादांगं बलीयो भवतीति भावः यण ठकौत्वं गावेवन भवतः इदंतर्हीति सविशब्दात्सख्यशिश्वीति भाषायामिति ङी षि हलते सखी प्रति क्रांत इति प्रादिसमासे हलंते लिंगविशिष्टपरिभाषया ऽनिसत्वाद्सतिट चिगो ह्रिग्वोरिति ह्रस्वः तत्रासतीकारलोपे स्कादेश स्य एवं प्रसंगे तवङावा त् घिसंज्ञाप्रतिषेधः स्यात् प्रसज्यप्रतिषेधे चायंदोषो नैतु पर्युदासे न दंतस्य सखिशब्दादन्यत्वाद्धिसंज्ञायाः सिद्धत्वात् ङी षि तु लोपे हलंते ह्रस्वले च हलंते लाक्षणिक

नैतानिसंतिप्रयोजनानि सवर्णदीर्घत्वेनाप्येतानिसिद्धानि इदंतर्हि ऽतिसखेरागच्छति ऽतिसखेः स्वंयदि लोपो न स्यात् उपसर्जन ह्रस्वत्वे हलंते ऽ सखीति प्रतिषेधः प्रसज्येत यस्येत्यादौ श्यांप्रतिषेधः यस्येत्यादौ श्यांप्रतिषेधो वक्तव्यः काण्डेसौर्येनाम हिमवतः शृंगे सतर्हि प्रतिषेधो वक्तव्यः नवक्तव्यः इहश्याम्मित्यपि प्रकृतं नेत्यपितत्राभिसंबंधमात्रं कर्तव्यं यस्येत्यादौ लोपो भवति श्यांनइयङुवङ्भ्यां लोपो विप्रतिषेधेन इयङुव ङ्भ्यां लोपो भवति विप्रतिषेधेन इयङुवङोरवकाशः श्रियौ श्रियः भ्रुवौ भ्रुवः लोपस्यावकाशः कामण्डलेयः भाद्रबाहेयः इहोभयंप्राप्नो ति वात्सप्रेयो लैखाभ्रेयः लोपो भवति विप्रतिषेधेन गुणवृद्धीच गुणवृद्धीच इयङुवङ्भ्यां भवतो विप्रतिषेधेन गुणवृद्ध्योरवकाशः चे ता गौः इयङुवङोः स एव इहोभयंप्राप्नोति चयनंचायकः गुणवृद्धी भवतो विप्रतिषेधेन नवेयङुवङादेशस्यान्यविषयवचनात् नवार्थो

॥ विप्रतिषेधेन किंकारणं इयङुवङादेशस्यान्यविषयवचनात् ॥ ॥ श्री ॥

तात्सखिरूपस्य घिसंज्ञायाः प्रतिषेधाभावः कांडे इति यचि भमिति भत्वाल्लोपः प्राप्नोति सौर्ये इति सूर्येणएकदिगिति तेनैकदिगित्यण् तत्र यस्येति चेत्यकारलोपः प्राप्नोति सूर्यतिष्येतियलोपश्च यथानुवक्ष्यते सूर्यमत्स्ययोर्ड्यामिति तथात्र यलोपस्याप्रसंगः इहश्याम्मिति विभाषाङि श्योरित्यतः शीग्रहणं न संयोगादु मंतादि सतो नेति चानुवर्तते तेन वाक्यभेदेन श्यांकार्यं नविध्यते कामंडलेय इति चतुष्पाद्भ्यो ढञिति ढञ् एवं वात्सप्रेय इति लैखाभ्रेय इति गृष्ट्यादिभ्यश्चेति ढक् ॥

भा० कै० ६
१८२

इयङुवङादेशादिति आदेशानमादेशो विधानं इयङुवङोरादेश इति षष्ठीसमासः यथैयङुवङोः सर्वत्रानन्यपूर्वको नैवं गुणवृद्धी इति विप्रतिषेधानुपपत्तिरित्यर्थः सूर्यस्य सौरीति तेनैकदिगीत्यण् तदंतान्ङीप् ईकारे परतो त्र सूर्यशब्दो भं न भवति किं तर्हि अणंतमिति यकारलोपाप्रसंगः तु योग विवक्षायां तु देवतायां चाण्विधानात् ङीप् कृते सूर्यशब्दो गमी कारे भवतीति तत्रैव लोपः स्यात् सूरीति अंगान्यत्वादिति राजदंतादित्वात् परनिपातः यल्लोपविधिमिति उपधाविधिं प्रतितु प्रति

=तत्रियङुवङादेशविति बाधेयेकवचनमपुक्तमतआदेशनमिति ॥२॥ अंगान्यत्वादिति अयंभावः पद्यमणो कार्यस्य लोपे कृते एकदेशविकृतस्यानन्यत्वात् ... ... प्रत्यन्यत्वादंगत्वाभावः यल्लोपस्यानिवत्वनिषेधे अंगसंज्ञायां तनावा

इयङुवङादेशश्चान्यविषये आरभ्यते किं विषये यणादेशविषये यथैव यणादेशं बाधते एवं गुणवृद्धी अपि बाधेत तस्मात् गुणवृद्धिविषये प्रति
षेधः तस्मात् गुणवृद्धिविषये प्रतिषेधो वक्तव्यः न वक्तव्यः मध्येपवादाः पूर्वान् विधीन् बाधंत इत्येवमियङुवङादेशो यणादेशं बाधिष्यते गुणवृद्धी
न बाधिष्यते यस्येति च सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः सूर्यादीनामणंतेः प्रसिद्धिरंगान्यत्वात् सूर्यादीनामणंतेः प्रसिद्धिः सौरी बला
काकिंकारणमंगान्यत्वात् अणंतमेतदंगमन्यद्भवति लोपे कृते नांगान्यत्वं भवति सिद्धं तु स्थानिवत्प्रतिषेधात् सिद्धमेतत् कथं स्थानिवत्प्रतिषे
धात् प्रतिषिध्यते स्थानिवद्भावः यल्लोपविधिं प्रति न स्थानिवद् भवतीति एवमपि न सिध्यति किं कारणं अंगान्यत्वात् अन्यो हि सूर्यशब्दः अन्यः
२२ सौर्यशब्दः नैष दोषः एकदेशविकृतमनन्यद्भवतीत्येवं भविष्यति उपधाग्रहणानर्थक्यं च स्थानिवद्भावे चेदानीं प्रतिषिद्धे उपधाग्रहणमनर्थकं किं का
रणं स एव हि सूर्यादीनां यकारः किं यातमेतद्भवति सुष्ठु यातं साधु चयातं परिशाग्यादसिद्धत्वं ॥४॥ स्थानिवद्भावादंगान्यत्वं [illegible] ॥

षेधः प्रत्ययविधावेव स्थानिवत्त्वनिषेधे चावशिष्टस्यांगसंज्ञायामेकदेशविकृतस्यानन्यत्वात् यल्लोपः सिद्ध्यति अंत्यस एवेति अकारद्वयलोपे सति यकारस्यांत्यत्वात् तत्र यां
तानां सूर्यादीनां लोपो भवतीत्युच्यमाने लोपस्येति यकारस्यैव भविष्यति यग्रहणं तु न प्रत्याख्यायते तदंतरेणायं तत्वाभावादुक्तार्थत्वाच्च यग्रहणस्यां यातमिति भा० १८२
गतं ज्ञातं सिद्धमित्यर्थः साधु चयातमिति अनेन सिद्धेर्दार्ढ्यं प्रतिपाद्यते परिशाणिति अकारद्वयलोपस्यासिद्धत्वादंत्यो यकारो भवति॥ ॥श्री॥ ॥

=अंगसंज्ञायामिति तदुपधाग्रहणं प्रत्याख्यातुमेकदेशेनोपनिषदमिति ... ... मात्रं यल्लोपे स्थानिवत्प्रतिषेधे अंगसंज्ञायां तद्भावात् ... ... भवति ॥ = विशेषणाभावे अंत्यानां सूर्यादीनामिलर्थः संभवादिति भावः ॥२
... ... सूत्रे लोपो वोध्यः ॥३॥=

=पत्तजिपस्येति गोपस्त्यमाम्प्रमतारसिद्धत्वाजात्ः॥ = सर्यादावेवनार्थमिति ज्ञेयम्॥ =

अष्टेति इति अकारलोपस्य समानाश्रयत्वासिद्धत्वाद्यान्तत्वाभावः ततश्चोपधाग्रहणं कर्तव्यम् यद्यपीति नचोपधाग्रहणं क्रियते नापि सूर्यादीनामंगत्वेन विशेषणं तदर्थः इतितद्धिते च यदंगमनाश्रितरूपविशेषं तस्य यकारस्य लोपः सचेद्यकारः सूर्यादिषु यवो भवतीति सूत्रार्थः सूर्ये चरीति सूर्यस्य स्त्रीसूरीश्च तदर्थे चाण् प्रत्ययः तसिलादिष्विति पुंवद्भावः सूर्यमत्स्ययोरिति मत्स्यस्य ड्यां सूर्यागस्त्ययोश्छे च ड्यां च ते वं सिद्धे अर्थप्रधानं परत्वाद्बाधवेनादरः कृतः सौरीय इति सौर्ये स्यापमिति तिष्येत्यच्छः अगस्त्यस्यापत्यमिति ऋष्यणा तदन्ताद्ग्रीष्मश्च नक्षत्राणीति नक्षत्रसंबन्धिन्यणीत्यर्थः तिष्यपुष्ययोरित्युभयो

अथ सहतेनासिद्धत्वं असिद्धत्वाल्लोपस्यानन्तो यकारो भवति यद्यपि सहतेनासिद्धमेव मपि न दोषः नैवं विज्ञायते सूर्यादीनामंगानां यकारलोप इति कथं तर्हि अंगस्य यलोपो भवति सचेत् सूर्यादीनां यकार इति एवमपि सूर्ये च रीति प्राप्नोति तस्मादुपधाग्रहणं कर्तव्यम् विषयपरिगणनं च वि षयपरिगणनं च कर्तव्यम् सूर्यमत्स्ययोर्ड्याम् सूर्यमत्स्ययोर्ड्यामिति वक्तव्यम् सौरी मत्सी सूर्यागस्त्ययोश्छे च ड्यां चेति वक्तव्यम् सौरी सौरीयः आगस्ती आगस्तीयः तिष्यपुष्ययोर्नक्षत्राति तिष्यपुष्ययोर्नक्षत्राति यलोपो वक्तव्यः तैषम् पौषम् अन्तिकस्य तसिकादिलोपः आद्युदात्त त्वं च अन्तिकस्य तसिकादिलोपो वक्तव्यः आद्युदात्तत्वं च वक्तव्यम् अन्तितः आगतो न दूरात् तमतादेश्च लोपो वक्तव्यः अग्रेत्वन्तो अन्तमः अन्ति तमेऽवरोहति तसौ लेपश्च न वक्तव्योऽदृष्टो हाशतयेपि हि घोलोपोतिपदिसन्तं अन्तितस्त्॥ ॥श्री॥ ॥७॥

पादानासिद्धश्च शब्दस्य लोपाभावः अन्तितर इति उपादाने चाहीयरुहोरिति तसिः तादेश्चेति चकारात्तादेश्च यदातादेस्तदांतमः कादिलोपे त्वं तितमः तसीलेप इति कादिलोपश्च बहुलमिति विषयमनुपादाय पठितव्यमित्यर्थः दाशतय इति दशावयवा यस्य दशतयस्तत्र भवो दाशतयः चतुःषष्ठ्यांऽयः घोलोप इति घुशब्देनोत्तरपदं पूर्वाचार्यप्रसिद्धोच्यते अन्तिके सीदतीति सत्सूद्विषेति क्विप् पूर्वपदादिति षत्वं॥ ॥श्री॥ = बहुलवचनाहितेनार्थः ॥ ॥७॥ ॥

षष्ठाध्यायः।

भा० कै० ६ १८३ अघ्याविति अनुत्तरपदइत्यर्थः येयत्प्रत्यये परतोऽतीतिकृतकादिलोपोऽतिकशब्दोपलभ्यते अथर्ववेदे अन्तिकेमवुइतिमवेछंदसीतियत्तिकृतेऽतितियइतिम
वति कादिलोपस्यासिद्धत्वाद्भादिमसिद्धलाद्यस्येतिलोपोनभवति बिल्वच्छयहणमितिकृतकुगागमस्यनिर्देशाच्छ एवयहीष्यतइतिभावः बिल्वकेभ्य
इति बिल्वशब्दात्स्याद्यर्थेकप्रत्यये सतिछयहणेकुगागमनिर्देशाएवननिर्द्दीयतेतिकप्रत्ययान्तादपिपरस्यभ्यसोलुक्प्रसंगः भस्येतिवर्त्ततइति
तत्रार्थाद्विभक्तिविपरिणामेसतिभसंज्ञकेभ्यः परस्यलुग्भवति बैल्वकइति अनुशास्त्रादेशोत्सर्गतद्धितइति नस्तद्धितइतिवर्त्ततेनविल्वकादिभ्योभ

तद्धितइतिवर्त्तते नविल्वकादिभ्यो भस्यावयवस्य छस्य लुक् छयहणं शक्यमकर्त्तुम् इहकस्मान्नभवति बिल्वकेभ्यः भस्ये
तिवर्त्तते एवमपिबिल्वकायेतत्रप्राप्नोति तद्धितएतिवर्त्तते एवमपिबिल्वकस्यविकारः अवयवोवाबैल्वकः अत्रप्राप्नोति तद्धिते तद्धि
तस्यइतिवर्त्तते एवमपिबिल्वकीयायांभवोबैल्वकः बैल्वकस्यकिंचिद्बैल्वकीयं अत्रप्राप्नोति नसबिल्वकात् बिल्वकादिभ्योयोविहित
इत्युच्यतेनचासौबिल्वकशब्दाद्विहितः किंतर्हिबिल्वकीयशब्दात्॥ ॥श्री॥ ॥श्री॥ ॥

तद्धितस्य = नन्वलोऽन्त्यकालोपेनवानिरुक्तौ विशेषाभावोऽस्त्यात्रतस्येति आश्रयतावत्पूर्ववलुकोनासिद्धत्वं = ननुकप्रत्ययान्तबिल्वप्रकृतिकविकारादिघर्षकाणनबैल्वकशब्दादिमर्थे छेबैल्वकीयशब्दादौलुक्प्रसक्तासाणोबिल्वकादि

संज्ञकेभ्यः परस्यतद्धितेपरतोलुग्भवतीतिसूत्रार्थः संपद्यते एवमपीति बिल्वादिर्यंतेसामितिउत्कण्ठादिभ्यश्छः कुगागमश्चततस्तत्रभवइत्यण् तस्मिन्परतश्छस्यलु
क् ततोवृद्धाच्छः अस्मिन्छयहणोऽछेपरतोऽणोलुक्प्रसंगः नतश्चनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधात्वृद्ध्यभावेरूपंनसिध्येत् नसबिल्वकादितिविहितइति
शेषः बिल्वकादिभ्योयोविहितइति बिल्वकादिभ्यइत्यागंतुनाकारेणकृतकुगागमनिर्देशः तेनायमर्थः भाविकुगागमेभ्योबिल्वादिभ्योयोविहितः प्रत्ययस्तस्य
तद्धितेलुग्भवति नचच्छात्प्रागभाविकुगागमेभ्योबिल्वादिभ्यः प्रत्ययोविधीयतइतिनार्थश्छयहणेन॥ ॥श्री॥ ॥ राम० १८३

एवं तर्हि इति छमात्रस्य लुग्यथा स्यात् कुगागमो मा निवृतदित्येवमर्थं क्रियते यदि चैषा परिभाषा न स्यात्तदा कुको नैव निवृत्तिः प्राप्नोतीति किं तदभावार्थेन छग्रह
णेन कश्चित्त्वेषा परिभाषा नाश्रीयते यथा श्येनेय इत्यादौ यस्येति लोपेन निवृत्तेऽपीकारे तत्सन्नियुक्तो नकारो न निवर्त्तते तथा च स्त्रियाः पुंवदित्यत्रोक्तमेतद्भाष्ये इ
त्यत्र पुंवद्भावेन स्त्रीप्रत्ययमात्रस्य निवृत्तिः क्रियतेऽर्थस्य त्वनिवृत्तत्वान्नकारस्य श्रवणं प्रसज्येतेति तथा च श्रोत्रियस्य घलोप इति घे विनिवृत्तेऽपि श्रोत्रभावो
न निवर्त्तत इति तत्रानित्या परिभाषेति प्रतिविधेयम् तुरिष्ठुः सर्वस्येति सर्वस्य तग्रहणस्य लोपो न तु लोः सस्येत्यर्थः अंतस्य लोप इति टेरित्येवांत्यस्य लोपस्य सि
वचन-

एवं तर्हि सिद्धे सति यच्छग्रहणं करोति तत् ज्ञापयत्याचार्यः भवत्येषा परिभाषा सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभाव इति तस्माच्छग्रहणं कर्त्त
व्यं छस्यैव लुक् यथा स्यात् कुको मा भूदिति तुरिष्ठेमेयस्सु तुः सर्वस्य लोपो वक्तव्यः अंतस्य मा भूदिति स तर्हि वक्तव्यः न वक्तव्यः सर्वलोप विज्ञान
मंतस्य वचनानर्थक्यात् तुः सर्वलोपो विज्ञायते कुतः अंतस्य वचनानर्थक्यात् अंतस्य लोपवचने प्रयोजनं नास्तीति कृत्वा सर्वस्य भविष्यति
अथवा लुक् प्रकृतः सोऽनुवर्त्तिष्यते अशक्यो लुगनुवर्त्तयितुं किं कारणं विजयिष्ठयोर्गुणादर्शनात् विजयिष्ठ करिष्ठयोर्गुणो दृश्यते विजयि ष्ठकरि२
ष्ठ अस्तु तिं करिष्ठः टेः णाविष्ठवत्प्रातिपदिकस्य णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः किं प्रयोजनं पुंवद्भावरभावटिलोपयणादिपरार्थम् पुं
=तन्कातादिति· एकं च न लोकेतिनिषेधात् प्राप्तस्तु तिमितिवद्भावे द्वितीयाजवतीति भाष्यः। [illegible] वद्भावार्थं एनीमाचष्टे एतयति श्येतयति॥ ॥श्री॥ ॥

कृत्वात् विजयिष्ठ इति विजेत शब्दात् तुश्छंदसीतीष्ठन् प्रत्ययः टेः णाविति प्रातिपदिकग्रहणं प्रत्ययकार्याणामतिदेशो मा भूदित्येवमर्थं तेन बहून् आचष्टे भावयतीति णि
चोऽपि णत्वं भवति तदभावे भूभावेनापि न भवितव्यं संनियोगशिष्टत्वादिति बहयतीति भवितव्यमिति केचित् एतयतीति तसिलादिष्वाकृत्वसुच इति पुंवद्भावो विहित इति णावपि
भवति टिलोपे नैवं संनियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायां पुंवद्वचनं संनियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं तेन श्येनेय इत्यादि सिद्धं भवति॥ ॥
×इष्ठन्प्रत्ययः। तत्र तु किं सति नतु मतांगस्येति प्र[redacted]स्य लक्षणप्रतिषेधात् गुणेन स्यात्सर्वत्र गुणेन प्रवर्त्तते अंतरंगानपि विधीन् बहिरंगो लुग्बाधत इति वचनात् करिष्ठ इति तन्मतात्×

भा० कै० ६
१८४

विन्मतोरिति स्रग्विणमाचष्टे स्रजयति अंगवृत्त इति वृद्धिरत्र न भवति यत्तत्वनिष्ठितमंगं तत्र वृद्धिर्भवत्येवमापयति स्थापयतीति युवानमाचष्टे ऽल्पमाचष्टे क
नयति इष्ठस्य किमर्थमिति किमिकारान्तः समुदाय आगमोऽथ यकारमात्रमिकारस्तूच्चारणार्थः इति प्रश्नः किं चात इति उभयथा दोषाभाव इत्यर्थः तत्र
तिपादयति यदीति ज्यादादीयसः ज्या त्वरस्येयस आदेः परस्येत्याकारः क्रियते तत्रोच्यते किमर्थमिति अकृद्यकार इति क्ङितीति न नानुवर्त्तेत इति भावः
उरूपेसा दोष्ठ्यंदसत्वादीर्घो भावः अंगवृत्त इति अंगे वृत्तं निष्पन्नं यत्कार्यं तस्मिन्सति पुनरन्यस्यांगस्य प्रवृत्ताववि धानं भवति आजनोर्जेसत्रापीयं परि

रमावार्थे पृथुमाचष्टे प्रथयति म्रदयति टिलोप पटुमाचष्टे पटयति यणादिपरार्थे दूरमाचष्टे दवयति किंपुनरिदं परिगणनमाहोस्विदुदाहरण
मात्रम् उदाहरणमात्रमित्याह भारद्वाजीयाः पठन्ति णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलो
पयणादिपरप्रादिविन्मतोर्लुक्कन्विध्यर्थमिति इष्ठस्य पिट्च किमर्थं पिशब्दः आहोस्विद्यकारः किं चातः यदि टिलोपोऽप्यनुवर्त्तेत न तोपि शब्दः
अथ निवृत्तं ततो यकारः ज्यादादीयसः किमर्थं ज्या त्वरस्येयसः आत्त्वमुच्यते न लोपः प्रकृतः सोनुवर्त्तेत का रूपसिद्धिः ज्यायान् अकृद्यकार
इति दीर्घत्वं भविष्यति एवं तर्हि सिद्धे सति यत् ज्या त्वरस्येयसः आत्त्वं शास्ति तत् ज्ञापयत्याचार्यः भवत्येषा परिभाषा अंगवृत्ते पुनर्वृत्तावविधि
रिति किमेतस्य ज्ञापने प्रयोजनं पिवेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति अथ किमर्थं ज्या त्वरस्येयसः दीर्घ उच्यते न अकार एवोच्ये
त का रूपसिद्धिः ज्यायान् अतो येतः दीर्घस्य दीर्घो भविष्यति एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं ने ति १२८ तोहलादेर्लघोः कथमिदं विज्ञायते हला

भाषाज्ञापिता तत्रास्मिन्स्थिते ज्ञापके जाइत्यादेशविधानं दीर्घश्रवणार्थं तस्मिंश्च ज्ञापके सति ज्यायानिति सिध्यर्थमाद्वचनम् अन्यथादिलोपे कृते परिभाषावशा
दीर्घो न स्यात् पिवेरितिपाघ्रादिसूत्रेणापराप्पिवादेशो हलन्तः क्रियते तदा गुणप्रसंगः परत्वदंतस्तदा गुणप्राप्त्यभावः १२२ कथमिदमिति इहांगस्येति प्रकृतं स्त तइ
॥तिचश्रुतं तत्र विशेषणविशेष्यभावे कामाचारात्प्रश्नः ॥ ॥श्री॥ ॥८॥

राम०
१८४

युक्तंपुनरिति घात्वादेरित्यादेरवयववाचिन आदिशब्दस्य दर्शनादवयवापेक्षत्वाच्चावयवान्तरेण संबंधाभावादिति भावः अन्यस्यान्य इति आसंतमेदारसंबंधपरस्परस्यावयवयोर्देशेयतियत्रभेदविवक्षा वृक्षाणां वनं वृक्षवनमिति तत्रावयवावयविभागो नान्यत्रेत्यर्थः दधिभोजनमिति यदुच्छोपनीतं दधिभोजनं कार्यसिद्धेः सूचकत्वात्समीपमित्यर्थः अप्रथीयानिति अपृथुशब्दात्पृथुस्य दृशगुणवचनादीयसुन्प्रत्ययः अनृचीयानिति नसंस्पृचोयेषां तेन चामाणवकास्ते संतियस्मिन्देशे सोः नचवांस्ततईयसुन्नविन्मतोरितिमतुब्लुक् तत्रांगं हलादिर्न भवति ऋकारस्य हलादिरितिग्रहे शब्दसंगः ऋचीयानिति ऋचवच्छब्दात्

अवयवावयविनोः स्तुनासंतंनेदद्ग्रहः यत्रेति ॥ विन्मतोर्लुग्विधानादेवागुणवचनादीयसुन्निति भावः ॥ वयस्या ॥ (illegible marginal gloss)

आहोस्विद्धलादेरृकारस्येति युक्तं पुनरिदं विचारयितुं नन्वनेनासंदिग्धेनांगविशेषेणभवितव्यं कथं ऋकारस्य नाम हलादिः स्यात् अन्यस्यान्यः अपमादिशब्दः स्यैवावयववाची तद्यथा ऋग्गादिः अर्धर्चादिः श्लोकादिरिति अस्ति सामीप्येवर्तते तद्यथा दधिभोजनमर्थसिद्धेराहिः दधिभोजनसमीपे घृतभोजनमारोग्यस्यादिः घृतभोजनसमीपे यावता सामीप्येऽपि वर्तते जायते विचारणा हल्समीपस्य ऋकारस्येति अथवा हलादेरंगस्येति किंचातः यदि विज्ञायते हलादेरंगस्येति अप्रथीयान् अम्रदीयान् अत्र न प्राप्नोति अथ विज्ञायते हलादेरृकारस्येति अनृचीयानत्रापि प्राप्नोति उभयथा स्वचीयानित्यत्र प्राप्नोति ॥ यथेच्छसि तथास्तु अस्तु तावद्धलादेरंगस्येति कथमप्रथीयानिति न द्धितान्तेन समासो भविष्यति नप्रथीयान् अप्रथीयानिति भवेत्सिद्धं यदा तद्धितान्तेन समासः यदा तु खलु समासात्तद्धितोत्पत्तिस्तदा न सिद्ध्यति नवै समासात्तद्धितोत्पत्त्या भवितव्यं किं कारणं बहुव्रीहिणोक्तत्वान्मत्वर्थस्य भवेद्यदा बहुव्रीहिस्तदा न स्यात् ॥ ॥

सुनमनुपोलुकू यथेच्छसीति वक्ष्यमाणपरिग्रहणादिति प्रसंगनिरासादिति भावः नवै समासादिति प्रकृताभिप्रायेणेदमुच्यते ईदृशात्समासादीदृशस्तद्धितो नोत्पद्यते तथाहि अपृथुशब्दस्तसुरूपो बहुव्रीहिर्वा गुणवचनो न भवतीति ततईयसुन्नभवत्येव अथ मतं तादीयसुनउत्पत्तिः तत्र बहुव्रीहिणोक्तत्वान्मतुपोऽभावात्तन्नापि तसुरूपान्मतुबुत्पत्तिः लाघवाद्बहुव्रीहेरेवोत्पत्स्यमानं भवेद्यदेति सत्यं न्यपदार्थप्रधानत्वात्तु गुणवचनो न भवति ॥ ॥श्री॥ ॥७॥ ॥

भा०कै०६
१८५

यदा त्वितिथ्या अब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिरुच्यते तथा अपृथुरिति [redacted] पृथुत्वसदृशगुणान्तरयुक्तोऽभिधीयते न च समासेन तिगुणमुक्तवान्गु
णवचनो यः शब्दो गुणमभिधाय [redacted] गुणोपसर्जने द्रव्ये वर्त्तते तस्मादजादिभ्यां भाव्यम् न च समासः केवलेगुणे कदाचित् प्रयुज्यते नित्यं द्रव्यवाचित्वात् अपृथु अथवा२
शब्दः पृथुसदृशगुणवाचित्वेऽपि विशिष्टगुणवचनो न भवति पृथुशब्दवत् अपृथवः एव न सन्तीति मतुपः प्रकृतय इति शेषः समाने चैव बहुव्रीहिणा भाव्यं
न तु मत्वर्थीयार्थे न तत्सरूपेण भिन्नार्थत्वे तु भाव्यमेव गौरखरवदरण्यं पलाशसर्पवान्वल्मीक इति अत्र हि जातिविशेषेण तद्वत्ता प्रतिपादयिषिता नान्तरेण
तत्सरूपं मत्वर्थीयार्थे बहुव्रीहिमात्रेण प्रतिपादयितुं शक्यते अन्ये त्वाहुः अविद्यमानापि पृथवस्ते सन्तीति विरोधाद् तस्तु पाधिकत्वाभावान्मतुब्भवतीति ए

यदा तु तत्सरूपस्तदा प्राप्नोति न पृथुः अपृथुः अपमपृथुः अयमप्यपृथुरयमनयोरतिशयेनापृथुरपृथीयान् इति न समासादजादिभ्यां भवित
व्यम् किं कारणम् गुणवचनादिस्तुच्यते न च समासो गुणवचन इति यदा तर्हि समासाद्विन्मतुपो [redacted] विन्मतुबंतादजादी तदा प्राप्नुतः अवि
द्यमानाः पृथवः अपृथवः अपृथवोऽस्य सन्ति अपृथुमान् अयमपृथुमान् अयमप्यपृथुमान् अयमनयोरतिशयेनापृथुमान् अ
पृथीयानिति नैष दोषः अपृथव एव न सन्ति कुतोऽस्य पृथवः इति इह कस्मान्न भवति मातयति भ्रातयति लोपोऽत्र बाधको भविष्यति इदमिह
संप्रधार्यं लोपः क्रियतां रभाव इति किमत्र कर्त्तव्यं परत्वाद्रभावः यदि पुनरवृद्धिष्टस्य रभाव उच्यते नैवं शक्यमिहापि प्रसज्येत कृतमाचष्टे कृतयतीति॥

तदपरे न क्षमन्ते पृथुत्वगुणरहिताः स्वरूपेणाविद्यमानाः पृथवः एवापृथव उच्यन्त इति कथं सत्योपाधिकत्वं न स्यात् ननु च यथा न चीयानित्यत्र बहुव्रीह्यर्थे न तद्वत्ताविवक्षायां मत्वं
तादीयस्तुन्भवति तथा पृथुशब्दादपि मतुपा तदंतान्चेयसुना भाव्यम् एवं तर्ह्यनभिधानाद्बहुव्रीहेः कुतश्चिन्मतुपा न भवितव्यमिति मन्यन्ते तदेवमपृथीयानिति तद्धितांते न स राम०
मास इति स्थितम् स्वचीयानित्येतस्यापि परिहारः पचोद्यमुपन्यस्यति इह कस्मादिति मातयतीति उणृदृयोः खुसच्चानिप्रातिपदिकानि इति पृष्ठाश्च यणः तुः शिष्टमेव १८५
स्तु इतीष्ठवद्भावान्न शब्दस्य लोपाभावः यदि पुनरीरिति टिलोपो प्रवर्त्तते ततश्चास्य स्यात् शब्दस्य टिलोपेनं तस्य स्यात् रभाव इति मातयतीत्यादौ ण्यन्तदेशाभावः॥ मातयतीत्यभावात्

एवं तर्हि किं पठितगणनेच नति हलादेर्न घो दितिन कर्तव्यं॥१

प्रकृत्यै किमिष्टमेयस्त्विति किं मन्यासत्या श्रयेणेष्टमेयसोपे स्यंतेः यथा प्रामा श्रयेणात द्धित इति प्रश्नः स्त्रीति स्वशब्दादिनि कृते प्रकृति भावाद्यस्येति लोपो न प्राप्नोति शौ
वमिति मुनो विकारावयवयोः प्राण्प्रत्रि कृते न स्तद्धित इति टिलोपो न प्राप्नोति अधुनेति इदमो धुनाप्रत्यये परत इशादेश स्तस्य यस्येति लोपो न प्राप्नोति शौव मिति
टिलोपं बाधित्वा परत्वात् वृद्धिः प्राप्ता द्वारादीनां चेति प्रतिषिध्यते ऐजागमश्च क्रियते तत्रैकाच्त्वाभावाट्टिलोपभावः अधुनेति इदमो इशभावो धुनाप्रत्यय श्च नि

एवं तर्हि परिगणनं क्रियते पृथु मृदु कृश भ्रश दृढ परिवृढानामिति वक्तव्यम् प्रकृत्यैकाच् प्रकृत्यैकाजिति किमिष्टमेयस्तु आहोस्विदविशेषेण
किं चातः यद्यविशेषेण स्त्री स्त्री शौवं अधुना अत्रापि प्राप्नोति स्त्रियि नावेव नस्तः कथमुक्तमेतदेकाक्षराकृतो जातेः सप्रम्या चेन तोऽस्तो स्व
वानृवानृइत्येवं भवितव्यम् शौवमिति परत्वादैजागमे कृते टिलोपेन भवितव्यम् अधुना इति सप्रकृतिकस्य सप्रत्ययकस्य स्थाने निपातनं क्रियते इ
दं तर्हि प्राप्नोति द्रव्यम् यस्येत्यादौ प्रकृतिभावः यस्येति यस्य लोपप्राप्तिस्तस्य प्रकृतिभावः न चेतानियस्येत्यादौ एवमपि स्त्रियै हितः स्त्रीयः ज्ञादे
वतास्य स्थालीपाकस्त्वः स्थालीपाक इत्यत्र प्राप्नोति तस्मादिष्टमेयस्तु प्रकृतिभावः अथ इष्टमेयस्तु प्रकृतिभावे किमुदाहरणम् प्रेयान्
॥ प्रेष्ठः नैतदस्ति प्रादीनामसिद्धत्वान्न भविष्यति॥ ॥श्री॥ ॥

प्राप्यते द्रव्यमिति द्रोर्विकारो द्रोश्चेति यत्प्रत्ययः ओर्गुण इति गुणो न प्राप्नोति यस्येत्यादाविति यस्येत्यादीनि कार्याण्यपेक्ष्य प्रकृतिभावो विधीयते ओर्गुणस्तु कृते अप्रः प्र
वे इति प्रकृतिभावाभावः स्त्रियै हित इति प्राक्क्रीताच्छ इति छः तत्र यस्येति लोपो न प्राप्नोति इयङः प्रसंगः प्रादीनामिति अस्ति द्वत्वादेव एकाच्त्वाभावात् प्रकृतिभावोऽपत्र ना
स्ति नापि टिलोपः स्थाल्या श्रयष्टिलोपः प्राप्नोतीति चेत् विप्रतिषेधे तावदसिद्धत्वाभावस्य ज्ञापितत्वात् परत्वात् आदिगुणे कृते पुनः प्रसिद्धत्वेनाविद्यमानत्वात् तस्याश्रयो
॥ नापि पुनराश्रयष्टिलोपः प्राप्नोति॥ ॥श्री॥ ॥

=शब्दासिद्धत्वाश्रयणादितिभावः॥१=

=तस्याभावादितिभावः॥१=

=मामन्येन तुं न कं म प्रकृतिभावप्रसक्तविरोधः गणं॰ २= अभिव्यक्तत्वमसंमाव्यानेतुमेछादवपकारोच्चारणसामर्थ्यादेव टिलोपाभावप्रतिबोधं॰ १=

भा॰ कौ॰ ६
१८६
श्रेयानिति ञ्पप्रसिद्धाधिकाराद्वृद्धिःस्थादिविधानादसिद्धत्वाभावः एकाच उच्चारणसामर्थ्यादिति अकार उच्चारणार्थो न प्रतिज्ञातोऽपितु अवर्णार्थः विन्मतोस्त लुगर्थमिति लुकप्रयोय स्पत स्तुगर्थे लुक्कृते टिलोपाभावार्थमित्यर्थः कथमन्यस्येति विन्मतुबं तस्यय ष्ठि लोपस्तं लुग्बाधतां तस्मिंस्तु कृते यष्ठि लोपः प्राप्नोतितं कथं बाधते न हि तस्मिन्नप्राप्ते लुगारभ्यत इत्यर्थः यथैवेति लुको बाधकत्वाभ्युपगमेऽतिप्रसंग इत्यर्थः ब्रह्मीयानिति अतिशयेन ब्रह्मवानितीयसुनि मतुब्लुकि च नस्तद्धित इति टिलोपः नाप्राप्त इति यद्यपि विषयभेदेन टिलोपोभिन्नस्तथाप्यनपेक्षितविषयभेदं टिलोपप्राप्तिः परिछिन्नासावकाशा लुका बाध्यते तत्र विन्नंतस्य नांतत्वाचस्तद्धित इत्ययमपि टिलोपो लुका बाध्यते
×शास्त्रमेन नाप्राप्तिन्याये नलुका बाध्यते तेन स्त्र जीयानित्येतस्मिन्नंगे संप्रति की [redacted] मा विनी च टिलोप ×
इदं तर्हि श्रेयान् श्रेष्ठः प्रकृत्यैकाजिष्ठेमेयस्सु चेदेकाच उच्चारणसामर्थ्याद्वचना [redacted] प्रकृतिभावः प्रकृत्यै काजिष्ठेमेयस्सु चेत्तत्र किं कारणं एकाच उच्चारणसामर्थ्यात् अंतरेणापि वचनं प्रकृतिभावो भविष्यति विन्मतोस्तु लुगर्थं प्रकृतिभावो वक्तव्यः स्त्रग्वितरः स्त्रजीयान् स्त्रग्वितमः स्त्रजिष्ठः स्तुग्वत्तरः स्तुचीयान् स्तुग्वत्तमः स्तुचिष्ठः ननु च विन्मतोर्लुकि कृते टिलोपं बाधिष्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् असतिखल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात् कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति इदं तावदयं प्रष्टव्यः यदि तर्हि विन्मतोर्लुक् नोच्येत किमिह स्यादिति टिलोप इत्याह टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स बाधको भविष्यति यदप्युच्यते असति खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौंडिन्यायेति सत्यपि संभवे दधिदानस्य तक्र
=कथं तर्हि नांतस्य टिलोपे येन नाप्राप्तिन्यायाभाव उक्तो तत्राह मतोस्त्विति॰ १= ×अयं स्यात् यथैव रवल्वपि विन्मतोर्लुकृ टिलोपं बाधत एवं नस्तद्धित इत्येतदपि बाधेत अयत्तरो ब्रह्मीयान् ब्रह्मवत्तर इति यावत् ×२
मतोस्तु लुका नस्तद्धित इति टिलोपो न बाध्यते ननु किमुच्यते नस्तद्धित इत्यस्मिन्पुनः प्राप्ते चाप्राप्ते चेति पावता मतोर्नांतत्वाभावादप्राप्त एव नस्तद्धित इति टिलोपः नैष दोषः मतुप्प्रत्ययो नकारांतात् विधीयते तत्र यद्यप्यकृते मतुब्लुकि नस्तद्धित इति टिलोपो न प्राप्नोति तथापि कृते मतुब्लुकि प्राप्नोति एकदेशविकृतं चानन्यवदिति यदेवांगं ब्रह्मवदिति तदेव ब्रह्मन्निति तदेवमभेदाश्रयेणोदमुक्तं॥ ॥श्री॥ ॥श्री॥ ॥०॥ ॥
राम॰
१८६
कारंतादनं = नांतमत्वं तयोरभेदाश्रयेणेति भावः॥ १=

प्राप्ते चाप्राप्ते चेति अपवादेति ननु विन्मतोर्लुगिसेतस्य नस्तद्धित इत्यस्य मेव योगोऽनन्तरः टेरित्ययं तु व्यवहितः तत्र केचिदाहुः पाठक्रमादर्थक्रमो बलीयानि
ति टेरित्येष प्रयोगः सर्वविषयस्य व्यापनादनन्तरो भवति यद्येवं पूर्वमेवायमर्थ उक्तो येननाप्राप्त इति किमर्थं पुनरुच्यते पूर्वमुत्सर्गापवादन्याय उक्त इदानीं त्वर्थ
क्रमप्रतिपत्त्याश्रयेणोच्यते येन हि सर्वो विषयो व्याप्तः स एव बाधितुं युक्तो यस्तु विषयविशेषे प्रवर्तते तेन तस्य बाधा युक्ता सामान्ये हि पूर्वं प्रतिपत्तिरुदेति पश्चा
द्विशेषेषु अन्ये तु न्यासभेदाश्रयेणाव्याचक्षते टेरित्यस्य पश्चान्नस्तद्धित इति पठितव्यम् पयिष्ठ इति पयस्विन् इष्ठन् इति स्थिते विन्मतोर्लुकि कृते अतो लो

=विन्मतोर्लुक् पंचमाध्यायस्य ॥ आर्थः क्रमः ॥ बुध्यारोहविषयः क्रमः ॥ ...

निवृत्तिकं भवति एवमिहापि सत्यपि संभवे विन्मतोर्लुक् टिलोपं बाधिष्यते यदप्युच्यते यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधते एवं नस्तद्धित इत्येतम
पि बाधेत न बाधते किं कारणम् येन नाप्राप्ते तस्य बाधनम् नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते नस्तद्धित इत्येतस्मिन्प्राप्ते चाप्राप्ते च अपवादापु
रस्तादपवादाः अनन्तरान्विधीन्बाधन्ते इत्येवं विन्मतोर्लुक् टिलोपं बाधिष्यते नस्तद्धित इत्येतन्न बाधिष्यते यदि तर्हि विन्मतोर्लुक् टिलो
इति॰ पं बाधते पयिष्ठ इति न सिध्यति पयसिष्ठ प्राप्नोति यथालक्षणमप्रयुक्त इति प्रकृत्याके राजन्यमनुष्ययुवानः राजन्यमनुष्ययुवानः
अके प्रकृत्या भवन्तीति वक्तव्यम् राजन्यकम् मानुष्यकम् यौवनिका नमपूर्वोऽपत्येऽवर्मणः मपूर्वोऽप्रतिषेधे वा हितनाम्न इति वक्त
व्यम् हैतनामः हैतनामनः आरोहितो वै हैतनामः आरोहितो वै हैतनामनः समानो हैतनामः समानो हैतनामन इति ॥ ॥

ऽपत्येन प्राप्नोति यथालक्षणमिति न भवति टिलोप इत्यर्थः ततश्च राजन्यस्तेन माचष्टे राजन्यति अपायुष्यं तमाचष्टे आयुष्यतीति भवितव्यम् राजन्यकमिति समूहे
र्थे गोत्रोक्षोष्ट्रेति वुञ् आपत्यस्य च तद्धितेनातीति यलोपाभावार्थं प्रकृतिभावविधानं यस्येतिलोपे सति वा विशेषाभावान्नेतरार्थः प्रकृतिभावः यौवनिकेति
यूनां भाव इति मनोज्ञादित्वाद्वुञ् तत्र नस्तद्धित इति टिलोपः प्राप्तः प्रकृतिभावान्न भवति नमपूर्व हैतनामन इति हितनाम्नोऽपत्यमित्यण् अन्निति प्रकृतिभावात्त
((टेष्टिलोपाभावः ॥ ॥ ॥

=नतदर्थमिति ... प्रकृतिभावेनेति ...

भा०कै०६ ब्राह्मो ब्राह्मशब्दोऽपत्ये न पत्येचेष्यते ब्राह्मोमुहूर्त्तो ब्राह्मोनारद ब्राह्मस्थालीपाक इति जातौ त्वपत्ये ब्राह्मण इतीष्यते अनपत्ये तु जातौ ब्राह्मी ओषधिरिति टिलोप इ

१८७ ष्यत एतच्च यथाभिधानेन सिध्यतीति मत्वा पृच्छति अथ किमिदमिति यदि तावदिति [redacted] ब्रह्मणोऽपत्यमित्यण् अल्लोपो न इत्यकारलो

पः मा प्रोन संयोगाद्वमन्तादिति प्रतिषिद्धः नस्तद्धित इति टिलोपे प्राप्ते अन्निति प्रकृतिभावः प्राप्नोन मपूर्वोपत्ये वर्मण इति प्रतिषिद्धस्तत ष्टिलोपे प्राप्ते नियमार्थमिदं अ

जाता वेवापत्येटिलोपो भवति ब्राह्मो नारद इति जातौ त्वपत्ये न भवति ब्राह्मण इति एवमपत्ये सिध्यति अवस्था अनपत्ये त्वन्निति प्रकृतिभावाद्ब्राह्मशब्दो न सिध्य

ब्राह्मोऽजातौ अथ किमिदं ब्राह्मस्याजातौ अनो लोपार्थं वचनमाहोस्विन्नियमार्थम् कथं वा नो लोपार्थं स्यात् कथं च नियमार्थं यदि तावदपत्य

इति वर्त्तते ततो नियमार्थं अथ निवृत्तं ततो लोपार्थं अत उत्तरं पठति ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते अपत्य इति निवृत्तम् तत्रा

प्राप्तविधाने प्राप्तप्रतिषेधः तत्राप्राप्तस्य टिलोपस्य विधाने प्राप्तस्य प्रतिषेधो वक्तव्यः ब्राह्मणः न वा पर्युदाससामर्थ्यात् न वा वक्तव्यः किं

कारणं पर्युदाससामर्थ्यात् पर्युदासोऽत्र भविष्यति अस्त्यन्यः पर्युदासे प्रयोजनम् या जातिश्चानपत्यं ब्राह्मी ओषधिरिति नवै अत्रे

मर ष्यते॥ ॥

ति अथ निवृत्तमिति अपत्यग्रहणे निवृत्ते विधिनियमसंभवे विधिरेव ज्यायानिति अनपत्ये अन्निति प्रकृतिभावे प्राप्तेऽजातौ टिलोपा[redacted]र्थं निपातनं भवति तत्र ब्राह्मो मुहूर्त्तो

ब्राह्मः स्थालीपाक इति सिध्यति ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात् ब्राह्मणी ओषधिरिति तु प्राप्नोति अपत्ये जातौ ब्राह्मण इति न सिध्यति नश्वापि

सेवर्मण इति प्रकृतिभावप्रतिषेधात् टिलोपप्रसंगात् न वेति वक्ष्यमाणोऽभिप्रायः इतरस्त्वेतमभिप्रायमबुध्वाह अस्त्यन्यदिति ब्राह्मी ओषधिरित्यत्र कृतार्थः पर्युदासो रा(म)०

ब्राह्मण इत्यत्र पूर्वसूत्रविहितप्रकृतिभावप्रतिषेधप्राप्तं टिलोपं न निवर्त्तयेत् नवै अत्रेष्यत इति अजाताविति पर्युदासः न चानिष्टार्थं शास्त्रमन्वाख्यायेत्यर्थः पर्युदास १८७

सामर्थ्यात् ब्राह्मण इत्यत्र टिलोपो भविष्यतीत्यर्थः॥ ॥

इतस्तल्लक्षणमुपालब्धुमाह अनिष्टंच प्राप्नोतीति ब्राह्मणी औषधिरिति प्राप्नोत्यजातावितिपर्युदासात् इष्टंच न सिध्यति ब्राह्मण इति एवं तर्हीति योग
विभागः क्रियत इति भावः तत्र ब्राह्म इत्यत्र सामर्थ्यादपत्य इति न संबध्यते अपत्येटिलोपस्य सिद्धत्वात् तेनानपत्ये सर्वत्र जातावजातौ च ब्राह्म इति नि
पात्यते अपत्ये पि ब्राह्मो नारद इत्यत्र परत्वाद्ब्राह्म इत्यत्र नेनेव टिलोपो भवति ततो जातावितितत्रापत्य इत्यनुवर्त्तते तेनायमर्थो भवति अपत्ये जा

अनिष्टंच प्राप्नोति इष्टंच न सिध्यति एवं तर्ह्यनुवर्त्तते अपत्य इति नात्रापत्य इत्यनेन ननिपातनमभिसंबध्यते ब्रा
ह्म इति निपात्यते अपत्ये जातावितिकिंतर्हि प्रतिषेधोऽभिसंबध्यते ब्राह्म इति निपात्यते अपत्ये जातौ नेति। कार्मस्ता
च्छील्ये किमर्थमिदमुच्यते नस्तद्धित इत्येव सिद्धं न सिध्यति अन्नणीति प्रकृतिभावः प्रसज्येत अणीत्युच्यते णाच्चायम् ए
वं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यः ताच्छीलिकेऽणकृतानि भवंतीति किमेतस्य ज्ञापने प्रयोजनम्
१८ चौरी तापसीति अणंतादितीकारः सिद्धो भवति॥ ॥श्री॥

तौ ब्राह्मणशब्दे टिलोपो न भवति अजातावितिप्रसज्यप्रतिषेधो भवति नानञः संबंधादिति सर्वेष्टसिद्धिः कार्मे ननु किमर्थमिति कर्मशीलमस्य छत्रादिभ्यो ण इति णे कृ
ते सिद्धष्टिलोप इति भावः ताच्छीलिक इति एवं च छत्रादिभ्यो णीति लाघवाय कर्त्तव्यं णवचने प्रयोजनाभावात् प्रज्ञाश्रद्धेतिज्वलितिकसंतेभ्य इति तत्संग्रह
=प्रकल्पेति पर्युदासपक्षेतुआतिभिन्नेऽपत्येऽर्थेतस्येत्यर्थे विविधेयानिर्देशात्प्रतिपत्तिः अपत्यान्नस्यानुवर्तने एवमपि विधेयसाधनं नियमवि[illegible] १९ णमितिणवचने ङीब्भावः प्रयोजनम्॥ ॥श्री॥ ॥
[illegible] भावः २८ नायवार्यमिति अन्येतु ज्ञापकसिद्धस्याणोऽनित्यत्वेन छात्रेत्यादिप्रयोगसिद्ध्यर्थं णवचनमित्याहुः तन्नासत्प्रमाणः २९

दंडिना यकारादाविति सूत्रेण घ्नोभाव इति व्रात्यरणादित्वात् ष्यञ् ज्ञापकं त्विति धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्यनपेक्ष्य ज्ञापकमुक्तं तदपे
क्षायां तत्वस्याप्रसंगात् ननु टिलोपाभावार्थं निपातनं स्यादिति सति प्रयोजने ज्ञापकत्वमनुपपन्नम् नैष दोषः उभयोरनित्ययोः परत्वाट्टिलोपं बाधि
त्वा तत्वं भविष्यति अनेकप्रयोजनत्वाद्वा निपातनानाम् अत एव कुत्वप्रतिषेधार्थमपि निपातनम् ऐक्ष्वाक इति इक्ष्वाकोरयत्यमिति जनपदशब्दादित्यञ्

=अयसंगादिति न त्वाचनेदं यथ प्रसुतार्थज्ञापकं किंतु ज्ञापका नित्य टिभावार्थे कदेशानुवादएवेतासर्वमितिभावः १=

दंडिनायन अत्र भ्रौणहत्ये किं निपात्यते पकारादेस्तद्धिते तत्वं निपात्यते भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् भ्रौ
णहत्ये तत्वनिपातनमनर्थकं किं कारणं सामान्येन कृतत्वात् सामान्येनैवात्र तत्वं भविष्यति हनस्तोऽचिण्णलोरिति ज्ञापकं तु त
द्धिते तत्वप्रतिषेधस्य एवं तर्हि ज्ञापयत्याचार्यस्तद्धिते तत्वं न भवतीति किमेतस्य ज्ञापने प्रयोजनं भ्रौणघ्नो वार्त्रघ्न इत्यत्र त
त्वं न भवति ऐक्ष्वाकस्य स्वरे भेदान्निपातनं पृथक्कृतेन ऐक्ष्वाकस्य स्वरे भेदान्निपातनं पृथक्कृतेन कर्तव्यम् ऐक्ष्वाकः ऐक्ष्वा
कः एकश्रुतिनिर्देशात्सिद्धम् एकश्रुतिः स्वरसर्वनाम यथा नपुंसकं लिंगसर्वनाम॥ ॥श्री॥ ॥

उकारलोपो निपात्यते त्रिलादाद्युदात्तत्वं इक्ष्वाकुषु जात इत्यणि प्राप्ते ओर्देशे ठञिति ठञि प्राप्ते तं परत्वाद्बाधित्वा जनपदतदवध्योश्चात्वृद्धादपि बहुवचनविषया
दिति वुञि प्राप्ते कोपधादित्यण् एतज्ञान्तोदात्तत्वं तत्र भिन्नस्वरयोरेकस्मिन्निपात्यमानेऽपरस्यासंग्रहादुभयमपि निपात्यम् एकश्रुतिनिर्देशादिति स्वरभेद
प्रसक्तमयेन निपातनं सर्वस्वरलौकिकप्रयोगसंग्रहार्थमित्यर्थः यथा नपुंसकमिति सामान्यच्छिन्ना वा विभाव तिरोभाव च्छिन्ना दिति शेषाणामंतर्भावात्॥ राम॰ १८८

भा० कै० ६ च० ४ मैत्रेयइति मित्रयोरपत्यमिति गृष्ट्यादिभ्यश्चेति ढञ् मित्रयु एय इति स्थिते ओर्गुण इति गुणापवादे ढे लोपोऽकद्र्वा इति लोपे प्राप्ते केकयमित्रयुप्रलयानां यादेरिया
१८५ देशे प्राप्ते लोपो निपात्यते तल्लोपस्यासिद्धत्वाद्यस्येति लोपाभावादेचो गुण इति पररूपमेकारः द्वितीय इति मित्रयव इति बहुषु लुगर्थः पाठः सप्तम इति
ढञ्योन्यत्रेयादेशः मित्रयोरिदं मैत्रेयमिति मैत्रेयक इति मित्रयूनां संघ इति गोत्रे लुगचीति लुकि प्रतिषिद्धे ढञन्ताद्गोत्रचरणाद्वुञिति वुञ् यदि तु सं

=नहुतुलोपरहि रेजीति वृद्धिः आत्मनेपदमाह अनो गुण इति अस्मिद्धवत्सत्र भत्यादन्यानेनुयस्येति लोपे पदे लोपो निमेनिवार्यं २=

अथ मैत्रेये किं निपात्यते मैत्रेये यादिलोपनिपातनं मैत्रेये ढञि यादिलोपो निपात्यते इदं मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते गृष्ट्यादि
षु प्रत्ययविध्यर्थं पाठः क्रियते द्वितीयेऽध्याये यस्कादिषु लुगर्थं क्रियते सप्तमेऽध्याये इयादेशार्थं इदं चतुर्थं यादिलोपार्थम् द्विर्ग्रहणं
शक्यमकर्तुं बिदादिषु अञ्प्रत्ययविध्यर्थं पाठः कर्तव्यः तत्र नैवार्थो लुका नापि यादिलोपेन इयादेशो नैव सिद्धम् नैवं शक्यम् इह हि मैत्रेये
कः संघ इति संघाङ्कलक्षणेष्वञ्यञिञामणिति अण् प्रसज्येत हिरण्मये किं निपात्यते हिरण्मये यलोपवचनं हिरण्मयं कलशं बिभर्षि कु
त्वं अथ हिरण्मये किं निपात्यते हिरण्यये छन्दसि मलोपवचनात्सिद्धम् हिरण्ये छन्दसि मलोपो निपात्यते हिरण्ययी नौरभवत् हिरण्य
याः पन्थान आसन् हिरण्ययमासनम्॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य चतुर्थपा
=बीलीति विदादिष्वेकमियादेशार्थमपरं अलिखेथार्थत्रितीयं नजासहात्रापिन्यासे= देचतुर्थमाह्निकं पादश्च चतुर्थः॥ ॥इति षष्ठाध्यायः समाप्तः॥ ॥ ॐ॥
=चत्वारि ग्रहणानि इति परलाघवाजावान्यथानोक्तं १=

घाङ्के सत्र न मैत्रेयादित्युच्यते तद्वाञीणि ग्रहणानि स्युरितीह निपातनं कर्त्तव्यं स्यादिष्टस्यासिद्धत्वात्॥ ॥इत्युपाध्यायजय्यटपुत्रकय्यटकृते महाभाष्यप्र राम०
दीपे षष्ठाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम्॥ ॥पादश्च चतुर्थः॥ ॥इति षष्ठाध्यायः समाप्तः॥ ॥संवत् १८२७ मिति फाल्गुन ॐ १८५



॥ षष्ठाध्याय समाप्तः॥
पत्र १८९

